CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(७)

श्री

श्रो॰ क्षितिं कुशलं करोतु मतां शातां प्रजानां सुखं निर्विघ्नं गणनायकं प्रतिदिनं
भानुप्रतापोदयं श्रीः सौधनधान्यकीर्तिममलं लक्ष्मी दातिष्ठतं १ स
यावद् गंगा सुरं गेव हत सुरनदी ज्ञानवीतो यंपुरा पाव स्माचा
शाशभागेन प्रदिन करः चं इता सग्रा हारि यावाव्रस्त्रा श्रिचिमर
पतीसहितेवर्तते मेरुशृंगे तावत्वं पौत्रपुत्रस्वजनपरीग
हे भोगते राजते श्री २

निरोक्षेणवा नारेदेव नामी विासप्राप्ते पातिथ्यिभास्करादेया मासिष्यिसवत्सरे यादनाङ्घनकर्मसु स्तो
सानेत पानके पितृकार्यविशेषतः व्यादन्तागते भानुमासिकवत्सरमवो २ उदयादरादेवाया ततो श्रेष्ट
म मानुषि, तोर्द बहृपञ्चीरोबहृ घटि पानराशा सिद्रित्रहरो घटि नातीनोद्रिमहरो घटिद्विको आपः
नाल वीज्ञे यापि नारां दाम सायम् २ श्रीः ताविं के दला वाईम् तविता मिथ्या वर्य
स्वापतां शाहि पा प्राप्तिं इगालांपदार्वि: शास्वा शिरा उ नल पुराः शाना
तां न पुरा साये हं नवं धार न ये पिर वर्तते उदरि र पांदा
श्री देहरग चौपीषं नरश्री इमरराशी

SCANNED
SCANNED
SCANNED

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2

॥ ॐ श्री गणेशाय नमः ॥ अथ नांदिमुखश्राद्ध लीख्यते ॥ अथाभ्युदयिक
श्राद्ध मन्त्र प्रथमं तावि पत एवं कृत्वो मातृपूजाविधिः प्रातः काले स्ना
तः कृत्वा नित्य क्रियः कुड्येफलके वा स्थापितर स्निका सप्त दश तत्पे गणप
नां० तिसहीत षोडश मातृः स्रतिका न यीं स्त्रियं तद भावे तामपि रत्निका यां पूजयेत ॥ त
१ न मातरः गौरी पद्मा शचि मेधा सावित्री विजया जाया देवसेना स्वधा स्वाहा
मातरौ लोकमातरः धृतिः पुष्टि स्तथा तुष्टि स्वस्थानकुलदेवतेति [illegible]
आवंश्य श्रा श्रम्व ॐ पवि शपत्र मरात्निका मारभ्य नमः श्रेया गणापति रसि गौर्यसि
पद्मासि शच्यसि मेधासि सावित्र्यसि विजयासि देवसेनासी स्वधासि स्वाहासि मा
तरः स्था लोकमातरः स्याः धृतिः रसि पुष्टि रसि तुष्टिरसि आत्मकुलदेवतासि ॥
इद्धातिस्त ॐ भूर्भुवः स्वः गौरी इहागच्छ इहतिष्ठ ॐ भूर्भुवः स्वः गणपते इह गच्छ
ॐ भूर्भुवः स्वः शचि इहागच्छ इहतिष्ठ ॐ भूर्भुवः स्वः पद्मे इहागच्छ इहती
गच्छ ष्ठ ॐ भूर्भुवः स्वः मेधे इहागच्छ इहति
हा ४ ष्ठ ॐ भूर्भुवः स्वः सावित्रीइहाग० ती ष्ठ ॐ भूर्भुवः स्वः विजये इहागच्छ इहतिष्ठ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ओं भूर्भुवः स्व यजुर्वेद इहा गच्छ इह तिष्ठ ओं भूर्भुवः स्व देवसेने इहा गच्छ इह तिष्ठ ओं
भूर्भुवः स्व मातर इहा गच्छत इह तिष्ठत ओं भूर्भुवः स्व लोकमातर इहा गच्छ इह तिष्ठ ओं
भूर्भुवः स्वः हृष्टे इहा गच्छ इह तिष्ठ ओं भूर्भुवः स्वः पुष्टे इहा गच्छ इह तिष्ठ ओं भूर्भुवः
स्वः तुष्टे इहा गच्छ इह तिष्ठ ओं भूर्भुवः स्वः आत्मनः कुलदेवते इहा गच्छ इह तिष्ठ ओं
भूर्भुवः स्वः श्रिये इहा गच्छ इह तिष्ठ ओं भूर्भुवः स्वः श्रिये इहा गच्छ इह तिष्ठ ओं भूर्
भुवः स्वः गणपतिसहितगौर्यादि मातृभ्यो नमः इति प्रत्येकं मोकारस्वाहा इति एकैका
वाह्य स्थापयित्वा ओं मनोजूतिर्जुषता माज्यस्य बृहस्पति र्यज्ञमिमं तनोत्वरिष्टं यज्ञं
समिमं दधातु विश्वे देवा स इह मादयन्ता मोम्प्रतिष्ठ इत्यनेन प्रतिष्ठाप्य ऋग्वेद प
ठितमन्त्रैः पाद्यादि उपचारै ओं गणपतये नमः १ ओं गौर्ये नमः २ ओं पद्मा
यै नमः ३ ओं शच्यै नमः ४ ओं मेधायै नमः ५ सावित्र्यै नमः ६ ओं विजयायै नमः ७ ओं
जयायै नमः ८ ओं देवसेनायै नमः ९ ओं स्वधायै नमः १० ओं स्वाहायै नमः ११ ओं मा
तृभ्यो नमः १२ ओं लोकमातृभ्यो नमः १३ मृगादिराशिद्वय भानुभोगात् षट्कं

ऋतूनां शिशिरो वसंतः ग्रीष्मश्च वर्षा शरदश्च तद्वद् हेमंतनामा कथितश्च

CC-0. In Public Domain. Digitization by Gangotri Sarayu Trust, Funding IKS-MoE-Grant-2

ॐ भगवते नमः अथात पैतृक ... प्रातः ... मध्याह्ने स्नानं संध्या च कृत्वा
जलाशये गृहे वा तर्पणं कुर्यात् तिलकुशप वा न्याश प संकल्पः कुर्यात् अद्येह
त्यादि अमुक संवत्सरे अमुकायने अमुक ऋतौ अमुकमासे अमुक पक्षे अमुक
तिथौ अमुक गोत्रोत्पन्नोहं अमुक राशि अमुक शर्म्माहं अद्यो तुपा तु सर्व ...
तर्पं नपार्थे ब्रह्मतो कुर्व पंदेव ऋषि मनुष्यपितृणां तर्पणं करिष्ये ॐ ... स्व प्रा ... खः ऋ
तु कुशाय वै स्वतीर्थेन वा स्तर्पयेत ॐ भूर्भुवः स्वः गणपति ब्रह्मा रूपो ... गर्भं तु ई
शा ... तुये तां जलांजलि नृ गणपतिस्तृप्यतां ॐ ब्रह्मा स्तृ ॐ विष्णुस्तृ ॐ रुद्र
स्तृ ॐ प्रजापतिस्तृ ॐ देवास्तृ ॐ छंदांसीस्तृ ॐ वेदास्तृ ॐ ऋष्याचार्य्यस्तृ ॐ
ऋ ष पस्तृ ॐ गंधर्वास्तृ ॐ हरिन्या ... स्तृ ॐ सिव ... चार्य्य स्तृ ॐ सं
वत्सरावा यु प व स्तृ ॐ देव स्तृ ॐ अप्सरसस्तृ ॐ देवानुगास्तृ ॐ नागास्तृ ॐ
पतास्तृ ॐ रत्नां सिनि तृप्यतां ॐ पिशाचास्तृ ॐ सुवर्णास्तृ ॐ भूतानि तृप्य
ॐ वनस्पतयस्तृप्य ॐ ओषधयस्तृ ॐ भूतग्राम चतुर्विधस्तृप्यतां २९ ततो य
ज्ञोपवीतं कंठावित्तं ... पाहृ पं ... कुशासनेन ... तीर्थे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नम्स्त्तै ॥ मनुष्यास्तर्पयेत् ॐ भूर्भुवः स्वः सनकादयः सप्रमनुष्याः इह गच्छन्तु
इह तिष्ठन्तु गृह्णन्त्वेतां जलांजलीन् ॐ सनकस्तृ ॐ सनंदनस्तृ ॐ सनातनस्तृ
ॐ कपिलस्तृ ॐ आसुरीस्तृ ॐ वोढुस्तृ ॐ पंचशिखस्तृ ३ ततो अपसव्यं
कृत्वा वामजानु निपात्य पातितिलमोटकं गृहीत्वा पितॄन् तर्पयेत् ॐ ४ तृ
भूर्भुवः स्वः कव्यवाडनलादयो दिव्यपितर इहागच्छन्तु इह तिष्ठन्तु गृह्णन्त्वेतां ज
लांजलीन् ॐ कव्यवाडनलस्तृ ॐ सोमस्तृ ॐ यमस्तृ ३ अर्यमास्तृ ॐ अग्निष्वात्ता
पितरस्तृ ॐ सोमपाः पितरस्तृ ॐ बर्हिषदः पितरस्तृ ३ ॐ भूर्भुवः स्वः यमादि
चतुर्दश यमा इहागच्छन्तु इह तिष्ठन्तु गृह्णन्त्वेतां जलांजलीन् ॐ यमाय
नमः ३ ॐ धर्मराजाय नमः ३ मृत्यवे नमः ३ ॐ अन्तकाय नमः ३ ॐ वैवस्वताय न
मः ३ ॐ कालाय नमः ३ ॐ सर्वभूतक्षयाय नमः ३ ॐ औदुम्बराय नमः ३ ॐ दध्नाय
नमः ३ ॐ नीलाय नमः ३ ॐ परमेष्ठिने नमः ३ ॐ वृकोदराय नमः ३ ॐ चित्राय नमः
ॐ चित्रगुप्ताय नमः ३ ततः भूर्भुवः स्वः अस्मत्पितर इहागच्छन्तु इह तिष्ठन्तु गृह्णन्त्वेतां
जलांजलीन् ॐ हिरण्यपरं ॐ यमासः ॐ आद्यामत्पितरः सोम्यासः आलंजद्गईध्रुव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

का स्त ज्ञास्मे नो वंतु पितरो हवेषुः ॐ अंगिरसो नः पितरो नवग्वा अथर्वाणो भृ
२ गवः सोम्यासः तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ३ ॐ आ
यां तु नः पितरः सोम्यासो अग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन् यज्ञे स्वधया मदन्तो
अधिब्रुवंतु ते वन्त्वस्मान् ३ ॐ ॐ ऊर्जं वहंतीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्प
यत मे पितरः ४ पितृभ्यः स्वधायिभ्यः स्वधायै नमः पितामहेभ्यः स्वधायिभ्यः स्वधा न
मः प्रपितामहेभ्यः स्वधायिभ्यः स्वधायै नमः अक्षन्न पितरो अमीमदंत पितरो ये च नेह यांश्च
विद्म यां २ ॐ उ च न प्रविद्म त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञं सुकृतं जुषस्वः ६
ॐ मधु वाता ऋतायते मधु क्षरंति सिंधवः माध्वीर्नः संत्वोषधीः मधु नक्तमुतोषसो मधुमत्पा
र्थिवं रजः मधु द्यौरस्तु नः पिता ३ अद्येहेत्यादि अमुक गोत्रस्य अस्मत्पिता अमुक शर्मा
हं वसु स्वरूपस्तृप्यतां ३ इदं जलं तस्मै स्वधा नमः ३ तथा अमुक गोत्र अस्मत्पिता
मह अमुक शर्मा रुद्रस्वरूपस्तृप्यतां ३ इदं जलं तस्मै स्वधा नमः ३ तथा अमुक गोत्र
अस्मत्प्रपितामह अमुक शर्मा आदित्यस्वरूपस्तृप्यतां ३ इदं जलं ३ तथा अमुक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गोत्रस्मन्माता अमुकीदेव्या वसुस्वरूपास्तृ·प्यतां ३ इदं जलं तस्मै तेस्वधा तृप्यतीं
ध्वं ३ तथा अमुक गोत्राऽस्मत्पितामहि अमुकी देवि रुद्रस्वरूपस्तृप्य· ३ इदं जलं त
स्मैते ३ तथा अमुक गोत्राऽस्मत्प्रपीतामही अमुककी देवी आदित्यस्वरूपस्तृ· ३ इदं ज
लं तस्मैते स्वधा तृप्यध्वं ३ ॐ नमो वः पितरो रसाय १ ॐ नमो वः पितरो शोषाय २ ॐ न
मो वः पितरो जीवाय ३ ॐ नमो वः पितरः स्वधायै ४ ॐ नमो वः पितरो घोराय ५ ॐ नमो
वः पितरो मन्यवे ६ ॐ नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्तसतो वः पितरो दे
ष्मैतद्वः ॐ अद्येह पादि अमुक गोत्र अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानां
अमुकामुक शर्म्मणां वसुरुद्रादित्यस्वरूपाणां सपत्निकानां स्तृप्यतां ३ इदं जलं तस्मै
स्वधा तृप्य· ३ १० वं क्रमे राजेष्ठ कनीष्ठ पितृव्य तत्पत्नी जेष्ठभ्राता तत्पत्नि मातृभगिनि मा
तुल श्वश्रु श्वसुर सालानां पत्नीनां स्वगुरु पत्नि स्वगुरु पत्नीनां तर्पणं कार्यं १० वे का

Kirtikant Sharma Collection, Najafgarh

जैली नो. ॐ आचार्यास्तृ० १ ॐ गुरवस्तृप्यतां १ ॐ शिष्यास्तृ० १ ॐ गंधर्वास्तृ० १ ॐ ज्ञातय
स्तृ० १ इति तर्प्पयेत् २ देवासुरास्तथा नागा यक्षगंधर्वराक्षसाः पिशाचा गुह्यकाः सिद्धाः
3 कूष्मांडास्तरवः खगाः जलेचरा भूमिचरा वाय्वाहाराश्च जंतवः तृप्तीयेते बयात्वा
शु मद्दत्तेनांबुनासदा २ आब्रह्मस्तंबपर्यंतं देवर्षिपितृमानवाः तृप्यंतु पितरः सर्वे
मातृमातामहादयः ३ अतीतकुलकोटीनां सप्तद्वीपनिवासिनां आब्रह्मभुवनां
ल्लोकादिदमस्तु तिलोदकं ४ ये बांधवाबांधवा ये येन्यजन्मनि बांधवाः ते तृप्तिमखि
लां यांतु ये चास्मत्तोयकांक्षिणः ५ नरकेषु समस्तेषु यातनासु च संस्थिता येषामाप्या
यनायैतद्दीयते सलिलं मया ६ ये चास्माकं कुले जाता अपुत्रा गोत्रिणो मृताः ते पि यांतु म
या दत्तं वस्त्रनिःपीडनोदकं ७ इति स्नानवस्त्रं पिड्य हस्तौ पादौ प्रक्षाल्य ॥ सव्येनाचम्य
गंधाक्षतपुष्पैर्जलं ब्रह्मादिदेवान् पूजयेत् मंत्र: ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ताद्विसि

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पंतः स्तरू चो वेनुश्रावः सुवध्म ॐ पमा स्त्रस्यवि ष्ण श्रशात श्व यो मस ताविवः ॐ व्रसयो
नमः १ ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे ॐ विष्णवे नमः २ ॐ नमस्ते रु
द्रमन्यव उतोत इषवे नमः बाहुभ्यामुत ते नमः ॐ रुद्राय नमः ३ ॐ आ कृष्णेन रजसा
वर्तमानो निवेशयन्नमृतं मर्त्यं च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॐ
सूर्याय नमः ४ ॐ अग्नि त्रस्यव पर्यसीय्ततो वो देवो देवस्पमानंसी घुम्ना चत्रस्वा वस्व वः ॐ अग्न्रा
यनमः ५ ॐ इमं मे वरुण श्रुधी हव मा या मा य त्वा मस्युरा चके। ॐ वरुणाय नमः ६ श्व हृष्व
पश्मके तवो विरूपयोजनौ ७ ॐ भाजं तो स्त्रयोज यो ८ ह्यतिस्र र्व्वा पेदत्वा ॐ ईवाह
पश्या नं कुर्पोत ॐ ह पृसः श्व चिषद सुरं तारित्नमहोता वेदिषद तिथिदुरोणसत न्रषवः
रसद्दतसयो ममर ज्ञा गोजा ऋतजा अद्रिजा ऋतं वृहत् इत्युपस्थापः ॥

२ ॥ येस्नता वैपितृव्याश्च मातुलाः श्वशुरास्तथा आचार्यो गुरुपिन्नायास्तेगर लांतुः भुमंजलाम एचस
१ वन्ध्री नोपुत्रा वन्हि दा हविव जंता: १ गपम युमता ए वतोर सिचलमक्षिहपित्र वंशो मता रग
वोश्वता: येमे कुले लुप्तपिंडः क्रिया लोपगता श्च ये

षोषयष्टमस्य माद्र गैर गृष श्रीवत्सु मा ए बांहों

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शतभिषा वरुणो देवता मंत्र ॐ वरुणस्योत्तंभनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनम
सि॥ वरुणस्य हे ॐ पववयासि वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमासिद॥२॥
पूर्वाभाद्रपदा अजपाद मंत्र॥ ॐ तन्यो अग्नि वरुण विद्वान्देवस्य हेडो अव यासिसीष्ठाः य
जिष्ठो वह्नितमः शोसुचोनो विश्व द्वेषा॥ सिप्रमुग्ध्यास्य शः॥३॥ उत्तराभाद्रपदे नामासी ॥
॥ स्वस्तिघितस्ते पिता नमस्तेस्तु मा मा हिंसीः स्मो निवर्तयाम्यायुषे नाद्याय प्रजननाय रायस्पो
षाय सुप्रजास्त्वाय सुविर्याय॥४॥ रेवती मंत्र अग्निरिंद्र वरुण मित्र देवा स्तुह्नि प्रपितानक होत
विष्णोविष्णान विष्णारुद्रो अधयापूषा पर्जन्य सरस्वती प्रवासि॥५॥ ऋषिपं त्रैज पंका
र्यो ब्राह्मणो वेदपारगे॥ पूजयेत्स्थावरं लिंगं नवोदकं गवाहरुकं दस्यापितं॥ देवतानां
हि पूजां कुर्यो यथाविधि॥ अथातत्संभवस्यापि षडतौ पश्चेपोलिना ब्राह्मणानां शिवा यी
य संस्कायै शुभ पर्वा शिवां २

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मतव:ज्वालाप्रकाशमे

पुस्तकश्राद्धविवेका

अहतमांमलाला नत्थमल केस छापागया शुभम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीगणेशायनमः॥ प्रसीदतु सनो हरिस्त्रिदशवैरिसीमंतिनी नवीन विधवाजन व्रत विधान दीक्षा गुरुः॥
यदीय पद पंकज स्मरण वीत सर्प्पैनसः पुनर्भगता गतं जहति वीत मोहा बुधाः॥१॥ चिरंतनाने
कनिबंधसिद्धः सुसंप्रदायानुगतः स्फुटार्थः नत्वा हरिं रुद्रधरेण साम्य वितन्यते श्राद्ध विवेक
एष॥२॥ श्राद्धं नाम वेद बोधित पात्रालंभन पूर्वक प्रमीत देवतो द्देशको द्रव्य त्याग विशेषः
तच्छ्राद्ध मिह स्वरूपं भेदेति कर्त्तव्यता कथन मंत्र निर्वाप विहित निषिद्ध देश काल द्रव्य ब्रा
ह्मण कथनेन विविच्यते तत्रादौ संक्षेपतः स्वरूपभेदः कथ्यते तत्र बृहस्पतिः नित्यं नैमित्तिकं
काम्यं वृद्धिश्राद्धं तथैव च पार्वणं चेति मनुना श्राद्धं पंचविधं स्मृतम् एतद्विवृतं भविष्यत्पुराणे अह
न्यह नियच्छ्राद्धं तन्नित्यमिति कीर्त्तितं वैश्वदेव विहीनं तदशक्ता वुदकेन तु एकोद्दिष्टं तु यच्छ्राद्धं
तन्नैमित्तिकमुच्यते तदप्यदैवं कर्त्तव्य युग्मान्भोजयेद्द्विजान् कामाय विहितं काम्यमभिप्रेतार्थसिद्ध
ये पार्वणेन विधानेन तदप्युक्तं खगाधिपः वृद्धौ यत्क्रियते श्राद्धं वृद्धि श्राद्धं तदुच्यते सर्वं प्रदक्षि
णं कार्य्यं पूर्वान्हे तूपवीतिना अमावास्यायां तत्क्रियते तत्पार्वणमुदाहृतं क्रियते वापर्वणि
यत्पार्वणमिति स्थितिः अत्र नैमित्तिक पदेन षोडश प्रेत श्राद्धान्यपि संगृह्यते॥
एकोद्दिष्ट रूपत्वात्तेषां पार्वण पदेन गोष्ठीश्राद्धाद्यपि स्मृत्यंतरेणोक्तं संगृह्यते तेषां सर्वे
षां पार्वण विधाना विधानात् अत्र यद्यपि पार्वणभवं पार्वणमिति व्युत्पत्तिस्तथापि व्युत्पत्ति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मात्रमिदं सिद्धं वक्ता नो देवश्राद्धपूर्वकषट्पुरुषश्राद्धं पार्वणं अत एव क्षयाहे पार्वणं कुर्वन्न याधोयाति मानवः यत्तिश्राद्धं निषिद्धं अहन्येकादशे प्राप्ते पार्वणं तु विधीयते इत्यादिस्मृतिषु देवश्राद्धं पूर्वक षट्पुरुषश्राद्धं विषयतयैव निषेधो विधिश्चोपपद्यते अन्यथा पर्वव्यतिरिक्त काले पार्वणस्यासंभवाद्विधिनिषेधानुपपत्तिः स्मृतिसारमहार्णव हेमाद्रि युधकल्पतरु पितृभक्तिषु स्मृतिनिबंधेष्वपि एकोद्दिष्टस्थाने जीवत्पितृकस्याग्निभ्यां मृताहे पार्वणं कर्तव्यमिति यल्लिखितं तदपि संगच्छते अन्यथा तद्वचनं स संभवादयुक्तमवस्यात् लौकिकेपि च प्रमाणे कास्त्वं परपक्षीय प्रतियद्यदि श्राद्धेष्वपि पार्वणपदं प्रयुंजते श्राद्धारंभे प्रथमं श्राद्धाय द्रव्यसेकः तत्र नाग्नोऽस्ति नस्येयात्किंचित्श्राद्धे देवे च कर्मणि त्यत्र नस्पृशेत् द्याद्दित्यर्थः अनेन वाक्येन प्रोक्षणप्राप्तौ पुंडरीकाक्षोच्चारणेतिनिक्वचित् क्वचिन्निबंधे लिखितं पुंडरीकाक्षस्मरणेन निक्काचित् तत्र शंखचक्रधरं विष्णुं विभुजं पीतवाससं प्रारंभे कर्मणां विप्र पुंडरीकं स्मरेद्धरिमिति मूलवाक्यं तत्र स्मरणमेव विहितमस्ति तथाप्युच्चारणस्य स्मरणपूर्वकतया उच्चारणे स्मरणमात्र्येवत्यं विरोध एवं त्याच्चाराऽनुगृहीतमुच्चारणं क्रियते तत्राविरुद्धं फलकीर्तनमपि क्रियते स तत्संप्रदाये तेन पुंडरीकाक्षः पुनात्वित्युच्चार्य द्रव्यसेकः ततः संकल्पः तत्राऽद्ये पार्वणश्राद्धमहं करिष्ये इति पितृभक्तौ संकल्पः अस्मत्संप्रदाये तु तिथ्युल्लेखपूर्वकः पित्रादीनां प्रत्येकं गोत्रसंबंधिपदानामनुकीर्त्त

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रा·वि· ६ भ्रमोहयः कात्यायनसूत्रे स्वाहा नमस्ते वोपदेशादित्यभिधाने वोपदेशस्य परंपरासिद्धतया रव्येयात् अत्र
पवित्रोपरि जलांतरं वाजसनेयिनः केचिद् ददति सामगास्तु दर्गांतर दानमेतदिति कृत्वा न केचिद्दद
ति तत्र रत्नदर्भोदके हस्ते विप्रेभ्यश्च पृथगपृथगिति वायुपुराण वाक्यं प्रमाणं तच्च सर्वविधिसाधारणं
नियामकाभावादिति सर्वेषां यजुर्विदामपि जलांतरदानमुचितं ततो यादिव्या इति पाठः तत्र आपः शिवा
सर्ढं· स्योना सुहवं त्वित्यत्र केचित्प्रथमं तालव्य शाकारं पठंति केचिन्मूर्द्धं·कारस्थाने दन्त्यमेव सकारं पठंति
तत्र यजुर्वेदाश्र्ढं कारसहितो दंत्यः सकारः पठनीयः यजुर्वेदीयत्वादस्य मंत्रस्य दंत्यसकारोपि परंपरोपदे
शस्थैर्यदिति ततोर्घोत्सर्गः तत्रोत्सर्गवाक्ये प्रथमं युष्मत्पदोच्चारणं ततो दयद्वयोच्चारणं असावेषतेऽर्घ
इति कात्यायनेनानुपूर्वीविशेषोपादानात् तथाचरणो हस्तार्घः एषते हस्तार्घ इति वाक्यं ततः पित्रार्घपात्रा
णं न्युब्जीकरणं तत्र प्रपितामहार्घपात्रस्थमर्घ पितृजलादि पितामहार्घपात्रे कृत्वा तदपि तिलार्घपात्रे कृत्वा
ऽपितृभ्यः स्थानमसीति एकदैवपात्रत्रयस्याधोमुखस्य वामप्रदेशे स्थापनं केचित्प्रथमं पितृपात्रं न्युब्जीकृत्य तदु
परि पितामहपात्रं तदुपरि प्रपितामहपात्रं न्युब्जीकुर्वंति एतत्तु न मनोरमं पितृभ्यः स्थानमसीति न्युब्जीपात्रं
विदधातीति कात्यायनेन त्रयाणमेकदैव स्थापनविधानात् ततो गंधादिदानं पात्रपक्षे प्रत्येकं त
न्त्रतिपादनम् ततो जलादिना चतुष्कोणमंडलकरणं अत्र मंडले दिगुपक्रमनियमः प्रमाणाभावान्ना
स्ति ततो जले आहुति हूयहोमः तत्राग्नौ व्यंजनयोगेन कर्त्तव्यः उद्धृत्य घृतात्तमन्नं पृच्छत्यग्नौ करिष्य इत्यत्र ६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्रमात्रसाविध्यानात् जुहुयाद्यंजनस्वा स्वत्नमन्त्र ततो जले इति विष्णुपुराणीय वाक्यांतरे निषेधाच्च त
तो भूस्वाम्यन्नदानं ततो हुतशेषप्रक्षेपः पात्रेषु ततः प्रत्येकं परिवेषणं ततो मधुनाभिधारणं ततो
मधुवाता इत्यादि त्र्यृचत्रयपाठः मधुमधुमध्विति च पाठः अत्र बहूनां मधुमधुमध्वितिमंत्रपाठ
स्यानाचरणम् तत्रासनातेऽन्नमधुमयं कृत्वा मधुवाताभिमंत्रितमिति यमवाक्य मधुवाता इतिपदस्य
मधुप्रकाशकमंत्रोपलक्षणपरत्वात् मधुनक्तं मधुमान्न इति त्र्यृचद्वयोपस्थापकवन्मधुमधुमध्वितस्याप्यु
पस्थापकं मधुप्रकाशकत्वस्य तौल्यात् अत एव सुगतिसोपाने सर्वश्राद्धप्रयोगेऽन्नावसरे मधुमधुमध्विति
च लिखितं तत्रान्नोत्सर्गानन्तरं गायत्रीमधुवाता इत्यादिजपः ततोऽन्नहीनपाठः इति सुगतिसोपा
नादौ भवशर्मप्रतिहस्तकग्रंथे क्रमः अन्नोत्सर्गानन्तरमन्नहीनपाठः ततो गायत्री मधुवाता
इत्यादिपाठ इति पितृभक्त्यादौ क्रमः तदनयोः क्रमयोर्विकल्प एव सव्याहृतिकां गायत्रीं मधुवा
ता इत्यृचं जप्त्वा यथासुखं वाच्यं भुंजीरंस्तेऽपि वाग्यता इति याज्ञवल्क्यवाक्यानुसारेण सुगतिसोपा
नादिलेखनं कात्यायनसूत्रमन्त्रानुसारेण पितृभक्त्यादिलेखनम् तथाच कात्यायनसूत्रम् वै
श्वदेव्यर्चायजुषाचार्चं सुष्टमवगाह्योक्षं स्विष्टमन्नं दद्याच्छक्त्या चाप्नजपेद्या हृतिपूर्वां सप्रणवां गाय
त्रीं मधुवाता इति त्र्यृचं चेति अस्मत्संप्रदाये तु प्रेतश्राद्धे षष्टिहस्तकभवशर्मग्रंथेन व्यवहारः तदित
रश्राद्धेषु पितृभक्तिलेखनानुसारेण व्यवहारः अत्र इदमन्नमस्मात्राय इदमाज्यमित्यन्नतत्रपृथक्त्वं पृष्ठतिर्ये

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यद्यपि नवीनग्रंथेषु लिखितं इदमन्नमिमा आप इदमाज्यमित्यन्नजलघृतेष्वंगुष्ठनियोजनानंतरमिदं
दर्विरिति पुनरन्नेंगुष्ठनियोजनमिति प्राचीनसंप्रदायः तदनयोः पक्षयोः प्राचीनः संप्रदायः प्रमाणिकस्त
थाहि कल्पतरौ श्राद्धकांडे पैठीन इदं हविरित्येवं सांगुष्ठमन्नविधिं ब्राह्मणेभ्यो दद्यात् अस्यायमर्थः अन्न
भिरन्नप्रकारः पायसादिः सब्राह्मणांगुष्ठनिवेशनपूर्वकमिदं हविरित्यभिधाय संकल्पनीय इति लिखि
तं अन्नदानोत्सर्गवाक्ये एतत्तेन्नं सोपकरणं स्वधेति नमः एवमर्घपिंडसूत्रदानेष्वपि प्रथमं नेपदोच्चार
णं कर्तव्यम् कात्यायनदो तथैव वाक्यप्रवणात् प्रेतश्राद्धेतु ब्रह्मपुराणाद्यनुसारेण वाक्यं तत्र नायं निय
मः ततः पवित्रजपानंतरमन्नविकरणम् तत्र मंत्रद्वयम् अनग्निदग्धा ये जीवा ये प्रदग्धाः कुले मम
भूमौ दत्तेन तृप्यंतु यान्तु परां गतिमित्येकः अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम भूमौ दत्तेन
तृप्यन्तु तृप्ता यान्तु परां गतिमित्यपरः तत्र यजुर्वेदिनां नियमतः प्रथममंत्रेणैवान्नविकरणं
कात्यायनेन तस्यैव गृहीतत्वात् वेदशून्यानां द्वितीयमंत्रः प्रथममंत्रेणैवान्नविकि पौराणिक
त्वात्प्रयोज्य इति ततः आचमनं ततो हरिस्मरणं ततो गायत्रीमधुवाताजपः सच सव्येन अप
सव्येन प्रमाणाभावात् श्राद्धोपक्रमगायत्रीजपन् नच पूर्ववद्गायत्रीं जपित्वेति कात्यायनसूत्रे पू
र्ववदित्यतिदेशादपसव्यप्राप्तिरिति वाच्यं पूर्वमपसव्योपदेशाभावात् तथाच तत्र पूर्ववदित्य
नेन पूर्वोपदिष्टप्रणवव्याहृतिसाहित्यस्यातिदेशः अवधार्मप्रतिहस्तकर्मतत्र गायत्रीमधुवाता ८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जपोनास्ति ततः पिंडस्थानेऽपसव्येन रेखाकरणम् विच्छिन्नमूलकुशास्तरणं सव्येन देवताभ्य इति
जपः ततोऽपसव्येन पिंडस्थानेऽवनेजनदानं ततो पिंडोत्सर्गः तत्रार्पितेपदस्य प्रथमेन ततः पिंडः स्व
धेतिवाक्योच्चारणम् ततः करप्रोक्षणं ततआचमनं तत्र त्रिराचम्येत्यभिधानात् चुलुकत्रयात्मक
स्याचमनपदार्थस्य त्रिरित्यनेनान्वयात् चुलुकनवतयाऽऽचमनं मन्यंते वस्तुतस्त्वाचमनस्वरूपस्य
चुलुकत्रयात्मकस्यैव स्वरूपेणोपादानमनुवादरूपत्वादितिभाति ततोऽत्र पितर इत्याद्यनुष्ठानं
ततः प्रत्यवनेजनं ततो नीवीविस्रंसनं ततः आचमनं ततः सव्यहस्तेन सूत्रमादाय दक्षिणह
स्तेन वामान्वारब्धेन पिंडोपरि सूत्रधारणं नमो इति पठित्वा ओं एतद्वः पितरो वास इति प्रत्येकम
विकृतेन मंत्रेण ततः स्वदुत्सर्गः ततस्तेभ्यो गंधादिदानम् ततोऽक्षय्योदकदानादि अत्रापि
त्रैकश्राद्धेऽक्षय्योदकदानादीनि केचिन्निवर्तयंति प्रतिवचनाभावात् तन्न युक्तं एवं सति
प्रथमे गायत्रीजपादेरपि निवृत्तिरापद्येत ब्राह्मणानुज्ञानाभावात्तस्माद्ब्राह्मणाभावे ब्रा
ह्मणकर्तृकाभ्यनुज्ञानप्रतिवचनादीनि निवर्ततां भोजनं तस्यास्मत्सं प्रत्युयजमान
कर्तृकजपादीनि निवर्तंते अन्नोत्सर्गादिवदिति ततः आशीः प्रार्थनं तत्र दातारो भिवर्द्धंतां वेदः
संततिरेव चेत्यत्र वेदशब्दस्य प्रथमैकवचनांतस्यास्मत्संप्रदायपाठः कात्यायनसूत्रे प्रथमैकवचनां
तस्यैव परंपरोपदेशात् अग्निपुराणादौ तथा दर्शनाच्च ततोऽर्जं वहन्तीरिति जलधारादानं पिंडोत्थापनं उल्मुकस ६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

छिन्नमूलानां चाग्नौ प्रक्षेपः अर्घपात्रोत्तानीकरणं दक्षिणा देवताभ्य इति जपः दीपनिर्वापनं हस्तपा
दप्रक्षालनम् आचमनम् । विष्णुस्मरणम् श्राद्धीयद्रव्यस्य ब्राह्मणे प्रतिपादनं एकोदिष्टेतु एकेस्माद्द
श्यतयाएकवचनांतप्रयोगेण वाक्यं ॐ अद्यामुकमासीयामुकपक्षीयामुकतिथौ अमुकगोत्रस्यपितुर
ऽमुकशर्मणः सांवत्सरिकैकोद्दिष्टश्राद्धमहं करिष्ये इति संकल्पवाक्यम् आश्विनकृष्णचतुर्दश्यां शस्त्र
हतादीनामेकोद्दिष्टम् शस्त्रादिहेतुकमरणयोगिनामाश्विनकृष्णचतुर्दशी श्राद्धाधिकरणं विधीयते
तथाचनिमित्तान्तानदधिकरणोपस्थितिमात्रेण चरितार्थत्वात्संकल्पवाक्ये निमित्तोल्लेखो विफलइ
ति ॐ अद्याऽऽश्विनकृष्णचतुर्दश्याममुकगोत्रस्य पितुरमुकशर्मण एकोद्दिष्टश्राद्धमहं करिष्ये इत्ये
वमेव संकल्पोयुक्तः एवमशौचादिनाक्षणहे सांवत्सरिकैकोद्दिष्टश्राद्धाकरणेऽशौचांते सति याति
थिः प्राप्यते तस्यामेकोद्दिष्टं श्राद्धकर्तव्यं सूचीभूतेन दातव्यं यानितिथिः अतिपद्यते सा तिथिस्तत्रक
र्तव्या तत्त्व त्यावैकदाचनेनिवाक्येन शौचावस्था प्राप्तो प्रथमतिथिः श्राद्धाधिकरणत्वेनब
ध्यते तत्रापि निमित्तोल्लेखः ऽप्रयोजकः प्राप्ततिथिरेवोल्लेखः प्रयोजकः तथाचाद्यामु
कमासीयामुकपक्षीयामुकतिथौ वमुकगोत्रस्य पितुरमुकशर्मणः सांवत्सरिकैकोद्दिष्टश्रा
द्धमहं करिष्ये इत्येवं संकल्पोन्याप्यः प्रेतश्राद्धरूपैकोद्दिष्टविशेषः तत्रप्रेतत्वाविमुक्तिहेतु षोडशश्राद्धांत
र्गतैकादशाहश्राद्धमहं करिष्ये इत्येवं सुगतिसोपानेवाक्यं तत्रयत्नं अहाशौचांतद्वितीयदिने एकादशाह १०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पदस्यानन्वयानूनचाशौचांतेद्वितीयदिनश्राद्धस्यनामैवेदंपारिभाषितं तथाऽविधानात् नचैकादशाहप
दस्याशौचांतद्वितीयदिनोपलक्षकत्तपाऽशौचांतेद्वितीयदिनोपस्थापकत्मेकैकादशाहपदंमुख्यश
ब्दसंभवेपौरुषेयेवाक्येउपलक्षकशब्दप्रयोगस्याऽन्याय्यत्वात् स्वार्थेतेपदप्रयोगेकिमित्यवाचकं
पदंप्रयोक्ष्याद्यन्यभिधानात् नचागमएवैकादशाहपदेनाशौचांतेद्वितीयदिनश्राद्धमुपलक्षितमिति
तत्पदप्रयोगस्यस्वायत्तत्वाभावइतिवाच्यंतेनतप्रकारेणस्मृतिष्वश्रवणात् तस्मात्प्रेतत्वविमुक्तिहेतु
षोडशश्राद्धांतर्गताद्यश्राद्धमहंकरिष्ये इतिसंकल्पोयुक्तः तथाहिद्वादशप्रतिमास्यानिआद्यषाण्मा
सिकेतथासपिंडीकरणंचेतिप्रेतश्राद्धानिषोडशेतिषोडशश्राद्धानामाद्यादिनामकथनं ततश्चैतेषुम
ध्येकिंकुत्रविधातव्यमित्यपेक्षायामाद्यमेकादशेहनीत्यशौचांतद्वितीयदिनमाद्यश्राद्धाधिकरणत्वे
नविदधातितथाचाद्यपदेनैवसंकल्पःकर्तव्यःसर्वाशौचांतद्वितीयदिनेमुख्यशब्दोपस्थितत्वेनाद्यस्य
योग्यत्वात् षोडशश्राद्धगणनायामाद्यशब्देनकीर्तनान्मूलवाक्योल्लिखितप्रकारेणैवकीर्तनंलौकिक
वाक्येपियुज्यते अन्यथायाहच्छिकतत्तदर्थोपस्थापकशब्दशपरिग्रहेसर्वत्रागमप्रतिपादितार्थोप
स्थितावनियमप्रसंगः नन्वेवमूनषाण्मासिकोनवार्षिकपदेनसंकल्पवाक्येषाण्मासिकद्वयकीर्त
नंसंगच्छतेमूलवाक्येषाण्मासिकपदेनोत्कीर्तनतोतत्पदोत्कीर्तनस्यैवप्रयुक्तत्वात् इतिचेन्नषाण्मा
सिकेतथेतिसंक्षेपेणतयोरेवाभिधानात् अदृष्टशब्देनधर्माधर्माभिधानवत् तथाचमुख्यशब्दत्वात् ११

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रा. नषण्मासिकोनवार्षिकपदेनोत्कीर्त्तनं संगतं अनेनैवाशयेनैतयोरेवोनषण्मासिकोनवार्षिकत्वेन प्रसिद्धिरि
वि. तिविवरणं ज्ञानं पितृभक्तौ श्रीदत्तोपाध्यायैः अत एव द्वादश प्रतिमास्यानीतिमूलवाक्येन प्रथममासिका
१२ दीनि प्रथममासिकादिपदेनैव संकल्पः सर्वेषां निर्विवादः प्रथममासिकादिप्रयोगवाक्यं निर्विवादं
सपिंडीकरणे पिवाक्ये विवादाभावः अथ जलसंयोजने पिंसंयोजने च विवादः तत्र केचिद्विभागे संयोजने
च मंत्रान्वयं कुर्वंति केचित्संयोजनमात्रे तत्रोभयत्र मंत्रान्वयः क्रियते इति युक्तः पक्षः तथाहि प्रेतपात्रं
पितृपात्रेष्वासिंचति ये समाना इति द्वाभ्यामेतेनैव पिंडो व्याख्यात इति कात्यायनसूत्रेण संयोजने मंत्रा
न्वयो बोध्यते निरुप्य चतुरः पिंडान् श्राद्धदः प्रतिनामतः ये समाना इति द्वाभ्यामाद्यं तु विभजेत्त्रिधाएव
एव विधिः पूर्वमर्घपात्रचतुष्टये इति वाक्ये न विभागे मंत्रान्वयो बोध्यते अत उभयत्र मंत्रान्वयः प्रामाणिक
न च कात्यायनसूत्रे अत्र संयोजनमात्रान्वयबलेन विभजेदित्यस्य मुख्यार्थत्यागो युक्तः निरपेक्षश्रुतवा
क्ययोस्तुल्यबलतया बाध्यबाधकभावाभावे भिन्नविषयतायां विरोधाभावेनैकस्यापि वाक्यस्य पदमु
ख्यार्थत्याजने सामर्थ्यात् अन्यथा निरुप्येति वाक्यश्रुतविभागान्वयबलेन कात्यायनसूत्रे आप्लावसेचन
पदस्यैवार्थांतरकल्पना किं न स्यात् विनिगमनाविरहात् प्रत्युत एकस्य द्रव्यत्रयेण क्रमेण समं संयोजने
विभागस्यावश्यकत्वाद्विभागप्राप्तौ तत्रापि मंत्रपिपासायामुपस्थितमंत्रान्वयस्य योग्यत्वाद्विभागे मंत्रा
न्वयो युक्तः तत्र चैकविनियोगप्रयुक्तत्वान्मंत्रयोरादावेव प्रणवोच्चारणं न मध्येयीति अ १२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्राक्षय्योदकदानवाक्ये श्राद्धविशेषणत्वेनोपात्तानां षष्ठ्यंतानां पदानां दानोद्देश्यभूताभिधायकानां
च षष्ठ्यंतानां पदानां प्रयोगयोर्वैपरीत्येऽनियमो दृश्यते तत्रोभयत्राप्यन्वयप्रतीतेरेव कल्प्यान्फलतो न विशेषः
एवं दक्षिणादानवाक्येऽपि आभ्युदयिकसंकल्पवाक्येऽपि विवादः नांदीमुखे विवाहे च प्रपितामहपूर्वकं
वाक्यमुच्चारयेन्मात्रो अन्यत्रापि पितृपूर्वकमिति पद्यमस्ति प्रपितामहानुपूर्वो वाक्यकरणे प्रमाणं तथाप्युप
देशानुरोधात्पितृपूर्वकमेव वाक्यं क्रियते तत्रोपदेश एव बहुप्रामाणिकानुमतः शरणं वस्तुतः प्रपिताम
हपूर्वकं वाक्यं युक्तं अत्रापि त्रायार्थे पात्रेषु यवप्रक्षेपे विवादः तत्र तिलप्रक्षेपमंत्रातिदेशेन यवादिपद
प्रक्षेपेण पाठ इत्यभिमानो बीजं वस्तुतोऽतिदेशे न प्रमाणं हलायुधनिबंधमुख्यन एवमेवास्य
मंत्रस्योपदेशादिति तत्र यवोसि सोमदेवत्यो गोसवो देवनिर्मितः प्रत्नमद्भिः पृक्तः पुष्ट्या
नांदीमुख्याल्लोकान्प्रीणहिनः स्वाहेत्यस्मत्संप्रदाये पाठः स च हलायुधनिबंधे तथैवमं
त्रस्य लेखनादुपदेशस्य परंपराप्राप्तत्वेन स्थैर्याच्च तथैव युक्तः प्राचीनापितृभक्तिश्राद्धकल्पा
दिग्रंथेषु तथैव लेखनाच्च केषुचिद्ग्रंथेष्वग्रे शोधयित्वा नांदीमुखान् पितॄन् लोकान् प्री
णहिनः स्वाहेति पितॄनिति पदमधिकं दत्तमस्ति तदधिकमेवेति अत्र भूस्वाम्यन्नदानेऽपि दै
वविधिं कुर्वंति तन्नयुक्तं तस्याभ्युदयिकबहिर्भूतत्वेन दैवविधौ प्रमाणाभावात् तथा च पित्र्य
विधिनैव युक्तं इति अत्र नांदीमुखाः पितरः प्रीयंतामित्यक्षय्यस्थाने इति कात्यायनसूत्रे तत्रान्यत्र कथितं १३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तद्वारणार्थमक्षय्यपदवारणार्थं प्रथमान्तपदेन निर्देशः पितरः प्रीयन्तामिति चोक्तं एतदेव वाक्यमत्र प्र
योक्तव्यमिति केचित् असत्संप्रदायेतु श्राद्धान्तरवत्प्रत्येकोद्देश्यतायां बाधकाभावात् वाक्यस्य षष्ठ्यन्त
पदाक्षय्यपदप्रयोगनिवारणार्थत्वेन चरितार्थत्वात् अमुकगोत्रामाताऽमुकदेवी नांदीमुखी दत्तैतदन्न
पानाभिः प्रीयतामिति वाक्यं क्रियते अत्र वैदिकमंत्रेष्वपि नांदीमुखपदं योजयित्वा पठंति अत्र नांदी
मुखाः पितरो मादयध्वम् नमो वो नांदीमुखाः पितरो रसायेत्यादिक्रमेण तन्न युक्तम् मंत्रे पितृंश्चाजन
स्याप्रामाणिकत्वात् लौकिकवाक्येष्वेव नांदीमुखान् पितॄनहमावाहयिष्ये इत्यादिना प्रकारेण प्रतिपदं
स्वतंत्रे नांदीमुखपदयोजनात् नित्यश्राद्धेपि गोत्रसंबंधिपदानामुच्चारणपूर्वकमेव वाक्यं पितृभक्तावधि
तथैव लिखितं अत्र केचिद्दक्षिणादानं न कुर्वंति तन्न युक्तम् हतं यज्ञमदक्षिणमिति वाक्येन द
क्षिणाया आवश्यकर्तव्यत्वेन बोधनात् यज्ञपदेन तत्र श्राद्धस्याभिधानात् प्रकरणात् न च नित्यं
श्राद्धमदैवं स्याद्दक्षिणापिण्डवर्जितमिति वाक्येन विशेष दक्षिणानिषेधः अकरणेऽनिष्टश्रव
णस्यान्यथास्थापयितुमशक्यत्वात् दक्षिणापिंडवर्जितमिति वाक्येऽन्वयस्यान्यथाप्युपपत्ते
पत्तेः सामान्यतः प्राप्तदक्षिणाविधेर्बाधकत्वाभावात् तथाहि श्राद्धपल्लवे व्याख्यातं नित्यं श्रा
द्धमदैवतं स्यात् दर्भपिंडविवर्जितं च दक्षिणा देयेत्याक्षिप्यते तेन तत्र नित्यश्राद्धे दक्षिणा देये
त्यर्थः इत्येवं स्कंदपुराणादिवाक्यमपीदृशमन्यथा योजयितुं सुकरम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बाधकवाक्यमनन्यथासिद्धमिति अत एव पितृभक्त्यादावपात्रकानित्यश्राद्धप्रयोगलेखने पितृभ्यो यथाशक्ति
दक्षिणां दद्यादिति सिद्धवद्दक्षिणादानं लिखितं नित्यं श्राद्धमदैवं स्यादर्घ्यपिंडविवर्जितमिति वाक्यं लि
खितं तेन दक्षिणानिषेधपरं कापि नावतारितं नित्यश्राद्धाभिधायकं वाक्यमवतीर्णं तत्र चार्घ्यपिंडावा
हन विश्वेदेवश्राद्धानि निषिद्धानि पूर्वदिन नियम श्राद्धदिन नियमाग्नौकरण श्राद्धोत्तरकर्मज्ञाति
भोजनान्याचारान्निवर्तन्ते इति च निषिद्धपरिगणने दक्षिणा न गणिता पितृभक्तौ स्मृतिसारादावपि द
क्षिणादानं कर्तव्यमिति लिखितं अतो मीमांसकानामप्यपात्रकेपि नित्यश्राद्धे दक्षिणादानसंप्रतिप
त्त्या निर्विकल्पिकं दक्षिणादानं तीर्थश्राद्धे तु विशेषः तथा आममात्रेणैव कर्तव्यमर्घ्यावाहनवर्जितमिति तथा
च देवीपुराणे तीर्थेषु ब्राह्मणं नैव परीक्षेत कदाचन अन्नार्थिनमनुप्राप्तं भोजयेत्तमनुब्रवीत् सक्तुभिः पिंडदानं
च संयावैः पायसेन वा कर्तव्यमृषिभिर्दिष्टं पिण्याकेन गुडेन वा देयं तु तिलपिण्याकं शक्तिमद्भिर्नरैः सदा श्राद्धं तु
तत्र कर्तव्यमर्घ्यावाहनवर्जितं श्वध्वाङ्क्षगृध्रकानां नैव दृष्टिहतं च यत् श्राद्धं तु तैर्थिकं प्रोक्तं पितॄणां तृप्तिकारकं
अकालेप्यथवाकाले तीर्थश्राद्धं तथा नरैः प्राप्तैरेव सदा कार्यं कर्तव्यं पितृतर्पणं पिंडदानं ततः शस्तं पितॄणां चा
तिवल्लभं विलंबो नात्र कर्तव्यो न च विघ्नं समाचरेत् संयावो यवगोक्षीरगोधूमसाधितो भोज्यविशेषश्च
पिण्याकस्तिलखलिः पुनस्तिलपिण्याकपदं तिलमात्रविधायकमिति पितृभक्तिः अकाले विहितामावास्या
द्यतिरिक्तेपि न तु निषिद्धेपि निषेधविधानविरोधात् न च निषेधग्रहणादतिरिक्तविषयः सामान्यबाधकाभावात्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रा· नचैतदेव वाक्यं वाधकं एतस्यान्यथोपपादनादिति एवमेव पितृभक्तिः पिंडदानमुखेन प्रधानश्राद्धवि
वि· धानमेव तत्र तत इत्यर्थकं स्तेयं श्राद्धं तु तत्र कर्त्तव्यमिति स्वयमेवाभिधानात् पिंडदानं ततः शास्त्रमिति तीर्थे
१६ केवलपिंडदानमपि कर्त्तव्यमिति बोधितं शास्त्रैरेव सदार्थमित्यनेन विलंबो नास्ति कर्त्तव्य इत्यनेन च तीर्थे का
श्राद्धे तथा कर्त्तव्यं यथा तीर्थप्राप्त्यनंतरराज्यादिनिषिद्धकालांतरसंयोगो न भवति किंतु तीर्थश्राद्धक्रि
यानुगुणस्नानसंध्यातर्पणदेवपूजानंतरमेव श्राद्धक्रिया क्रियते इति बोध्यते तदनुगुणातिरिक्तस्वाध्या
याचरणेन विलंबसंभवात् अतो दिनांतरे तीर्थप्रवेशे रात्र्यादौ कृत्वा दिनांतरे श्राद्धं क्रियत इत्युक्तं तदिदं तीर्थे
श्राद्धमामन्नेनैव कर्त्तव्यं आपद्यनग्नौ तीर्थे च चंद्रसूर्यग्रहे तथा आमश्राद्धं द्विजैः कार्यं शूद्रेणानुसंदेवहीति
वाक्येन द्विजानामपि तीर्थे आमान्नश्राद्धविधानात् अत्रापदीति आत्मनो देशकालादीनां चोपप्लवाव
स्था कथितास्तेन स्वाशक्तौ देशकालोपप्लवे पाकक्रियया श्राद्धासंभवे तदा आमश्राद्धं कर्त्तव्यमित्यर्थः
अनग्नाविति पाकयोग्याग्निरहित इत्यर्थः न त्वनग्नौ श्रौतस्मार्ताग्निरहिते इत्यर्थः अनग्निमतामपि
ब्राह्मणानां सांवत्सरिकादौ सिद्धान्नश्राद्धाचरणस्य सर्वप्रमाणिकसमन्वात् आमश्राद्धे पिंडादिक
मपि आमान्नेनैव कर्त्तव्यम् यदाह जाबालिः आमश्राद्धप्रदोऽनग्निः सर्वत्रैव मनीषिणः येना
ग्नौ करणं कुर्यात्पिंडांस्तेनैव निर्वपेदिति अत्राप्यनग्निः पाकयोग्याग्निरहित इत्यर्थः काम्यश्रा
द्धमामान्नेन न कर्त्तव्यम् तथाह लघुहारीतः श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्त्तितं अमावास्यादिनियतं मा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ससंवत्सराद्दते इति अत्रानियतभावश्यकामित्यर्थः तेनावश्यके अमावास्यादिश्राद्धे ऽन्याद्यभावे आ
मान्नविधिः नकाम्ये आवश्यके त्रिमासिकसांवत्सरिकादावेकोदिष्टे नामान्नविधिमाससंवत्सराद्दते
इतिवचनात् एकोदिष्टंतु कर्तव्यं पाकेनैव सदा स्वयमिति सिद्धांतस्यैव वाक्यांतरेणापि नियमतो विधाना
त् पाकासंपत्तौ च सएवाह अभावे पाकपात्राणां तद्दहः समुपोषणमिति शूद्रेण सर्वं श्राद्धमामान्नेनैव वच
कर्तव्यं शूद्रेण तु सदैव हि जिवावचनात् आमश्राद्धं मासादि व्यंजनान्यमान्य वहेयानीति श्राद्धपल्लवः भुज
बलभीमे अपत्नीक प्रवासी च यस्य भार्या रजस्वला आमश्राद्धं द्विजैः कार्यं शूद्रेण तु सदैव हीति अथदं
पति पूजनविवचनं तत्र संपूजदंपत्यं नानाभरणभूषणैः वृषोत्सर्गं च कुर्वीत देया च कपिला शुभेति वाक्यं
अत्र नानाभरणभूषणैरिति भूषणपदं क्रियापरं न पुनरुक्तिः अत्र संपूज्य तिल्का श्रवणात् वृषोत्सर्गांगं दंपतिपूजनमि
त्याहुः तत्र विनिगमनाभावो भयस्यापि प्रधानत्वात् समानकर्तृकताबोधनमात्रेण क्त्वाश्रुतेरित्युपपत्तेरि
ति दंपतिपूजनस्य प्रधानत्वात् वृषोत्सर्गाकरणेपि दंपतिपूजनयुक्तम् अथ वृषोत्सर्गे निर्वचनम् त
त्र वृषस्तरुणो वत्सतर्प्य श्चात्रिहायिन्यः चरणानि मुखं पुच्छं यस्य श्वेतानि गोपते लाक्षारस सव
र्णाश्च तं नील इति निर्दिशेत् एवं विधवृषाभावे न्योवृषभोयो यस्यो पदिय स्तमाह वर्णत स्ताम्र
कपिलो ब्राह्मणस्य प्रशस्यते स्निग्धरक्तेन वर्णेन क्षत्रियस्य प्रशस्यते कांचनाभेन वैश्यस्य कृ
ष्णेनाप्यंत्यजन्मनः अत्र वृषोत्सर्गस्य वैदिक बहुमंत्रसाध्यतया वेदोच्चारणानधिकृतस्य शूद्रस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वृषोत्सर्गेऽनधिकारस्तत्रोक्तस्तेनाप्यन्त्यजन्मन इति शूद्रं प्रति निष्ठय विशेषोपदेशेन वेदोच्चारणेऽधिकारबोधना
त् वृषोत्सर्गेऽधिकारो बोध्यते वेदोच्चारणेन विना तत्करणक वृषोत्सर्गे नधिकारे वृष विशेष कथनानर्थ
क्यापत्तेः तस्मात् वृषविशेषोपदेशान्यथानुपपत्त्या शूद्रस्यापि वृषोत्सर्गेऽधिकार कथ्यते तत्रापि त
यैवोत्सृजेरन्निति वृषोत्सर्गे वैदिकवाक्य करणत्व नियमविधानात्तेन विनोत्सर्गस्यानुपपत्तेरन्यथानुप
पत्त्यापि शून्यस्य वृषोत्सर्गवाक्य एव वेदपाठो नान्यत्रेति सर्वं प्रमाणाणि। कसिद्धम् शूद्रतुल्यतामापन्नयाः मन्त्र
रहितायाः स्त्रिया अपि वृषोत्सर्गेऽधिकार इति केचित् तन्न शूद्रवत् स्त्रिया अप्यधिकारबोधने प्रमाणाभावात् नहि
तस्या अधिकारबोधनं विना कस्यचिद्वाक्यस्यानुपपत्तिः सामान्यविधेर्विशेषवचनेनैव बाधः बाधकस्य बानु
पपत्तिमूलकत्वात् यावदन्यबाधितेऽनुपपत्ति प्रतिशमो न भवति तावदेव बाध्यते तेन चात्र सामान्यविधि
प्रवृत्तौ काचिदनुपपत्तिरिति न तस्या अधिकारः एवमनुपनीतस्य त्रैवर्णिकस्य वेद शून्यतया वृषोत्स
र्गे नाधिकारः वृषोत्सर्गकालश्च अशौचान्त द्वितीय दिने कार्त्तिकी चैत्री रेवती युताश्विन पूर्णिमा च
तत्र कार्त्तिक्यां वृषोत्सर्गात् पूर्वं मयूपदानमधिकम् अशौचान्त द्वितीय दिने वृषोत्सर्गे आभ्युदयिका
भावः सपिण्डनानन्तरस्याभ्युदयिकेऽधिकारात् अत्राऽशानायस्वाहेत्यकारान्ताशानशब्दस्य चतुर्थ्यन्त
स्य सुगतिसोपाने लेखनम् अशनये स्वाहेति कारान्ताशनिशब्दस्य चतुर्थ्यन्तस्य पाठः प्रमाणसिद्धः तथा हि श्र
थवृषोत्सर्गे गोपक्षे न व्याख्यात इति पारस्करसूत्रे पूर्वोपदिष्टस्य गो यज्ञधर्मस्यातिदेशात् अग्विरुद्रशर्वपशुपत्युग्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शनिभवमहादेवेशानां देवानोपाय शाहुना तुपस्थितिः तत्राशनिशब्द इकारान्त एवोपदिष्टः तत्रापि
यजुर्वेदीयमाध्यंदिनी शाखा प्रमाणं तत्राहि रुन चत्वारिंशोऽध्याये अग्निर्ठ· हृदयेनशनिर्ठ· हृदयाग्रे
णपशुपतिङ्कं·त्स्न हृदयं न भवर्य्यं क्वार्शवेस्मनस्त्रा क्याभीशानम्मन्युनो महादेवमन्तःपर्शव्येनोग्रनन्देववंनि
ष्ठुनावशिष्ठहनुः शिङ्गीनिकोश्याभ्यामिति कांडिकायामग्न्यादिदेवतानां कथितानां योयज्ञे उपदेशस्तस्यां कांडि
कायामशनिशब्दस्येकारांतस्योपादानम् एतत्कांडिका शतपथेनसादशनिरसीति नामनिरुक्तिश्च पारस्कर
गृह्यसूत्रपद्धतिष अशनये स्वाहेति प्रयोगश्च प्रमाणम् अशनशब्दस्य कुत्राप्युपदेशसंभावनायामपि
एवमशनिशब्दस्य प्रामाणिकत्वप्रमितौ वृषोत्सर्गाहुतिषु अशनेरेव देवतात्वं नाशनशब्दस्येति
स्थितम् पिष्टकाइतिमंत्रेपि पाठद्वैतं नहिविचतार्थमर्थः पदानि च विविच्यते तत्र पूषा गा अन्वे(
तुनइत्यादिकोमंत्रः तत्र प्रथमादिन्या विशेषवाचकः पूषणशब्दः प्रथमैकवचनांतउपात्तः ततोगो
गोशब्दः पशुवाचको द्वितीयाबहुवचनांतउपात्तः ततइणगतावनुपूर्वो लोट् प्रथमपुरुषैकवच
नांतः ततः षष्ठीबहुवचनांतस्यास्मच्छब्दस्य नस्यादेशरूपन्न इति पुनः पूषणशब्दस्य तादृशस्येवो
पादानम् ततोरक्षपालन इत्यस्य लोट् प्रथमपुरुषैकवचनांतस्य प्रयोगः ततोऽर्वन्शब्दस्याश्ववाचक
स्य अर्वणस्त्रावनञ इति सूत्रेणतृत्वादेशो हृतेऽवं इतिद्वितीयाबहुवचनांतः ततः पूषणशब्दस्य तादृश
स्यैवोपादानं ततो वकारादेर्वाजशब्दस्यान्नवाचिनो द्वितीयैकवचनांतस्य रूपं तस्य च मोनुस्वा ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रक्षते यजुष्ठात्सकारे परतोऽनुस्वारोच्चारणं॥ ततः षंड् दान इत्यस्यानुबंधलोपे सत्वनत्वयोः कृतयो
स्सयादित्वादुप्रत्यये गुणे च लोट् प्रथमपुरुषैकवचनान्तस्य रूपं सनोत्विति ततोऽस्मच्छब्दस्य चतुर्थी
बहुवचनांतस्य रूपं न इति तदयमर्थः पूषा देवता नोऽस्माकं गाः पशून् अन्वेतु अनुगच्छतु प्रतिरक्ष
यत्विति यावत् पूषाऽर्वतोऽश्वान् रक्षतु पूषा वाजमन्नं नोऽस्मभ्यं सनोतु ददातु एवं पूषा गा अन्वेतु नः
पूषा रक्षत्वर्वतः पूषा वाजं सनोतु नः स्वाहेति व्यवस्थितो मंत्रः तत्र वृषभांकनेऽपि विवादः स च
सुगति सोपाने नैव निर्णीतः दक्षिणपार्श्वे चक्रोऽनुत्सजातीयपार्श्वे शूलेन च तिलेखनात् दक्षिणपार्श्व
स्य सजातीयत्वं दक्षिणपार्श्वमेव यज्ञागरूपं तस्य वामपार्श्वे इति यश्छागीयवामपादोपरिभाग एवा
यति पुरोभागवामपार्श्वे विवक्षायां तद्वामपार्श्वे इत्येव ब्रूयात् न तत्सजातीयेति पदमुपादद्यातिहिरण्य
वर्णो इत्यादिष्वपि वर्णविवेचनार्थाः प्रदृश्यन्ते हिरण्यवर्णा इति शुद्धोपलक्षणम् हिरण्यवर्णाः शुद्ध
वर्णाः शुचयः पवित्राः पावकाः पविपित्र्यः पूजयवने इत्येतस्य ण्वुलि भ्रकादेशे यपि पावकादीनां छंद
स्युपसंख्यानमित्यकारस्येत्वप्रतिषेधे रूपम् यासु अत्सुजात उत्पन्नः कश्यप इति ऋषिः यासु अप्सु इंद्रो मघ
वा यासु आपः अग्निर्विश्वान्सु गर्भं भ्रूणं दधिरे धृतवत्यः उ धान्न इत्यस्य लिटि आत्मनेपदे प्रथमपुरुषबहुवच
नरूपं सुवर्णाः शोभनवर्णाः ता आपः नोऽस्माकं सं सोनाः कल्याणप्रदा भवंतु यासां मध्ये राजा ईश्वरः वरुणः प्रचे २०
ताः याति गच्छति मध्ये नरो सत्यानृते जनानामवपश्यन् अवलोकयन् जनानां लोकानां हितीयार्थं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पूर्ववत्पासांअपांदेवास्त्रिदशाःदिविस्वर्गेक्षयंतिकुर्वंति क्षिहिंसाकरणेरित्यस्यरूपम्भक्षमदंती
यम् याआपः अंतरिक्षआकारो वहुधावहुभिःप्रकारैर्भवंतिसपद्यतेद्वितीयार्द्धपूर्ववत् शिवेनक
त्यापेनमामांचक्षुषानेत्रेणपश्यत अवलोकयतः आप इतिसंबोधनं शिवायाकल्याण्यातन्वामू
र्त्याउपस्पृशयतस्पृशस्पर्शने इत्यस्योपपूर्वस्यलोटोमध्यमपुरुषवहुवचनेरूपंत्वचसहजशरीराव
रणंमेममघृतश्चुतःसर्पिःश्चुतःघृतंश्चोततीतिश्चुतिरक्षरणेश्चुतिरइत्येतेअग्निमथातोर्यका
कारम्नून्यस्यक्विपिप्रथमावहुवचनेरूपंशुचयःयाआपःपावकाःपावपित्र्यःतान् इत्यादिपूर्ववत्श
न्नोदेवीरितिमन्त्रोनिर्विवादःवृषभाभिमंत्रणेमंत्रोव्याख्यायतेपितावत्सानामित्यादिपिताजनकःवत्स
वातुर्णकानांपतिःस्वामीजघ्न्यानांगवान् अर्जुन्यघ्न्यागौरित्यमरःअथोइत्योकारांतोनिपातःसमुच्चयेपि
ताजनकःमहतांवृहतांगर्गराणांनरुणपश्रूनांगर्गराणामितित्यनिगरणेइत्यस्यपचाद्यचिउणदयोवहु
लमितिवहुलवचनमध्यासेरुगागमःगर्गरइत्यस्यषष्ठीवहुवचनरूपम्वत्सःतर्णकःप्रथमांतःसाहि
त्विकाउकाःजरायुगर्भवेष्टनचर्मपुटःस्यान्नपुंसकःप्रथमैकवचननंप्रतिधुकइहनधारणेप्रति
पूर्वस्तस्मात्क्विपिप्रथमैकवचनम्भावेघत्वेचर्त्वेचरूपम्पीयूषनियेपूषोभिनवपयःतस्यक्षादसुत्वादे
कारस्येत्वंपीयूषःयद्वापीयूषमिवामृतमिवपूष्पस्तस्यात्प्रथमैकवचनेसोप्रत्वपलोपौआमिक्षासा
रःकषसंयोगोऽपटोवनः घृतंसर्पिःतदिति कृद्यान्नपुंसकप्रथमैकवचनम् नद २१

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कुर्य्यादित्यर्थः संपद्यते ततः अपितृहीनरूपितपित्रादिबोधनात् तन्निरूपितमात्रादिमातामहादयोऽपि
लभ्यन्ते तस्येतिपदेन पितुरुपस्थानात् तत्संबंधशब्दत्वेन पुत्रस्योपस्थितौ नैव कर्तव्यसंस्कारेणपित्रादि
निरूपणं न तु माणवकपित्रा अत एकत्र तेन न निरूपणं मात्रादिपदके मातामहादिपदके च अपितृहीन
नपुत्रेणैव रूपणं तस्योपस्थितत्वात् निरूपकान्तराकांक्षानिवृत्तेरुपस्थापकाभावो चेति तथा च त
न्माणवकमातृपितामहीप्रपितामहीनां नांदीमुखीनां माणवकपितृपितामहप्रपितामहानां नांदीमुखा
नां माणवकमातामहप्रमातामहवृद्धप्रमातामहानां नांदीमुखानां माणवकनामकरणनिमित्तकमाभ्युद
यिकश्राद्धमहं करिष्ये इति नामगोत्राद्युच्चारणपूर्वकं तद्वाक्यं कर्तव्यं भवति एषचार्थः श्रीदत्तोपाध्याय
संमतः तथाहि पितृभक्तिश्राद्धकल्पग्रंथे लिखितं अपुत्रस्य सपिंडनां नरं कुत्र श्राद्धभाजिरित्युक्तान्तदीयक
न्याविवाहेश्राभ्युदयिकश्राद्धे तत् प्राप्नोतीति तथाच कन्ययैव तत्र पित्रादिरूपणं न तु कन्यापित्रापित्रादिनि
रूपणमिति निस्फुटपत्र नु पितुरभावो नास्तिक्षतादिना तस्याकर्तृत्वे तन्मतिनिषिद्धत्वेन तत्पुत्रनामादि कर्ता यो
भवति स माणवकपितुर्मात्रादिपित्रादिमातामहानां श्राद्धं कुर्यात् तस्याभावे तु तत्क्रमादिति वाक्य
स्य तत्रानुपस्थिते तथाच माणवकपितुर्मातृपितामहीप्रपितामहीनां नांदीमुखानां माणवकपि
तुः पितृपितामहप्रपितामहानां नांदीमुखानां माणवकपितुर्मातामहप्रमातामहवृद्धप्र
मातामहानां नांदीमुखानां माणवकनामकरणनिमित्तकमाभ्युदयिकश्रा ॥ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्धमहंकरिष्ये इतिनामगोत्राद्युच्चारणपूर्वकं वाक्यं कर्तव्यम् एवं च पितुरप्येवं सर्वत्र माणवकेनैव निरू
पणम् माणवकपितरि जीवति माणवकपितृनिरूपिता एव मात्रादिपित्रादिमातामहादय इति निस्त
रंगम् अशौचांत द्वितीयदिने प्रथमं प्रेतत्वविमुक्तिकाम अद्यादियथाकालं षोडशश्राद्धमहंकरिष्ये इति
प्रथमः संकल्पः तत्र प्रेतत्वविमुक्ति हेतु षोडशश्राद्धान्तर्गताद्य श्राद्धमहंकरिष्ये इति द्वितीयः संकल्पः
यत्र तु एकादशमासाभ्यंतरेऽधिमासपातस्तत्र प्रेतत्वविमुक्तिकाम आद्यादियथाकालं सप्तदशश्राद्धान्य
हंकरिष्ये इति प्रथमः संकल्पः अत्र च संवत्सराभ्यंतरे यद्यधिमासपातो भवति तदा मासिकार्थं दिनमेकं व
र्द्धयेत् द्वितीयद्विस्वाक्यं प्रमाणं सप्तदशश्राद्धकरणे तथा द्विमासिकश्राद्धादिकरणेन त्वधिकदिनमेकं त
द्वाक्यं बोधयति तेनाधिकं सप्तदश श्राद्धं बोधयति तेनैकादशाहानंतरं सप्त द्वादशाहादिदिने द्वादशमासि
कानि कृत्वा त्रयोदशेऽन्हि सपिंडनं कुर्यादिति विधिः तत्रैवाधिमासंभवे एकादिनश्राद्धवृद्ध्या त्रयोदशभि
र्दिनैस्त्रयोदशमासिकानि कृत्वा चतुर्दशेऽन्हि सपिंडनं कुर्यादिति पर्यवसितार्थो भवति एवं च एकाद
शमासाभ्यंतरेऽधिमासपाते सप्तदश श्राद्धानि कर्तव्यानि न्यायायाति तथा च मुख्यपक्षे वर्षे संपिंडने
मासक्रमेणैव त्रयोदशमासिकानि स्मरणतिथि सजातीयतिथौ कर्तव्यानीति एकाहोनषाण्मा
सिके ऊनमासिकम् एकाहोनवर्षे ऊनवार्षिकं श्राद्धं कर्तव्यं द्वादशादिने सपिंडेन प्रथममासिक द्विती २५
य मासिक तृतीयमासिक चतुर्थमासिक पंचममासिक सप्तममासिक अष्टममासिक नवममासिक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रा०नि २६ दशममासिके एकादशमासिकं द्वादशमासिको नवार्षिकं त्रयोदशमासिकानि अनुक्रमेण एकस्मिन्दिने कर्त्तव्या
नि त्रिपक्षे सपिंडने मासे प्रथममासिकं कृत्वा त्रिपक्षपूरणपूर्वदिने द्वितीयमासिकादित्रयोदशमासिकपर्य
न्तानि द्वादशमासिकानि कर्त्तव्यानि त्रिपक्षपूरकमरणतिथिसजातीयतिथौ मासपिंडनदिने एक सर्वाणि क
र्त्तव्यानि षष्ठमासे सपिंडनपक्षे पंचसु मासेषु पंचमासिकानि मरणतिथौ सजातीयतिथौ कृत्वा षाण्मासिक
पूरणपूर्वदिने ऊनषाण्मासिकादीनि दशमासिकानि कर्त्तव्यानि षष्ठमासपूरकमरणतिथिसजातीयतिथौ
सपिंडनदिने एव वा ऊनषाण्मासिकादीनि कर्त्तव्यानि नवममासि सपिंडने षट्सु मासेषु षष्ठमासिकानि कर्त्तव्या
नि एकोहानषाण्मासिके ऊनषाण्मासिकं कर्त्तव्यं नवममासपूरणपूर्वदिने नवममासिकादीनि राज्याद्युप
द्रवषण्मासिकानि कर्त्तव्यानि नवममासपूरणमरणतिथिसजातीयतिथौ सपिंडनदिन एव वा कर्त्तव्यानि
एकादशाहानंतरं दिने रार्कैकमासिकश्राद्धकरणे त्रयोदशसु दिनेषु त्रयोदशमासकानि कर्त्तव्यानि ष
ष्ठे दिने मासिकद्वयं ऊनषाण्मासिकं षष्ठमासिकं च कर्त्तव्यं त्रयोदशे दिने मासिकद्वयमूनवार्षिकं त्रयो
दशमासिकं च कर्त्तव्यं चतुर्दशे दिने सपिंडनं शूद्रेण तु त्रयोदश दिने एव सपिंडनं कर्त्तव्यमिति विशेषः
अथ च त्रिपक्षादौ सपिंडनपक्षे प्रथममासादौ यदि त्वाशौचमापतति तदाशौचापगमे मासिकं कृत्वा
ग्रिममासादौ प्रक्रांतक्रमेण मासिकं कर्त्तव्यं सूतकं यद्यापतति तदा सूतकान्ते मासिकं कृत्वा ऽग्रे प्रक्रांत
क्रमेण मासिकं कर्त्तव्यम् यदि राष्ट्राद्युपद्रवरूपविघ्नेन दिनविस्मरणदिना वासया ह्यज्ञानेन वा २६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ह्नानेनश्राद्धंकर्त्तव्यं तदाएकादश्यांपतितमासिकानि कृत्वाऽग्ने प्रकृत क्रमेणमासिकंकर्त्तव्यंमासिकस्यै
कोद्दिष्टरूपत्वात् एकोद्दिष्टस्यचकर्त्तव्यतायांश्राद्धंविघ्नेसमुत्पन्नेक्षयाहेविदितेनतया एकादश्यांप्रकुर्वीतकृ
ष्णपक्षेविशेषत इतिवाक्यंप्रमाणंस्नानाशौचयोरपीतदनंतरंकालकर्त्तव्यंवाधितमेकोद्दिष्टस्येति आगतिमासा
सिकेपतितंमासिकंक्रियते इतिजघन्यःपक्षः प्रमाणाभावात् केचित्तुप्रथममासिमासिकश्राद्धाकरणेऽ
पर्याप्ताथ्यंप्रतीतिवाक्येनमासद्वयांतेमासिकद्वयकर्त्तव्यं एवंप्रत्यृतुमासिकद्वयंकर्त्तव्यमित्यनेनैव न्याय
तत्रचवाक्यवलेनतृतीयऋतौपूर्वदिनेऊनषाण्मासिकमृत्यु पूर्तौपंचममासिकषष्ठमासिके कर्त्तव्य ए
वंचषष्ठऋतौपूर्वदिनेऊनवार्षिकंषष्ठऋतौ एकादशमासिकद्वादशमासिके कर्त्तव्येयत्रतु द्वादश एव
दिनेसपिंडनकर्त्तव्यतायांप्रथममासिकादौ कृतेऽशौचादिनासपिंडनवाधस्तत्रकृतमासिकादेरकिंचित्क
रत्वम् नहिनसपिंडनकृयोपाधिकतयासपिंडनासंभवे कृतमासिकानामयथाकालकृतत्वेनाकृत क
ल्पत्वात् एकाहादिकर्त्तव्यसपिंडनक्रियाकल्पेतुप्रथमगृहीतकल्पस्यानिर्वाहे कल्पांतरंनाश्रीयते इ
तिमतमनादेयंप्रेतत्वविमुक्तिहेतुत्वेन सपिंडनक्रियाया अवश्यकर्त्तव्यत्वेनवाधकल्पनायांतरानव
काशादिति अथावश्यकश्राद्धकालाः तत्र विष्णुः अमावास्यास्तिस्रोऽष्टकास्तिस्रोऽन्वष्टकामाघी
प्रोष्ठपद्यर्ध्वंकृष्णत्रयोदशीव्रीहियवपाकौचेति एतांस्तुश्राद्धकालान्वैनित्यान् आह प्रजापतिः श्राद्धमेतेष्व
कुर्वाणोनरकंप्रतिपद्यते अमावास्या इत्यनेनकेवल्याया अमावास्याया विधानादमावास्यामन्त्रैरग्निना २७

Kirtikant Sharma Collection, Najafgarh

श्रा० आवश्यकश्राद्धकाल इति प्रतिपादितं तेनाग्निमतामिदं क्षयो निमित्तांतरम् तत्र तेषामिदं क्षयापेक्षया तद्य
वि० वस्थापकानि बहूनि वाक्यानि तत्रोपयुक्तानि अमावास्यायां तु यस्मिन्दिने ऽपरान्हे ऽमावास्यालाभस्तस्मि
२८ न्नेव दिने श्राद्धं उभयदिने त्वपरान्हे ऽमावस्यालाभे प्रथमदिने श्राद्धं प्रथमप्राप्तत्यागस्यान्याय्यत्वात् उभय
दिने त्वपरान्हे ऽमावास्याया अलाभे उत्तरदिने मध्यान्हेपि श्राद्धं कर्तव्यं मुख्यकालालाभात् अविशेषान्मलमा
सामावास्यायामप्यावश्यकश्राद्धं कर्तव्यं तिस्रोऽष्टकादिति पौषमाघफाल्गुनकृष्णाष्टम्यः तासु चापूपमां
सशाकानि श्राद्धद्रव्याणि तत्रापूपस्यान्नरूपतया तस्यैव तृप्तिक्षमतया मुख्यत्वं मांसशाकयोस्तूपकरणत्वे
नान्वयो यथासंख्यमष्टकाद्वये मुख्यद्रव्यमोदनादिकमेव अत्र पारस्करगृह्यम् ऊर्द्ध्वमाग्रहायण्यास्तिस्रोऽष्ट
का ऐन्द्री वैश्वदेवी प्राजापत्या पित्र्याप्यपूपमांसशाकैर्यथासंख्यं अत्र तिसृषु यथासंख्यं पित्र्यापीत्यनेन चतुर्थी
अष्टकाभिधीयते तत्रापि शाकस्योपकरणं वर्षासु मध्येशाकेश्च चतुर्थ्यामेव सर्वदा वर्षासु मध्येऽपरपक्ष
स्य भाद्रकृष्णपक्षत्वात् तदष्टम्या वर्षामध्यत्वं शाकैरिति तस्यां ब्रह्मपुराणेन शाकोपकरणविधानात् एवं च
स्वातन्त्र्येण प्याश्विनकृष्णाष्टम्या अष्टकत्वेन श्राद्धविधानात्तस्मिन्पक्षे दिनांतरे श्राद्धासंभवेप्यष्टम्याः
स्वातंत्र्येण निमित्तत्वमिति प्रतिपादितम् अत एव च तस्याश्च अपूपमांसशाकासंपन्नो द्रव्यांतरेण पि
श्राद्धकरणं युक्तं श्राद्धस्य नित्यत्वादिति प्रतिभाति अन्वष्टकास्तु साग्नीनामावश्यकश्राद्धकाल अ
न्वष्टाश्राद्धविधाने साग्निकर्तृकत्वलिंगदर्शनादिति माघी मघायुक्ता माघे पूर्णिमा तत्रैव मा २८

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

घीशब्दस्यश्रुत्यनिसिद्धत्वात् अत्रान्वष्टकास्तिस्त्रः साग्नीनामावश्यकश्राद्धकालः अपरः साग्निनिरग्नि
साधारण आवश्यकश्राद्धकालः प्रोष्ठपद्यूर्द्ध्वकृष्णत्रयोदशी अपरपक्षीया एतद्विता ऽऽश्विनकृष्णपक्षेऽस्यै
वनित्यकालत्वेनतत्र्यादिनांतरेशौचादिना श्राद्धबाधेपित्रयोदश्याममावस्यायां श्राद्धकरणमित्युक्तंभवतिव्री
हियवयाकोवेतिशरदिवसंतेचव्रीहियवाभ्यामावश्यकं श्राद्धंतत्र वचनवमव्रीहियवयोरसंपत्तौपुराणाभ्यांत
त्रश्राद्धंकर्त्तव्यंतदभावेद्रव्यांतरेणापि श्राद्धंकर्त्तमिति तथाचनवप्राशनकर्मप्रस्तावे गोभिलगृह्यभाष्येगृहंम
घोव्रीहियवाभ्यांशरद्वसंतयोर्यजेत् श्यामाकैर्वनीवर्षासु आपत्कालेऽन्येन पुराणैर्वेतिवचनात् अत्रवनीवान
प्रस्थद्रव्यर्थः यद्यप्यत्र यागेविधानंतथापि श्राद्धेपित्राकांक्षायास्तुल्यतयात्तदसंपत्तौपुराणव्रीहियवविधिस्य
द्रव्यविधिश्चोपतिष्ठतएव वसिष्ठः श्रावण्याग्रहायण्योरष्टकासुचपितृभ्योदद्यात् श्रावण्याग्रहायण्योश्च
णपूर्णिमामार्गशीर्षपूर्णिमे श्रवणमृगशिरोयुक्ते एतयोर्निरग्नीनामप्यावश्यकश्राद्धकरणं विशेषात्र
वणम् एतच्चश्राद्धकल्पे श्राद्धपंज्यांचसुव्यक्तम् अष्टकाः कथिता एवमनुः अश्वयुक्कृष्णपक्षेतु श्राद्धं
देयंदिनेदिने त्रिभागहीनंपक्षंवात्रिभागंत्वर्द्धमेववादिनेदिनेप्रतिदिनमित्यर्थः एवंचापरपक्षीय
दिनत्वेनाविधानात्तस्मिन्पक्षेदिनपुरस्कारेण श्राद्धस्यप्रतिदिनकर्त्तव्यत्वं बोधितम् तथाचापरप
क्षेसर्वेषुदिनेष्वपराह्णेकाले श्राद्धं कर्त्तव्यंतत्रनातितिथिविशेषजिज्ञासेति तिथिविशेषकथितं फलं
तत्रापिसंवत्से वश्राद्धस्यवस्तुतस्तुतिथ्यवच्छिन्नकालकत्वात् दिनपुरस्कारेणैव ॥ ॥ २९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्राद्धकरणे कन्यागतेसवितरि यान्यहानि तु षोडशक्रतुभिस्तानि तुल्यानिते षुदत्तमथाक्षयमिति वाक्ये ऽन्हां
षोडशत्वंसंगच्छते तिथिवृद्ध्या परपक्षस्यषोडशाहदिनात्मकत्वसंभवात् एवंच त्रयोदश्याममावास्यायांचाग्नि
मद्दिने ऽपरान्हकालालाभेपिनिषिद्धप्रातःमुहूर्त्तद्वयातिरिक्तकालेकृततदुभयतिथ्यवच्छिन्नकालश्राद्धता
पिकर्त्तॄश्राद्धंकर्त्तव्यं दिनत्वेनश्राद्धकरणपुरस्कारात्सर्वस्मिन् दिनेतत्पक्षनिमित्तकश्राद्धमायातीति दिने
दिने इत्यस्यतिथौतिथौइतिव्याख्याने प्रथमंदिनशब्दस्य मुख्यार्थत्यागः एकस्मिन्दिने श्राद्धयोग्यतिथि
द्वयप्राप्तौपार्वणद्वयप्रसंगः एकस्मिन्दिनेयस्यांतिथौ श्राद्धंकृतंतस्यांतिथौदिनांतरेश्राद्धकालव्याप्तौ श्रा
द्धानाचरणं ततिथ्यवच्छेदेनश्राद्धस्यकृतत्वात् एतदुभयंचनसर्वप्रामाणिकव्यवहारसिद्धमितिदिने
दिने इतिमुख्यशब्दार्थपरिग्रह एवयुक्तः त्रिभागहीनंपक्षमिति तृतीयभागहीनपक्षस्यविधानात्
तत्रपंचमीप्रभृतिश्राद्धविधानात् त्रिभागमिति तृतीयभागमारभ्यदशमीप्रभृतीत्यर्थः अर्द्धमेव
तिपक्षार्द्धविधानामष्टमीप्रभृतीत्यर्थः अत्रचपक्षेकल्पचतुष्टयेपिचतुर्दशीत्यागः पार्वणश्राद्धेकृ
ष्णपक्षेदशम्यादौ वर्जयित्वाचतुर्दशीं श्राद्धेप्रशस्तास्तिथयो यथैतानतथेतरा इतिमनुनाचतुर्दश्यांपार्व
णश्राद्धनिषेधात् त्रयोदशीश्राद्धेपियद्यपिनिंदाश्रूयतेतथापिनिंदायाः काम्यश्राद्धविषयत्वात् अ
श्वयुक्कृष्णपक्षीयदिनत्वप्राप्तस्यावश्यकत्वंतस्यनित्यत्वादिति त्रयोदशीश्राद्धंकर्त्तव्यमिति ॥
बहुप्रमाणिकव्यवस्थानेकृत्त्रयोदशीश्राद्धंपुत्रवान्यः सुतायुषे इत्यादिनिषेधवाक्यमतो ॥ ३०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लिकमिति रत्नाकरः चतुर्दश्यां शस्त्रादिहतस्यैकोद्दिष्टविधिना श्राद्धम् अत्र प्राणेऽनशनशस्त्राग्निविषोद्ब-
न्धनिना तथा चतुर्दश्यां श्राद्धं कर्तव्यं तत्प्रयोजनमिति निश्चय इत्यादिब्रह्मपुराणोदितवाक्येष्टरूपेण तन्निमित्तेन
मृतानां चतुर्दश्यां श्राद्धं कर्तव्यमिति तात्पर्यमाचारानुरोधात् तेन स्त्रिया अपि प्रसवेन मृताया अतुर्दश्या-
मेकोद्दिष्टं वायुपुराणे युवानस्तु गृहे ये मृतास्तेषां तु दापयेत् शस्त्रेण च हता ये वै तेषां दद्याच्चतुर्दशीम्
गृह इत्युपलक्षणं तेन युवदशायां यत्र कुत्रापि मृतानां पित्रादीनां श्राद्धं चतुर्दश्यां कर्तव्यं शस्त्रहतानां
च श्राद्धं कार्यमित्यर्थः युवमरणे तु युवदशामृतत्वमेव प्रयोजकं ननु रोगेण तरुणे पित्तमृतत्वं हेतुविशेषा-
नभिधानात् युवेतराणां रोगेतरनिमित्तत्वं प्रयोजकं अत एव युवेतरस्यानुपसर्गहेतुकमरणे चतुर्दश्यां न
श्राद्धं रोगनिमित्तमृतत्वात् एतच्च श्राद्धमेकोद्दिष्टविधिनाऽऽचारात् चतुर्दश्यां तु यच्छ्राद्धं सपिण्डीकरणे कृ-
ते तदेकोद्दिष्टविधिना कर्तव्यं शस्त्रघातिनामिति गौडवाक्यदर्शनाच्च शस्त्रघात एषामस्तीति शस्त्रघा-
तिनः शस्त्रादिहतास्तेषामित्यर्थः स्त्रीणामप्येतदेकोद्दिष्टं पुंस्त्वस्याविवक्षितत्वादिति अत्र च शस्त्रादि-
निमित्तमृतानां पूर्वमृतानां चतुर्दशीश्राद्धसमये बोधित इति शस्त्रघातादिना मृतस्येतद्दिने श्राद्धभा-
गित्वबोधनेन तात्पर्यात् एकोद्दिष्टश्राद्धसंकल्पवाक्ये तन्निमित्तकमरणोल्लेख्यो न प्रयोजकः वस्तुतः
सतामेव निमित्तानामेव चतुर्दशीश्राद्धनिमित्तत्वात् तथाचाऽद्याऽऽश्विनकृष्ण चतुर्दश्याममुकगो-
त्रस्य पितुरमुकशर्मण एकोद्दिष्टश्राद्धमहं करिष्ये इत्येवं संकल्पः कर्तव्यः युवानस्त्वत्र षोडशवर्ष ३१

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वयस्कमारभ्य त्रिंशद्दण्डपर्यंता विवक्षिता इति स्मार्तभट्टाचार्यनिर्बंधः अत्र पक्षे इति पदात्तिथिषु फ
लानि वचनानानाविधानि नानास्मृतिषु कथितानि तेषु पुरुषमात्रकार्यविषयकफलानि निरूप्य लिख्यं
न्ते यथा प्रतिपदि धनलाभो लब्धाविनाशो फलम् द्वितीयायां द्विपदाधिपत्यं तृतीयायां सर्वकामप्राप्तिः
चतुर्थ्यां यशः पंचम्यां महालक्ष्मीः षष्ठ्यां द्विजकर्तृकपूजनं सप्तम्यां गणाधिपत्यं अष्टम्यां संपूर्णा बुद्धिः नवम्यां
स्त्रीविषयकैश्वर्यम् दशम्यां बहुगोजातीयलाभः एकादश्यां बहुब्रह्मवर्चसिपुत्राः द्वादश्यां सुवर्णरज
तम् त्रयोदश्यां ज्ञातिश्रैष्ठ्यम् चतुर्दश्यां भूतिः अमावास्यायां प्रतिपदादितिथ्युक्तसर्वफलानि अत्र च नि
त्यत्वपुरस्कारेणापि सर्वदिने क्रियमाणश्राद्धेषु तत्तत्तिथिप्राप्तौ तत्फलप्राप्तिरपि भवतीति प्रतिभाति
संख्यावचनेस्यैव संख्यावदादिदेशकरणे कथितफलयोगात् गंगाली यदि कृतावश्यकश्राद्धवच्चेति
आश्विनकृष्णपक्षे केवलायास्त्रयोदश्याः पार्वणश्राद्धप्रतिनिमित्तमुक्तं विष्णुना प्रोष्ठपद्यूर्द्ध्वकृष्णत्र
योदशीत्यनेन केवलायां मघायां निमित्तत्वमुक्तं देवीपुराणे तत्रापि महती पूजा कर्त्तव्या पितृदैवते
ऋक्षे पिंडप्रदानं तु ज्येष्ठपुत्री विवर्जयेदित्यनेन पितृदैवऋक्षे मघायामित्यर्थः मघात्रयोदश्योर्मि
लितयोरपि निमित्तत्वमुक्तं बहुभिः तत्र शंखः प्रोष्ठः पद्यामतीतयां मघायुक्तां त्रयोदशीम् प्राप्य श्रा
द्धं हि कर्त्तव्यं मधुना पायसेन च श्रीमहाभारते अपि नः स कुले जायाद्यो नो दद्यात्त्रयोदशीम्
मघायां सर्पिषा युक्तं पायसं दक्षिणायने मनुः यत्किंचिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीं तदप् ३२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्षयमेववर्षास्वचमघासुचवशिष्ठ:पितामहश्चैवतथैवप्रपितामह:उपासतेसुतंप्राकुंताइवपिप्पल
म् मधुमांसैश्चशाकैश्चपयसापायसेनच एषनोदास्यतिश्राद्धंवर्षासुचमघासुच ब्रह्मपुराणे आश्वय
ज्यांतु कृष्णायांत्रयोदश्यांमघासुच प्रावृडतौ यमः प्रेतान् पितॄंश्चापियमालयात् विसर्जयंतिमानुष्ये
कृत्वाशून्यंस्वकंपुरंक्षुधार्त्ताकीर्त्तयन्तश्चदुष्कृतंतुस्वयंकृतं पायसंपुत्रपौत्रेभ्य: कांक्षंतोमधुसंयुक्तम् तस्मा
त्तांस्तत्रविधिनातर्पयेत्पायसेनचमध्वाज्यतिलमिश्रेणतथाशीतेनवांभसामासमात्रंपरमहाप्यकंयःप्रा
प्नुयान्नरःभिक्षामात्रेणयःप्राणसंधारयतिवास्वयम् योवासंवर्द्धयेद्देहंप्रत्यहंप्रत्यहंस्वात्मविक्रयात् श्राद्धं
तेनापिकर्त्तव्यंतैस्तैर्द्रव्यैःसुसंचितैः त्रयोदश्यांप्रयत्नेनवर्षासुमघासुच तस्मात्परतरःकालःश्राद्धेष्वन्यत्रवि
द्यतेपत्रसाहिपितरोगृह्णंत्यमृतमक्षयंआश्वयुज्यामितित्रयोदश्यामित्यस्यविशेषणंतास्वनकृष्णत्रयो
दश्यामित्यर्थः प्रावृडतौवर्षानीविन्यर्थःशुक्लादिमासरीत्याःपरपक्षस्यभद्रांतगतत्वा वर्षनत्वम् अत्रतत्र
द्रव्यविधानंश्राद्धस्यावश्यककर्त्तव्यत्वविधानंफलप्रकर्षविधानंचमघात्रयोदश्योर्मिलितयोःमिलित
योमघात्रयोदश्योःसूर्यस्यहस्तनक्षत्रावस्थितौतृतीयंनिमित्तंतस्यगजच्छायेतिनामतथाचब्रह्मपुराणेयोगो
मघात्रयोदश्योःकुंजरच्छायसंज्ञकःभवेन्मघायांसंस्थेचशशिन्यर्केकरेस्थिते तत्रचश्राद्धमावश्यकंतत्र
याज्ञवल्क्यःमेव्यतीपातोगजच्छायाग्रहणंचंद्रसूर्ययोःश्राद्धंप्रतिरुचिश्चैवश्राद्धकालाःप्रकीर्तिताव्यतीपा
तोज्योतिषप्रसिद्धः सूर्यचंद्रमसोः क्रांतिसाम्यसमयः पुण्यकालविशेषः अत्रच:८ ३३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गतच्छायायाश्चंद्रसूर्यग्रहणस्य चावश्यकश्राद्धकालत्वं अत्र केवलायां त्रयोदश्यां मिलितयोर्मघात्रयो
दश्योर्गजच्छायायां च सपुत्रापुत्रयोरप्यधिकारः पिंडवत्त्वेव श्राद्धे पुत्रिण आवश्यकश्राद्धानिषेधा
त् नैतत्त्रयोदशी श्राद्धं पुत्रवान्यः सुतायुषे इत्यादिनिषेधवाक्यं समौलिकमिति रत्नाकरलेख
नात् पुत्रवतोपि त्रयोदशी श्राद्धाधिकारः केवलायां मघायां पुत्रवता श्राद्धं पिंडरहितं कर्तव्यमिति
विशेषः गजच्छायायोगो यावत्कालं भवति ष्टत्ते तावत्कालपर्यंतं ब्राह्मणेन भोजनं न कर्तव्यं तथा
ब्रह्मपुराणे सूतके मृतके चापि ग्रस्तयोश्चंद्रसूर्ययोः छायायां कुंजरस्याथ भुक्त्वा तु नरकं व्रजेत् भुक्त्वा
प्रमादाद्विप्रस्तु सम्यक् चांद्रायणं चरेत् शाकच्छाये कुंजरस्य चेति याज्ञवल्क्यवाक्ये श्राद्धं शनिसिनीतर
मेवोक्तं पारस्करश्राद्धान्विनः आर्द्रं कुर्यात् शक्तिनापि नापरपक्षप्रतिकामे तप एतत्पक्षीयश्राद्धस्याक्ष
यफलत्वमपि तस्मिन्पक्षे कल्पचतुष्टये प्रथमपक्षाद्युपक्रमेण श्राद्धारंभे कृते तत्र विघ्ने वृते ऽग्निमत्क
ल्पानानुसरणे यदुक्तिमतमनादेयं नित्यत्वे कल्पांतरेवाथ कन्यायां तनवतारादिति एतस्मिन्पक्षे श्राद्धक
रणाभावे कार्तिकामावास्यावधिर्मितोप्यावश्यकश्राद्धं येयदीयान्विता राजन्ख्याता पंचदशी भुवि न
स्यादेयं नचेद्दत्तं पितॄणां तु महालय इति वाक्यात् महालये पितॄणां मुत्सवाश्रये ऽपरपक्षे इत्यर्थः शान्ता
तपः सर्वस्वेनापि कर्तव्यं श्राद्धं वै राहुदर्शने अकुर्वाणस्तु नश्याद्धं पंके गौरिव सीदतीति राहुदर्शनं न हि श्राद्ध
माचंकारकमिति नचोदकेन वान्नेन च गृहमाच्छादनेन तथा पितरः स्पृहयंत्यन्नमष्टकासु मघासु च मादद्यात्सुदायुक्तो वि ३४

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्सुद्रात्सरणेषुच नवोदक इति वर्षोपक्रमे जलसंभवे इत्यर्थः सदाचारादार्द्रानक्षत्रावस्थितसूर्यावच्छि
न्नसमयइत्यर्थः नवान्न इतिशरादेवसंतेच इति प्राचः गृहप्रच्छादन इतिगृहोपरितृणेनाच्छादनमेतत्या
र्वणश्राद्धनिमित्तं गृहप्रवेशस्त्वाभ्युदयिकश्राद्धनिमित्तंप्रवेशेनववेश्मन इतिवाक्येनविहितं तीर्थश्राद्धे
निनिमित्तकं पूर्वंकथितंअत्र चनवान्नभक्षणनिमित्तंच पार्वणश्राद्धस्यज्योतिषेप्रतिपादितं तत्रचपितृदे
वेभ्योऽदत्वानवान्नभक्षणं निषिद्धमितिनवान्नभक्षणंपूर्वकानिश्चावश्यकंश्राद्धंयद्यपिनवानि नानाविधान्य
न्नानिभवंतितथापिगृह्येनवान्नप्राशननिमित्तकनवान्नकर्मकथनेग्रंथभाष्येचगृह्यमेधीव्रीहियवाभ्यां
शरद्वसंतयोर्यजेत् श्यामाकैर्वनीवर्षासुइतिलिखितेन वाक्येन षष्टिकायवश्यामाकरूपान्नसमवका
लएवयिमितः तत्रैश्यामाकौत्यनिर्वानप्रस्थानांश्राद्धकालः गृहस्थानायवव्रीहिप्राशनंपरश्राद्धका
लः यद्यपिनवान्नप्राशनकर्मणिइष्टेर्विधानंतथाप्याकांक्षातुल्यतयाश्राद्धेपिद्भयमेव निमित्त
मितितत्रषष्टिकव्रीहिभक्षणनिमित्तंकं सरदियवान्नभक्षणनिमित्तकं वसंतेहेमंतेहेमंतेकनवा
न्नभक्षणनिमित्तम् ज्योतिषानुसारात् तथाहिज्योतिषेभोजराजः वृश्चिकेपूर्वभागेतुनवान्नंप्रा
शस्यतेबुधैः उत्तरैक्रियमाणंतुधनुष्येचकृतंभवेत् धनुषियत्कृतंश्राद्धेपितृणांवोपतिष्ठतेपूर्वभागोऽ
त्रावृश्चिकत्रयोदशांशकरूपकरस्यचारात् धनुषियत्कृतंश्राद्धंहैमनीषु निशासु चापितरस्तत्रतृ[illegible] प्नंति
नवान्नामिषकांक्षिणः मुक्तोपक्षेतवंध्यन्नंपर्वैस्ताव्रासुशोभनं सुनियौसुमुहूर्तेचनवा ॥ ॥ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न्नफलभक्षणं त्रिजन्मसु त्रयोदश्यां नंदायां पितृमोपि वा श्राद्धं सुक्तदिने नैव कार्यं संततिमिच्छता चैत्रपौषे
कृष्णपक्षे नवान्नं वर्जयेत्सदा भवेज्जन्मांतरे रोगी पितॄणां नोपतिष्ठते अत्र चैत्रपौषयोर्निषेधात् वृश्चिके
गवान्नभक्षणं संभवे माघादौ श्राद्धपूर्वकं नवान्नभक्षणं युज्यत एवेति चैत्रे नवान्नभक्षणनिषेधादर्या
दयकेऽपि नवान्नभक्षणनिमित्तं यवपाकात् पृथक् श्राद्धमायाति वायुपुराणे शुक्लपक्षस्य पूर्वाह्णे श्राद्धं
कुर्याद्विचक्षणः कृष्णपक्षापराह्णे तु रौहिणं तु न लंघयेत् अत्र रौहिणं न लंघयेदिति कृष्णपक्षशुक्लप
क्षयोः श्राद्धे रौहिणं पूर्वापरसीमा तेन शुक्लपक्ष श्राद्धे त्ववसाने सीमा रौहिणं तदनंतरं न कर्तव्यमित्य
र्थः कृष्णपक्षे श्राद्धारंभसीमा रौहिणं न तु पूर्वं नारंभणीयमित्यर्थः ब्रह्मपुराणे पूर्वाह्णे मातृकं श्राद्धमप
राह्णे तु पैतृकं एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकं मातृकश्राद्धमन्वष्टका श्राद्धं पूर्वाह्णे अत्रा
पराह्णे शुक्लपक्षे पूर्वाह्णे विधानात् वृद्धिनिमित्तमाभ्युदयिकमित्यर्थः मत्स्यपुराणे प्रातः कालो मुहूर्तां
स्त्रीन् संगवस्तावदेव तु मध्याह्ने त्रिमुहूर्तः स्यादपराह्णस्ततः परम् सायाह्नस्त्रिमुहूर्तः स्याच्छ्राद्धं
तत्र न कारयेत् राक्षसी नाम सा वेला गर्हिता सर्वकर्मसु अह्नो मुहूर्ता विख्याता दश पंच च स
र्वदा तत्राष्टमो मुहूर्तो यः स कालः कुतपः स्मृतः मध्याह्ने सर्वदा यस्मान्मंदीभवति भास्करः तस्मा
दनंतफलदस्तत्रारंभो विशिष्यते मुहूर्तादूर्ध्वं न याद्यमुहूर्तचतुष्टयं मुहूर्तपंचकं चैवं स्वधाभवनमिष्य
ते अत्र सर्ववाक्यैकवाक्यतया यमर्थः पंचधा विभक्तस्य पंचदश मुहूर्तात्मकस्यादिवसस्य प्रा ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नःकालादयः पंचभागास्तेष्वाभ्युदयिकादिश्राद्धचतुष्टयं चतुर्थभागेषु प्रशस्ततमम् सतिसंभवेत्तत्रैव
कर्त्तव्यम् यदातुप्रशस्तमध्यान्हादिकाललाभएकोद्दिष्टादौ न भवति तदाऽनिषिद्धसंगवादिकालेषु
एकोद्दिष्टादिकं कर्त्तव्यमिति अत एव पार्वणेऽपि अपरपक्षादावपरान्हालाभे संगवादिष्वपि कर्त्तव्य
तानिषिद्धकाले सर्वेषामनाचरणा म तदर्थं विवेचयति रंद्रमुहूर्तादिति कुतपार्द्धमुहूर्ते चतुष्टयं मुहूर्तं
पंचपंचकं कुतपात्पूर्वमार्थात् एकं मुहूर्तं कुतपएव एतन्मुहूर्तं दशायं स्वधावाचनमिष्यते स्वधावा
च्यंतेऽ अन्नेति स्वधावाचन श्राद्धयोगमित्यर्थः प्रातमुहूर्तद्वयं सायान्हे मुहूर्तत्रयमिति मुहूर्तपंच
कं सर्वश्राद्धेषु निषिद्धम् मनुः रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हिसा संध्ययोरुभयोश्चैव सू
र्ये चैवाचिरोदिते अचिरोदिते इति दिवा पंचमसमुहूर्तद्वयमित्यर्थः विष्णुः संध्यासन्ध्योर्न कर्त्तव्यं ।
श्राद्धं खलु विचक्षणैः तयोरपि च कर्त्तव्यं यदि स्याद्राहुदर्शनम् स्नानं दानं तथा श्राद्धमनन्तं राहुद ।
र्शने आसुरी रात्रिरन्यत्र तस्मात्तां परिवर्जयेत् एतेनान्यत्रापि तात्कालिक श्राद्धनिमित्ते पुत्रजन्मा
दौ सति सर्वदैव श्राद्धं कर्त्तव्यमित्युक्तं भवति एवचानग्नेसवश्यकश्राद्धनिमित्तानि अमावास्या
सर्वाश्चतस्रोऽष्टकाः माघी श्रावण्या प्रौष्ठपद्य पूर्णिमासिस्वः आश्विनकृष्णपक्षस्तस्य स्वाग्रयणीय च त्र
योदशी गजच्छाया चंद्रसूर्यग्रहणं व्रीहियवपाकौ तीर्थप्राप्तिः आर्द्रानक्षत्रावास्थितिः सूर्य
स्य नवान्नभक्षण आभ्युदयिकश्राद्धनिमित्तानि च एषु श्राद्धमावश्यकम् अकरणे ऽ नि:

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धोपदेशादिति श्राद्धे प्रशस्तो गंगीतीरादिः निषद्धादिस्तु देशः महानद्युत्तरं मगध दक्षिणं द्वादशयोजना
वच्छिन्नस्त्रिशंकुदेशाकलिंगदेशः म्लेच्छदेशः शार्करादिसंकीर्णदेशः श्राद्धप्रशस्तब्राह्मणास्तु त्रिदं
डिपतिः आत्मवित् वेदवित् वेदांगवित् वानप्रस्थ ब्रह्मचारी असगोत्रः साधुगृहस्थः याज्ञिकपुरा
णवेत्ता श्राद्धकर्मवित् विष्णुशिवसूर्यान्यतमभक्तः असमानप्रवरः पितृभक्तः श्वसुरः दौहित्रः गुरुः
आचार्यः जामाता ऋत्विक् मातृस्वस्रेयः पितृष्वस्रेयः मातामहः मातुलः भागिनेयः अष्टवर्षपरीणी
ताध्ययनपंक्तिःपावनः गायत्रीमात्रसारोपि सदाचारः अथ श्राद्धे निषिद्धा ब्राह्मणाः नामंत्रयेदित्यनुवृत्तौ
कात्यायनः द्विर्जन्मशुक्लविल्लिंधिश्यावदंतच्छिद्रप्रजननव्याधितव्यंगिश्वित्रिकुष्ठिकुनखिवर्जमिति
हीनगंध्योद्ध्वर्मा शुक्लो नातिगौरः विल्लिधिर्विचर्चिकायुक्तः शुक्लविल्लिधिः शुक्लांड इति स्मृतिरत्नविवे
कः श्यामदंतो जन्मनैव कृष्णदंतः विद्धप्रजननच्छिन्नमेढ्रश्चर्मा एवमित्रं शत्रुः मूर्खः ग्रामयाजकः देवल
कः चिकित्सकः क्रयविक्रयोपजीवी ग्रामप्रेष्यः राजप्रेष्यः गुरुविरोधी नक्षत्रग्रहसूचकः त्यक्ताग्नि
वार्द्धुषिकः यक्ष्मी पशुपालकः परिवेत्ता परिवित्तिः निराकृतिर्नर्तनशील अवकीर्णी वृषलीप
तिः वंध्यानुवृषलीज्ञेया वृषली तुष्टवप्रजाः अपरा वृषली ज्ञेया कुमारी या रजस्वला पौनर्भवः
काणः गृहावस्थितव्यभिचारी स्त्रीपतिः शूद्रशिष्यः अभिशस्तः कुंडः गोलकः पतितसंसर्गी
अव्रती क्लीवः योनिदोषवान् दिधिषूपतिः पुत्रपठितः शूद्रापतिः स्त्रीजितः हीनांगुलातीतकर्णः शि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ल्पजीवी स्त्रीयाजकः पतितः स्वकीडी दुराचारः ऐन्द्रजालिकः पारीदारिकः मातृत्यागी पितृत्यागी दारात्यागी
नरकपोषकः अथ कृतविवाहः नास्तिकः कृपणः असत्यवादी ऋणहर्ता सवयाकेश शून्य शिरएकः स्त्री
तुल्यवाकलेष्टः स्वाश्रम विच्युतः पर्याहितः पर्याधाना सोदर्ये निष्टति ज्येष्ठे ग्न्याधनं करोति हितयोः पर्या
हितो ज्येष्ठः पर्याधाता कनिष्ठकः अग्न्युत्सादक अरण्यदाही आवसथदी हीक्षेत्र सस्यदाही अगारदा
ही सदा व्यसनशीला रक्तकेशः नपुंसकभेदाः षण्डको वातजः षण्डः क्लीबोप्यथ नपुंसक कीलकश्चे
ति षण्डथायं क्लीवभेदो विभावितः शूद्रयोजक वानाशी राज कारितपाप चिन्हांकितः वेश्यापतिय
द्वाचार्य्यः स्त्रातो भेदकः वृक्षारोपणशीलः कन्यादूषकः हिंस्रः वृषलव्यतिः सदापाचकः स्त्रीपदी
कूटसाक्षीगणयाजकः सूत्रधारादिधर्म कृत्ये भग्नोत्साहः हीनातिरिक्तांगः साहसिकः कपटतुला
व्यवहारी आत्मंभरिः पुत्रोपयातो कृत्याभिचारशीलः दत्तापलापी समयभेदकः पक्षिघाती मीनघा
ती सर्पघाती कच्छपघाती नानाजंतु वधासक्त अवध वधोपजीवी शूद्रप्रेष्यः मांसविक्रयी गरदः
कुंडाशी श्येनक्रीडी समुद्रपापी चारण वृत्त्युपजीवीः मद्यपः रसविक्रयी केकरः धनुष्कर्ता शर
कर्ता मित्रध्रुक् द्यूतवृतिः भृतकाध्यापकः भृतकाध्यायिकः पित्रा विवदमानः दूतः नित्यं
पाचकः काण्डपृष्ठः स्वकुलं पृष्ठतः कृत्वा यो वै परकुलं व्रजेत् तेन दुश्चरितेनासौ काण्डपृष्ठ इति
स्मृतः उन्मत्तः गण्डमाली वेदनिंदकः उष्ट्रदमकः गोदकः दनिदमकः शपस्तुकाले प्यजानस्मश्रुः गलरोगी

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गः धर्मविक्रयी अश्वविक्रयी गजविक्रयी गोविक्रयी लवणविक्रयी लाक्षाविक्रयी चामरविक्रयी दि
वे दिने कृतस्त्रीसंगमः पुत्रिकापतिः रजस्वलास्त्रीकः एककूपोदके ग्रामे संवत्सरवासी अंधबधिरः पांडु
रोगी दंडाधिकृतः अशुचिः राजद्विष्टः पुरोहितः अनूढापुत्रः अनूढापुत्रपुत्रः अनूढापतिः अनुपासि
तसंध्या अष्टौ पापरोगिणः उन्मादस्त्वग्दोषो राजयक्ष्मा श्वासमधुमेहो भगंदरो महोदरमश्मरीत्यष्टौ पापरो
गाः अथ श्राद्धे प्रशस्तकुशाः दक्षिणदिगवस्थितदक्षिणवनगोकर्णदीर्घाः समूला आहरिताः श्राद्धदिवसे
स्वयं ग्रामान्त्यादिनाः पंडितमूलरणे उपमूलसकल्पनाः श्राद्धकर्तव्यद्धमुष्टिहस्तमिताः योग्यदेशस्थाः
कुशाभावे मुंजश्यामाकदूर्वाकाशबल्वजाः तीक्ष्णरोमाणश्च अथ निषिद्धकुशाः चितौजाताः वर्त्मजा
ताः यज्ञविनिर्युक्ताः पितृतर्पणविनियुक्ताः अमेध्यलिप्ताः नीलीक्षेत्रजातकर्पासक्षेत्रजाताः श्राद्धे तिलाः कृष्णाः
प्रशस्ताः श्वेता निषिद्धाः श्राद्धे निषिद्धजलम् दुर्गंधिजलम् पर्युषितजलम् अशुच्युच्छिष्टस्पृष्टो
द्धृतजलम् अंत्यजजलाशयजलम् अनुत्सृष्टपरखानितजलाशयजलम् अभोज्यानि पानजल
पतितादिकाकारितस्नानजलम् तर्पणदर्भमंत्रतिलहेमरजतान्यतमरहितं जलं निषिद्ध
म् अथ श्राद्धेऽर्घपात्राणि सौवर्णराजतताम्रमयखड्गपात्रमणिमयपात्राणि त्रैवर्णि
कनिर्मितानि पलाशादियज्ञीयवृक्षपात्राणि पत्रपुटकानि च एतान्येव परिवेषणे भोज
नार्थे च पात्राणि प्रशस्तानि अथ भोजने परिवेषणे च निषिद्धानि पात्राणि सीसक ॥ ॥ ४०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्री

मयाऽपोमपयाषाणमयमग्नपात्रक्षुद्रपात्राणि दैवे राजतानि भोजन मृण्मयपात्रं अथ श्राद्धे गंधादिपं
चकम् तत्र गंधाः श्वेतचंदनअगुरुगुडत्वककुंभकर्पूरपद्मकाष्ठउशीरकुटजजयमांसी गे दिशणस्तु
गंधिद्रव्यमेतत् ततुतुल्यस्यनुकारी उग्रगंधो वृक्षः सेंदुवारः निषिद्ध गंधाः कस्तूरीसिंदुकादीनि अथ
पुष्पाणि विहितानि पद्मनीलोत्पलरक्तोत्पलकुमुद चंपकतिलकनगर यूथिकामाधवीकुन्द कुब्ज
कानवमालिकासेवसी कल्हारतुलसीपत्राणि निषिद्धेतरश्वेन पुष्पाणि अथ निषिद्ध पुष्पाणि अर्क
भाण्डीपीताम्लानक्लमिकेशादिदुष्टानि उग्रगंधीनि रक्तवर्णओंड्रपुष्प रक्तकरवीरश्वेन गंधिकुसुमे
नरकंटकिवृक्षपुष्पचैत्रवृक्षोद्भवपुष्पाणि अथ श्राद्धे धूपद्रव्याणि सघृतगुग्गुलुस्यमधुगुग्गुलुचंद
नागुरुउशीरपद्मकाष्टकर्पूरश्रीखंडाः तदभावे देवदारुसरलाद्यपि अथ निषिद्धरूपो: केवलघृतकेवल
गुग्गुलुतृणगुग्गुलुउग्रगंधि अगंधि अप्रशस्तिसंवद्धानि प्राणिजंच कस्तुरिकादि दीपे घृतं तैलंच
विहिते तदभावे सार्षपादिस्नेहः प्राणिजस्नेहो दीपे निषिद्धः श्राद्धे वस्त्रं नवमनगलग्नम् शु
भ्रं सदशं देयम् संपत्तौ सत्यां वासोयुगम् त्रिपटं वा धौतकौशेयकंवलादिदानमधिक फलं
उपवीतमधिकफलार्थं नत्वावश्यकम् तांबूलादीनि श्रेष्ठमवस्तूनि गंधदानाद्यवसरे दातव्यानि
तांबूलोपकरणानि पर्णपूगखदिरचूर्णखदिरसारकर्पूर श्रीखंडकस्तूरीएलाकंक्कोलवंगसहकारादि ४१
व्यानि अत्र कर्पूरादीनि पृथगपि देयानि अथ श्राद्धदेशे सन्निधापनीयानि गडुकभृंगपात्रश्वेतरक्तनेपालकंवल।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कृष्णाजिनगौरसर्षपगौरकृष्णारण्यत्रिविधतिलत्रिदशपतिरजताऽक्षतकृष्णच्छागरत्नानि श्राद्धपवनं
नि अथ श्राद्धदेशोऽपसारणीयानि काककुक्कुरकुक्कुटविड्वराहविडालवृषलीपतिखंजखण्डाः रजस्व
लाः त्रुटितकर्णपतितः कुष्ठी व्रणी नास्तिकः भयानकः अशुचिः नग्नः धूर्तः नीलकषायवस्त्रः छिन्नकर्णः
लोहसीसः मलिनांबरः दीर्घरोगी अभिशस्तः ऊनांगः अधिकांगः काणः दान्तप्रेष्यः मद्यपः योगिनी
पतिः भग्नकुलः असती चंडालः पाषण्डः पर्युषितान्नं एतेऽपसार्याः एतेषां काकादीनामन्यतम
दृष्टोपहतश्राद्धहविषां त्यागः हविरंतरासंभवे तेष्वेव हविःषु मृद्युक्तानि रुद्रैः प्रोक्षणम् तिलगौर
सर्षपविकिरणं कृत्वा तैरेव हविर्भिः श्राद्धं कर्तव्यं मातृपितृवंशासंबद्धास्त्रीपाकादिकर्मानुकूल
व्यापारनिषिद्धः अथ श्राद्धे विहितानि हविर्द्रव्याणि तत्र दुग्धदधिघृतानि गव्यानि गव्यपाय
सम् तिलतंडुलमुद्गसाधितकृसरान्नम् अपूपादि शर्करास्वीरसंयुक्ताः पृथुकाः मध्या कलाजा
तिलव्रीहियवाश्चेति शालिस्वसमुत्पन्नधान्यं प्रसारिकाः प्रसारिकानि वारविशेष इति हलायुधः
प्रसारिका मध्यदेशे शाठीला इति प्रसिद्धधान्यं चतुर्वर्णासेवश्चेनापी नारक्ता कृष्णा चेति श्राद्ध
पल्लवः मगधदेशे प्रसिद्धेयं षष्टिका अचक्षायुधान्यं मुक्तं श्राद्धे प्रयुज्यते श्यामाभिरोषधीभि
र्मासं प्रीयंत इति सामान्यतोऽभिधानात् विशेषतो निषेधात् किंच छंदोगपरीशिष्टकीलशारदधान्यंष
ष्टिकादीत्यादिपदेनास्यैव संग्रहे कृष्णमाषा मुद्गगोधूमश्यामाका नीवारकलायकंगुवसबीजानि अथ ४२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कमांसंनिषाणासमयासुस्थितश्टंगच्छागमांसंसर्वलोहितच्छागमांसंगोधामांसंहरिणविचित्रहरि
णकृष्णहरिणशंवरमृगमेषशशकाकूर्माः ऽऽरण्यवाराहाकंसानिति तित्तिरिलावकर्तव्यकौशल्लकौ
ञ्चकारण्डषांपक्षीणांमांसानि ककरः करान इतिप्रसिद्धः वाध्रीणसमांसं त्रिपिबंन्त्विन्द्रियक्षीणंश्वेतवृद्ध
मजापतिघ्नं वाध्रीणसंतुनंप्राहुर्याज्ञिकाः पितृकर्मणि कृष्णग्रीवोरक्तशिराः श्वेतपक्षोविहंगमः तंवैवा
ध्रीणसःप्रोक्त इत्येषा नैगमीश्रुतेः छागपक्षिणौ वाध्रीणसौतयोर्मांसं मंत्रसंस्कृतमांसं यदा छागादिकंप
शुमालभ्यमांससमुपादीयते तदा प्रथमं मंत्रेण पशुप्रोक्षणं कर्तव्यं समंत्रश्च ओंपितृभ्यस्त्वाजुष्टं प्रोक्षामि
एकोद्दिष्टेतुपित्रेत्वाजुष्टंप्रोक्षामीत्यादिरूपः अप्रजालंभपक्षे सिंहादिहतमांसादिषुनमंत्र संस्कारपेक्षेतिसिंह
व्याघ्रहतहरिणमांसंलब्धक्रीतच्छागादिमांसं प्रस्तरासमभिधानछागादिगसं अथमत्स्याः महाशल्करोहि
तराजीवपाठीन श्वेतशल्का अन्येपि अथशाकाः कालशाकंचवस्तुकंमूलकं कृष्णनाडिकावेत्रीकुरंक
लापंचपटोलंसार्षपंतथा सूर्यावर्तोसुनिष्पन्नं शाकान्याहुर्मनीषिणः कृष्णनाडिका कृष्णनाडीवड
तिश्चाद्रूपल्लवपंज्यौ सूर्य्यावर्तं हुरहुर इतिप्रसिद्धम् सुसिद्धं सुनिष्पन्नमम्लोनिकाषायपत्रसदृशप
त्रं चौपत्रीतिप्रसिद्धम् जलप्रभवशाकं पटुनाडीशाकंच वाक्यांतरात् अथफलानि आम्रपनसकदलीना
लिकेर आमलकीत्रवीनामलकीपमवीजखर्जूरतिन्दुककटिकारिकादाक्षाकर्मकनारंगकलयलीदाडि
मदाडिमीविल्वा ऽऽम्रानकलकुचवदरीद्वयम् पूगफलपटोलवीजपूरकक्षीरिकात्रमुष

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परूषकशृंगाटकमधूकगंभारिफलापिप्पलीमरिचकोविदारजलवृंतयानिफलानिपक्वानिभक्ष्याणि
नान्यपक्वान्यपक्वानिदेयानिमधुकपुष्पंकोषकंलीरभेदाः तद्विकाराश्चगुडशर्करादयः अन्यान्यपिनिर्वि
दितरस्वादुमधुरफलानिकर्कटीप्रभृतीनिश्राद्धेदेयानिफलान्ययत्नपक्वानिदेयानि अथकंदाः सूरण
दीर्घमूलकंकशेरुविंशद्विप्रकारंसर्वशालूकभेदाः आर्द्रकंविदारी विदारिकंदइतिप्रसिद्धः तालमूलं
शतावरीकंदश्च यथायदप्सुवहरणीयभवतितथाह्यत्वादातव्यंतदिति अथव्यंजनसंस्कारकद्रव्या
णि हिंगुजीरकधान्यकहरिद्राशुंठीमरिचाऽऽर्द्रकदाडिमीबीजघृततैलंलवणानि सामुद्रकसांभरिसैं
धवानितैलंतिलभवंसार्षपंच अत्रवमांसीदानिव्यंजनान्युपकरणानि चामात्रश्राद्धे आमान्येवदातव्यानिसि
द्धान्नश्राद्धेसिद्धान्येवदातव्यानीतिश्राद्धपल्लवः सक्तुलाजाचिपिटकदुग्धविकारदधिदुग्धघृतगुडलड्डुका
दि पक्वान्नानि चाग्निसाधितान्यप्यामश्राद्धेदेयानीति श्राद्धपल्लवश्राद्धप्रदीपौ अत्रचकालशाकंमहाश
ल्काः खड्गलोहामिषंमधुआनंत्यायैवकल्प्यंतेमुन्यन्नानिचसर्वशः कालशाकंप्रसिद्धंमहाशल्कारोहितम
भनयोमत्स्याः खड्गोगंडकः लोहः सर्वलोहितश्छागः तयोर्मांसंमधुक्षौद्रंमुन्यन्नानिनीवाराः एतेश्राद्धमनं
तपितृतृप्तिजनकंशाकराक्षीरसंयुक्ताः पृथुकानित्यमक्षयाः एतैश्राद्धमक्षयपितृतृप्तिजनकंलाजांच
मधुसंयुक्तान्सक्तून्शर्करयासहश्राद्धेदद्यात् अत्रविहितव्याणिश्राद्धदानेतत्फलेच्छायांसमुच्चयोनतुवि
कल्पः भक्ष्यंभोज्यंचविविधंमूलानिचफलानिचहृद्यानिचैवमांसानियानानिसुरभीणिचउपनेयंसर्वमेतदिति ४५

Kirtikant Sharma Collection, Najafgarh

श्रा॰ मनुवचनात् ततोन्यं बहुसंस्कारं नैकव्यंजनपानवत् चोष्यं पेयं समृद्धं च यथा बहुपपादयेदिति दे
वि॰ ववाक्याच्च समुच्चयविधानात् नैकव्यंजनपानवदित्यपि अनेकव्यंजनविधानं नत्वेकव्यंजनानां
४५ षेधः वाक्यभेदप्रसंगात् तस्मादनेकव्यंजनस्य प्राशस्त्यं एकव्यंजनस्याधिषेधात्। अनेकव्यं
जनस्यालाभेऽनिषिद्धत्वादेकमपि व्यंजनमुपादेयमिति विहित द्रव्येषु एक द्रव्यदानेनापि श्राद्ध
स्वरूपनिर्वाहः अथ श्राद्धेऽविहिताऽनिषिद्धद्रव्याणि पद्म विल्व हिंगुपिप्पली शृंगाटक दधि
सक्तुश्वेतसिविके मुंकमधुकमरिचानि अत्राहिंगुपिप्पलीमरिचानि द्रव्यांतरसंस्कारार्थं
देयानि केवलानि न देयानि परिशिष्टानि विहितालाभे देयानि अथ श्राद्धे निषिद्धद्रव्याणि के
वलजलं वारद्वयसाधितमुशाद्यन्नं नृपहितं खिन्नं उपभुक्तार्थभागरूपाग्रावलेहितं सुक्तं पर्युषितं परि
दग्धं शर्करं कीटपाषाणकेशोपहतं वारदृष्टभावदुष्टं दुष्टोपहतं श्वासोपहतं वासोवधूतं एतानि विहि
तद्रव्याण्यपि निषिद्धानि विषहतमांसं कव्यहतमांसं व्याधिहतमांसं सिंहव्याघ्रनरतिर्यग्घतं मांसं
मंत्राप्रोक्षितालब्धपशुमांसं महिषीक्षीरं हरिणीक्षीरं महिषीक्षीरं उष्ट्रीक्षीरं छागीक्षीरं चमरीक्षीरं एका
शफक्षीराणि प्रशस्तमपि श्राद्धार्थमेतत्रय छस्त्वेनियाञ्चितदुग्धं उद्धृतसारं च दुग्धं निषिद्धं निषिद्ध
दुग्धविकाराश्च दग्धादयो निषिद्धाः दुर्गंधिजलं स्वल्पजलाशयजलं पर्युषितजलं अस्पृश्यस्पृष्ट
जलं अंत्यजजलाशयजलं अप्रतिष्ठितजलाशयजलं याचितजलं दर्भमंत्रतिलहेमरजतान्यतमरहितं जलं ४५

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अभोज्यानि निखातजलं पंक्तितादि कारितजलाशयजलं शूद्राहृतजलं ऊषरलवणं सोच चेन्नवणं
अलवणं व्यजनं पाकानंतरप्रक्षिप्तलवणं व्यंजनं हस्तदत्तव्यंजनं हस्तमथितद्रव्यं च शूद्रस्य
गृहद्रव्यं अपरदुष्टद्रव्यं क्षिक्कादुष्टद्रव्यं रसहीनद्रव्यं गंधहीनद्रव्यं पालंकीशाकं चेतनाडिकाशाकं सो
हिंजनशाकं नडुलीपशाकं नडुलीयकठरिलया इति श्राद्धपल्लवः स्वच्चचिरोशाकं पिप्पलीशाकं राई
शाकं शेटीशाक कुसुमसाक तुलसीसाकं शरणशाकं पोपीशाकं नाडिकाशाकं नाडिकाफलपी इति
श्राद्धपल्लवव्याख्या फलुपीमगंधादिदेशे वनयो इर तुल्य नाली रुढा दौलगति कूष्मांडम् अलावुसि
विसो धिसो वृंताकं मगिरिणं पिंडमूलकं वशाकरीरम् कोद्रवं वनकोद्रवं चणकं कोडा अकटापुला
काधान्यं अनसीगोरसाषमसूरः लसुनः लोहितवृक्षनिर्यासं पलाण्डुकाठच्छानि कम्भिस्थकलंजधाकवले
भूदीकिवलमरिचं केवलंहिंगुकम्बेटीफरहदःधतूरकं वकंवासकः स्थूलकेसुकं स्थूलजंवूफलं
कूंभीचांडालाग्नि सुनकाग्न्यमेध्याग्निचिताग्नयः श्राद्धे निषिद्धा अनंतराभावेऽपवित्रानेता
नग्नीन् क्रमेण सन्नमुन्यानेषु परंपरया प्रज्वाल्य सन्नमस्थान प्रज्वालितो निरुपादेया अत्र च
श्राद्धेचतुर्विधानि वस्तूनि भवंति विहितानि विहितानि षिद्धानि अविहिताऽनिषिद्धानि निषि
द्धानि विहित लाभे तेषामेवोपादानं तदलाभे विहितनिषिद्धानामुपादानं तदलाभेऽविहि
ताऽनिषिद्धानामुपदानं निषिद्धस्य सर्वथा त्यागः इति श्राद्धविवेके प्रथमः १ अथाधिकारिनि ४६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रा·वि· तत्रमूलवाक्यानिशुद्धविवेके लिखितानि सप्रपंचम् इह विस्तरभयादधिकारिमात्रंसिसिद्धिवलिख्यते।
४७ मृतस्यत्रिविधा क्रियाभवति प्रथमा मध्यमा उत्तमाचेति तत्रदाहमारभ्याशौचांतदिने पर्यंताक्रियापूर्वा१ए
कादशाहादिसपिंडनांतामध्यमाक्रिया२सपिंडनानंतरंसांवत्सरिकापार्वणाभ्युदयिकनित्यश्राद्धादियोत्त
राक्रिया:३ तत्रत्रिविधास्वपिक्रियासुत्रयोदशविधानामपि पुत्राणामधिकार: तेचत्रयोदशपुत्रा:औरस
१पुत्रिकापुत्र२क्षेत्रज:३कानीन४सहोढ:५गूढोत्पन्न६पौनर्भव:७ऽपविद्ध:८ दत्तक:९ क्रीत१० कृत्रि
म११स्वयमुपगत:१२पारशव:१३तेषुमुख्य औरस:तदभावेपुत्रिकापुत्र:तत:पूर्वपूर्वाभावे उत्तरोत्त
राधिकारीतेष्वपि पूर्वक्रियायांमध्यमक्रियायांच विभक्तानामविभक्तानां वामध्येपाप्यस्यज्येष्ठस्यै
वाधिकार:तदुक्तंस्मृतिसारे अक्षतेवापि कनिष्ठादिभिरौरसै: यत्रकुत्रापिज्येष्ठस्याधिकार: प्रेतकर्म
णीति तस्यक्षतादिना प्रतिबंधेकनिष्ठापि नियतकाल कर्तव्य दशाहादिकप्रेतपिंडादिसपिंडनांत
क्रियास्वधिकार: सपिंडनोत्तरंसर्वेषांपुत्राणांमविशेषेण पृथगधिकारउत्तरक्रियासुएषांत्रयो
दशविधानांपुत्राणांलक्षणं शुद्धिविवेके प्रपंचितंपुत्राभावे पौत्र: पौत्राभावे प्रपौत्र: तद
भावेभार्या तदभावेभ्राताकनीयान् तदभावेज्येष्ठ: तदभावेपिता तदभावेभ्रातृपुत्र:तद
भावेपूर्वक्रियायांमध्यमक्रियायांचसपिंडा अधिकारिण: तदभावे दुहिताऽधिकारिणी तद
भावेसकुल्या:तदभावेमातृसपिंडा:तदभावे मातृसकुल्या:कुलद्वयाभावेमातर: तदभावेच ४७

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

याकथंचित्परिग्रहीत्वाःस्त्रियःतदभावेराजादेशेनधनग्राहकोधिकारीपितृहीनौपौत्रप्रपौत्रौसपुत्रयो
रपिपितामहप्रपितामहयोःपार्वणश्राद्धेधिकारीरेणैमृतस्यकन्यायाविवाहेकन्याप्रदानाप्यधिकारीअसमाप्त
षड्वर्षस्यमृतस्यपूर्वक्रियामात्रंतत्रभ्रात्रपित्रादयोकारिणःअसमाप्तद्विवर्षस्यपूर्वक्रियापिनास्तिकिंतुभूमिनि
नमंत्रंस्त्रियाअपिद्विवर्षाभ्यांनेरभूमिनिखननमात्रंततउर्द्धंविवाहात्पूर्वंपूर्वक्रियामात्रंतत्रपिताधिकारीत
दभावेभ्रात्रादिरूढायास्तुत्रिविधाक्रियातत्रपुत्रोधिकारीतदभावेपतिःतदभावेसपत्नीपुत्रतदभावेपौत्रःतद
भावेसपिंडाःतदाभावेसकुल्याःतदभावेपितृसपिंडाःसप्तपुरुषावधयःसपिंडाःदशपुरुषावधयःसकुल्याः
मृतस्यापरिणीतस्यद्विवर्षादूर्द्ध्वंपूर्वक्रियामात्रंतत्रभ्रात्रादिरधिकारीपरिणीतस्यत्रिविधापिक्रियातत्रपु
त्रादिरधिकारीपूर्ववत्केचित्तुअसमाप्तषड्वर्षस्यत्रैवर्णिकस्यस्त्रीशूद्रयोश्चपरिणीतयोस्त्रिविधायिक्रि
याऽनुग्रहादिनानन्याविधेयकीत्याहुरितिश्राद्धकल्पस्मृतिसारोगुरुकुलस्थितशिष्यस्यभ्रात्रपित्रभावेगु
रुरधिकारीगुरोरपिपुत्रपत्नीभ्रात्रपितृहीनस्यशिष्यःयजमानस्यान्याभावेऋत्विगितिसंन्यासिनःसंन्यासिपुत्राःअ
धिकारिणःसंन्यासिपुत्रैःपितुःसांवत्सरिकेकोद्दिष्टपार्वणास्युदयिकतीर्थश्राद्धादानिकर्तव्यानिसामान्यविहित्वा
नामेकोद्दिष्टादीनांसंन्यासीयंचंप्रतिकर्तव्यतानिषेधकप्रमाणाभावात्यत्तुएकोद्दिष्टंनकुर्वीतयतीनांचैवसर्वदाअहन्ये
कादशेवर्षेपार्वणंतुविधीयतेइतिवाक्यंतत्तुनसांवत्सरिकेकोद्दिष्टश्राद्धनिषेधकंएतद्वाक्यस्यपारिजाततिबंधादि
षुसपिंडीकरणपर्यंतकोदिष्टप्रकरणेलेखनेनपंचमादिश्यकषोडशश्राद्धनिषिद्धनिषेधकत्वव्यवस्थितेःत्रिदंडग्रहणादेव
प्रेतत्वंनैवजायतेइत्युपसंहारएवकोद्दिष्टयतेर्नास्तित्रिदंडग्रहणादिहसपिंडीकरणाभावान्यार्वणश्राद्धमिष्यतेइति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वंयेनसत्क्रियांनकुर्याद्वार्षिकादन्यत्रसोभूतायभिक्षावेदनिदत्तात्रेयवाक्येवार्षिकैकोद्दिष्टनिषेधान
वगमात्कातियपानांसांवत्सरिकैकोद्दिष्टाचरणंचकातियपानामनाचरणस्यप्रकरणानवरुद्धैकोद्दि
ष्टनिषेधानवगममात्रेणान्यथोपपत्तेर्नसामान्यैकोद्दिष्टनिषेधोवगम्यतइतियच्चैकोद्दिष्टसमान्यो
कैकोद्दिष्टविधिनैवकर्तव्यम् विंध्यनरानुपदेशात् सर्वैश्चसंन्यासिपुत्रैः कर्तव्यंतत्रापिविशेषाश्रव
णादिति अतएवपार्वणमभ्युदयिकतीर्थश्राद्धादिकंयतिपुत्रैः कर्तव्यमेवेति श्राद्धपल्लवेलिखितंय
तेः सपिंडीकरणंनास्तियास्यसर्वैरेवनिषिद्धमिति श्रीदत्तोपाध्यायलेखनंस्मृतिसारलेखनंचएकोद्दिष्टकर्तव्य
तानिषेधकवाक्यस्यत्रे।तोद्देश्यकैकोद्दिष्टकर्त्तव्यतानिषेधपरत्वंसर्वत्रस्मृतिसारादावप्यवगम्यतेसं
दर्भादिनियत्तुब्राह्मणादिहतेनतिपतितेसंगवर्जितैर्व्युत्क्रमाच्चमृतेदेयंयेभ्यएवददात्यसावितिवाक्य
तदपिनत्रिदंडिसंन्यासिपार्वणश्राद्धनिषेधकंएतद्वाक्यस्यैकदण्डिसंन्यासिपार्वणश्राद्धनिषेध
कत्वात् उपन्यावाक्येतुत्रिदण्डिनांपार्वणविधानादितिगौडीयश्राद्धविवेकः शातातपवाक्येनापि
पार्वणविधानात् वस्तुतोब्राह्मणादिहतत्वादानिपितामहप्रक्रमाश्राद्धविधायकानितेनपति
तेसंगवर्जितेचजीवत्येवपितरिपार्वणविधायकं संगवर्जितः संन्यासी अथानधिकारिणः महा
पातकिनः पाषंडवृजयः स्तेनाब्रात्याः आलस्यादश्रद्धयावास्वकर्मत्यागिनः निंदितकर्मकर्त्तारग
र्भमतृदुह स्त्रियः मद्यायास्त्रैवर्णिकास्त्रियः ब्रह्मचारिणः मातापित्रोराचार्यगुरूपाध्यायानामन्त्याभावेवह

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नदहनादौ ब्रह्मचारिणो दोषो न भवति अथोदकदानाद्यनर्हाः अयथाविधिसंकरजाताः वेदाविहि
तप्रव्रज्याकर्तारः शास्त्राविहितदेहत्यागकारिणः पाषण्डाश्रिताः स्त्रियो गर्भभर्तृद्रुहः मद्यपास्वैव
र्णिकास्त्रियः वृथा संकरजातादीनामुदकदानादि न कर्तव्यं प्रेतश्राद्धादावपि शर्मादिपदं प्र
योजयंति केचित् केचिन्न योजयंति ते तु सपिंडीकरणं यावत् प्रेतः प्रेत इति स्मृतः सपिंडीक
१ श्री. रणादूर्ध्वं शर्मवर्मादिभागिति वाक्यं प्रमाणयंति तत्रास्माकमुत्तरः पक्षः अथ प्रथमक्रिया अ
न्त्यसंगादितीर्थेषु अपक्रमिष्यज्जीवितस्य त्रैवर्णिकस्य नवयज्ञोपवीतवस्त्रमाल्यादिभिः शूद्रस्य
स्त्रियाश्चयज्ञोपवीतेतरैर्विभूषणं कुशास्तरणवस्थानं शुचित्वापादकं गंगाजलप्रोक्षणं गंगामृत्ति
कानुलेपनं शालग्रामशिलासंनिधापनं तुलसीसंनिधापनं शिरसि तुलसीपत्रदानं च कर्तव्यं
तत्र फलार्थिना यथाशक्ति गोभूहिरण्यादिदानं स्वद्वारा कारयितव्यं आशु तरयापनिवार
णार्थं दीपदानं कारयितव्यं जलतुषारयोरन्यतरेण शरीरार्द्रीकरणं तदसंभवे जलतुषारयोः क
थापि कार्या ओं इत्येकाक्षरं ब्रह्म व्याहरणविष्णुस्मरणयोरन्यतरस्मिन्परमगतिप्राप्तिः फलमतस्त
दर्थिना तत्कार्यं पुरुषसूक्तादिश्रवणं अपगतप्राणस्य मुखनिक्षिप्तकांस्यमणिप्रवालहिरण्यशकल
नासिकाद्वयकर्णद्वयचक्षुर्द्वयनिक्षिप्तसुवर्णशकलमात्रस्य घृततैलसमायुक्तस्य देहशोधनं विधाय स्नापि
तस्य वहिर्ग्रामान्त्यां भूमौ दक्षिणशिरसा स्थापितस्य घृततैलाभ्युक्षितस्य चंदनोक्षितसर्वांगस्य वस्त्रापिहितमुखस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भूषितः स्नातः शुद्धवस्त्रोपवीतिनो गुरूननुज्ञाप्य पुत्रादिभिर्हरणं कुर्यात् मृतं द्विजं सजातीयेषु तिष्ठत्सु न शू
द्रेण नाययेयुः न स्मरतं शूद्रं द्विजाः ब्राह्मणकर्तृकानाथब्राह्मणकर्मनिर्हरणकर्तुः स्वर्लोकभागित्वं फलं द्विज
कर्तृकानां च ब्राह्मणकर्मकनिर्हरणे निर्हरणक्रियासंबंधिकर्तृपदसमसंख्ययज्ञफलम् धनंज
य वायव्याव्ययगमयमपर्यन्तं मृतस्य शवे नैधारणं द्विजसंस्कारोपयुक्ताग्नितृणकाष्ठहविषां शूद्र
कर्तृकानयनं निषिद्धं द्विजशवं शूद्रो न स्पृशेत् ततः स्नात्वा पुत्रादिर्दक्षिणशिरसं शवं कृत्वा गया
दीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः कुरुक्षेत्रं च गंगां च यमुनां च सरिद्वरां कौशिकीं चंद्रभागां
च सर्वपापप्रणाशिनीं भद्रावकाशां सरयूं गंडकीं तमसां तथा वैणवं च वाराहं च तीर्थं पिंडारकं तथा
पृथिव्यां यानि तीर्थानि चतुरः सागरांस्तथा एतानि मनसा ध्यायन् जले सर्वतीर्थान्यावाहयेत् तज्ज
लेन शवं संस्नाप्य शुचिदेशे यथामिलितदारु सवर्णपरिचितदारु च परिचितचितायामास्तीर्य कु
शायामुत्तरशिरसोऽधोमुखस्य सर्वस्य स्त्रिया ऊर्ध्वाननदेहाया उत्तरशिरसः स्थापनं कुर्यात् ततो
गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चया इत्यादि पूर्वोक्तं पठित्वा एतानि तीर्थानि देवाश्चाग्निस
ख्याः सर्वेऽक्त शयनसेनं गतासुर्षं दहन्त्विति मनसा ध्यात्वाऽपसव्येन दक्षिणमुखो हुताशनं गृहीत्वा
कृत्वा तु दुष्करं कर्म जानता वाप्यजानता मृत्युकालवशं प्राप्तं नरं पंचत्वमागतं धर्माधर्मसमायुक्तं लो
भमोहसमावृतं दहेयं सर्वगात्राणि दिव्याल्लोकान् स गच्छतु इति मंत्रमुद्दीर्य प्रदक्षिणं विधाय ज्वलदुल्म

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कास्यशिरोदेशोदानं मंत्रस्यायमदसार्थत्वात् स्त्रीदाहेप्यविकृत एव पठनीयः पुंस्त्वस्याविवक्षणात्स
त्रियकर्तृके वैश्यकर्तृके चानाय ब्राह्मणदाहे वैश्यकर्तृक नष्टसर्वस्वानाथराजदाहे पितृमेध्ययज्ञफ
लमूननस्तृणकाष्ठादिघृतं परिक्षिप्य दग्ध्वा किंचित्क्षेपयेत् ततः प्रादेशमात्रसन्नकाष्ठिकाभिः सहप्रद
क्षिणसन्नकं विधाय कुठारेणोल्मुकं परिग्रहारसन्नकं कृत्वा क्रव्यादायनमस्त्वित्युक्त्वा एकोकां काष्ठिका
मग्नौ क्षिपेत् अनंतरं द्विवर्षमेतं गंधमाल्यादिरलंकृत्य अहरहर्नयमानो गामश्वं पुरुषं पशून् वैवस्वतो नतृ
प्यति सुराय इव दुर्मतिरिति यमगाथां गायंतो बांधवाश्यामा बहिः शुचिदेशे निखनेयुः तत्र नोदकदान
दिक्रियोदकदानादिः तत्रप्रेतदाहानंतरं सर्वे शवस्पृश्यः शवानुगमनकर्तारश्च चितां वामावर्तेन प
रावृत्त्य व्यावर्त्य प्रेतमनवलोकमानाः अहरहर्नयमानो गामश्वं पुरुषं पशून् वैवस्वतो न तृप्यति सुर
याद्रव दुर्मतिरिति यमगाथां गायंतो नदीं सवहज्जलाशयं तरं वा बालानग्रे कृत्य गच्छेयुः ततः श्या
लं कमन्यं वाप्यं चेरन्नुदकं करिष्याम इति सव्रूयात् कुरुध्वं मा चैवं पुनरित्य शतवर्षे प्रेते कुरु
ध्वमेवेन रिस्मिन्निति ततः कृतापसव्या दक्षिणामुखाः प्रकीर्णकेशाः प्रक्षालितैकवस्त्रधराः ओं
अपनः शोशुचदघमिति वामहस्तानामिकया ऽपोदक्षिणतो नीत्वा सकृन्निमज्जेयुः ततो वामह
स्तानामिकया कनिष्ठं पापमित्यपो वलिखेयुः अंगचनविधर्षेयुः ततो द्विवाससस्याचम्य अलेवाप
षाणपृष्ठे वा शुचिनीरदेशे दक्षिणाग्रकुशान्तयोपरि वाम । हस्तान्वारब्धदक्षिणहस्तांगुष्ठतर्जनीमध्यात्मक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पितृतीर्थेन द्विगुणभुग्नकुशत्रयेण प्रेतगोत्रनामनी उच्चार्यामृतं मनसा ध्यायंतः कुशहस्ताः प्रेतायस
तिलजलांजलिं दद्युः ॐ अद्यामुकगोत्र पितरमुकप्रेत एष तिलतोयांजलिस्ते मया दीयते तवोपतिष्ठतामि
ति वाक्येन ततः कंकतिरूपेण वाममुष्टिना वलिरिखितं पाययामिति सव्यांगमवलिखेयुः स्त्रिया उदकदाने
स्त्रीलिंगेन निर्देशः कर्तव्य इति विशेषः इयं च जलदानक्रिया दशमपुरुषपर्यंतं कर्तव्य समानग्रामवा
सिपावदासंसंवंधमनुस्मरेयुस्तावत्पर्येयुः श्वसुरमातामहमातुलाचार्यशिष्यसहाध्यायिमित्रदुहितृ
भगिनीभागिनेयराजर्त्विक्तां तद्दिने प्राप्तिभिः काप्युदकदानं कर्तव्यं पतिताय विठसर्वगामिनीस्तथा संकारजा
त प्रव्रजितात्मत्यागिपाषंडिगर्भभर्तृहर्तृसुरापिवह्हिज स्त्रीणमुदकक्रियां न कुर्यात् पतितस्यतृप्तिमिच्छन्
सर्वगामिनी दत्तेवेतनां दासीमाहूय मुद्दघटहस्तां ब्रूयात् हे दासि गच्छ मूल्येन तिलानानय सत्वरं ततोऽपू
र्णघटत्वं च सतिलं दक्षिणामुखी उपविष्टा तु वामेन चरणेन ततः क्षिपेः कीर्तयेः पातकी संज्ञां त्वं पिवेति
वेदे सुहृः इत्युक्ता चैव दासी सीमृताइति पातकी संज्ञा कीर्तयित्वा अमुकप्रेत त्वं पिवेति पुनः पुनर
भिधाय वामपादेन तोयपूर्णं सतिलं घटमपवर्जयेत् तत उदकदानानंतरमुदकोत्तीर्णान् ज्ञात
वत्स्नांतरपरिधानानाचांतान् पुत्रादीन् शुचिशाद्वलदेशे उपविष्टान् नायमन्यंत संवासकस्यचि
त्केनचित्सह अपि स्वेन शरीरेण किमुतान्यैः पृथग्जनैरित्यादि महाभारतादिवाक्यानि श्रावयित्वा
ऽपनीतशोकान्बंधुजनाः कुर्युः ततः पुत्रादिर्ल्लगुडमादाय मृन्मयेन नूतनभांडेन जलमानीय ग्रामाद्वहिर्दे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वनायतने गृहद्वारि वाश्मचितौ रेवापिण्डदानादेशान्यां दिशि अग्निं प्रज्वाल्य नडुलप्रस्थनि हव्यं प्रक्षाल्य सुश्रु
तं स्वयमुपचेत् ततो दक्षिणप्लवने भूभागे गोमयोपलिप्ते गौरस्थतिकया पिंडार्थं दक्षिणप्लवणं स्थानं नि
र्मायाचांतः कृतापसव्यो दक्षिणामुखः पातित वामजानुः पिंडस्थानोपरि दक्षिणाग्रं कुशत्रयमास्ती
र्य पुटकादौ जल तिलगंधपुष्पाणि प्रक्षिप्य तत्पात्रं वामहस्ते कृत्वा मोटकं तिलजलान्यादाय ॐ
अद्यामुकगोत्र पितरमुकप्रेत शिरः पूरक प्रथम पिंडस्थाने ऽत्रावनेनिक्ष्व ते मया दीयते तवोपतिष्ठता
मिति कुशत्रयोपरि अवनेजनं दद्यात् ततस्तिलघृतमधुयुक्तं दुग्धसिक्तं तन्नमेव पिंडमादाय मोटक
तिलजलानि चादाय ॐ अद्यामुकगोत्र पितरमुकप्रेत एष शिरः पूरकः प्रथमः पिंडस्ते मया दीयते तवो
पतिष्ठतामिति कुशोपरि अवनेजनस्थाने पिंडं दद्यात् विहित काले प्य कृत चूडाकरणस्य विहितका
लेप्यकृतोपनयनस्य मृतस्य पिंडं दद्यात् अन्यवनेजनदानं ॐ अद्यामुकगोत्र पितरमुकप्रेत
शिरः पूरक प्रथम पिंडे ऽत्रान्यवनेनिक्ष्व ते मया दीयते तवोपतिष्ठतामिति पिंडोपरि पूर्ववद्दद्यात्
ततः प्रेतमुद्दिश्य तूष्णीमेव गंधपुष्पधूपदीपोर्णातंतुमयस्वल्पवस्त्रतांबूलानि पिंडे दद्यात् ततो मित्ये
कं तिलतोयांजलिं पिंडोपरि दद्यात् एवं पिंडसमीपे एव ॐ अद्यामुकगोत्र पितरमुकप्रेत इदं तिलतोयं पूर्ण
पात्रेते मया दीयते तवोपतिष्ठतामित्येकं तिलतोयपात्रं दद्यात् पश्चाज्जले सर्वं क्षिपेत् ततः उपलिप्तायां भूमौ माल्यां
पानीयं चानिधाय ॐ अद्यामुकगोत्र पितरमुकप्रेत इदं माल्यानं ते मया दीयते तवोपतिष्ठतां ॐ अद्यामुकगोत्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पितरमुकप्रेत इदं पानीयं ते तवोपतिष्ठतां ओं अद्यामुकगोत्र पितरमुकप्रेत एष दीयते नम मया दीयते न तवोपति
ष्ठतामिति दद्यात् सायंकाले गृहद्वारि प्रेतमुद्दिश्य रात्रौ त्रिरात्रं वा दीपं दद्यात् रात्रौ गोमयोपलिप्तायां भूमौ त्रि
काष्ठिकासमारोपितमृन्मयपात्रद्वये जलं क्षीरं च निधाय समीपे माल्यदीपं च धृत्वा ओं अस्यां रात्रौ अमुकगो
त्रपितरमुकप्रेताऽत्र स्नाहि इदं परिधेहि अनेन पश्येति निवेदयेत् आकाशाधिकरणकदशरात्रावच्छिन्न
प्रेतोद्देश्यकस्नतजलदानं सर्वपापशांत्यध्वश्रमविनाशफलं रात्रौ मृतके सूर्योदये दिवा मृतके नक्षत्रोदये
वहिर्भूयादौ ब्राह्मणानुमत्याऽर्वागपि वालपुरःसरा वृद्धपश्चिमाः क्रमेण गृहद्वारमागत्य तत्रैव निंबपत्रा
णि दंतैश्छित्वा चम्य दक्षिणेन पाणिना ओं शमीपत्रं शमं पातु इति शमी ओं अश्मेव स्थिरो भूयासमित्यश्म
नं ओं अग्निर्नः शर्म पात्वित्यग्निं स्पृशेत् वृषभश्चाग्रयो मेध्योऽसि त्वाज्योगिति मंत्रेण दक्षिणेन पाणि
ना द्वावपि स्पृशेत् ततोऽश्मनि पदन्यासं कृत्वाचम्योदकगोमयगौरसर्षपाग्निदूर्वाप्रवाल वृषभान्संस्पृश्य
गृहं प्रविशेयुः एतच्च कुलीनरजातानामपि शवस्पृशां कर्तव्यम् ज्ञातयो नैव तस्यां रात्रौ अन्नं पचेयुः या
वदाशौचं मृन्मये पात्रे पत्रपुटे पाणौ वा क्रीतं लब्धं मनामिषं दिवा भुंजीरन्नेककालं त्रिरात्रमक्षा
रलवणाशिनः द्वादशरात्रं महागुरुषु माता पिताऽऽचार्य्यश्चेति महागुरवः सर्वे ब्रह्मचारिणोऽक्षता
मलिनवाससा सर्वभोगवर्जिताः शस्त्रपाणयोऽधउपवेशिनः पृथक्शायिनोऽसयोरन् उपवेशने शयने
च तृणप्रस्तरणेन सुप्यासीरन् प्रेतक्रियावर्जमनावश्यकं न किंचित्कर्म कुर्युः पंचमसप्तमनव ॥ ५१

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दिवसेषुसर्वेषामेवसपिंडानांबहिःस्नानंतिलोदकंदानंचवस्त्रप्रक्षालनंगृहभोजनंचतुष्पथस्नानगृहे
षुदीपदानंअंगसंवाहनंचतैलाभ्यंगजागरादिकंप्रेताप्यायनकरम्प्रथमंपिंडवत् द्वितीयादिषुदिवसेषुद्विती
यादिपिंडदानम् तत्रविशेषः द्वितीयदिनेपिंडदानवाक्येकर्णाक्षिनासिकपूरको द्वितीयःपिंडः द्वौतिलतो
यांजली द्वितिलतोयपात्रेतृतीयदिनेगलांसभुजवक्षःपूरकस्तृतीयःपिंडःत्रयस्तिलतोयांजलयः त्रीणिति
लतोयपात्राणि चतुर्थदिनेनाभिलिंगगुदपूरकश्चतुर्थःपिंडश्चत्वारस्तिलतोयांजलयः चत्वारिति
लतोयपात्राणिपंचमदिनेजानुजंघापादपूरकः पंचमपिंडः पंचतिलतोयाञ्जलयःपंचतिलतोयपा
त्राणिषष्ठदिनेसर्वमर्मपूरकःषष्ठःपिंडःषट्तिलतोयजलयः षट्तिलतोयपात्राणिसप्तमदिनेसर्वनाडीपूर
कःसप्तमःपिंडःसप्ततिलतोयांजलयःसप्ततिलतोयपात्राणि अष्टमदिनेदंतमौलौदिपूरकोऽष्टमःपिंडः
अष्टौतिलतोयांजलयः अष्टौतिलतोयपात्राणिनवमदिनेवीर्यपूरकोनवमःपिंडःनवतिलतोयां
जलयः नवतिलतोयपात्राणि दशमदिने पूर्णत्वतृप्तताक्षुद्विपर्ययपूरकोदशमःपिंडोदेयः
दशतिलतोयांजलय दशतिलतोयपात्राणि अन्यत्सर्वं समानं तथाहि शिरस्त्वाद्येनपिंडेन
प्रेतस्यक्रियतेसदा द्वितीयेनतुकर्णाक्षिनासिकास्समासतः गलांसभुजवक्षांसि तृतीयेनयथाक्र
मं चतुर्थेनतुपिंडेननाभिलिंगगुदानिच जानुजंघेतथापादौ पंचमेनतुसर्वदा सर्वमर्माणि
षष्ठेनसप्तमेनतुनाडयः दंतलोमाद्यष्टमेनवीर्यंतुनवमेनतु दशमेनतुपूर्णत्वंतृप्तिताक्षु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्विपर्य्ययः क्षत्रियवैश्यशूद्राणां संपूर्णशौचेनवस्त्रदिनेष्वनवपिंडान्दत्वा शौचांतदिने दशमपिंडदानं अल्पाशौचे ब्राह्मणादिभिः सर्वैःप्रथमदिवसेत्रयः पिंडा दातव्याः द्वितीयदिने चत्वारः तृतीयदिनेत्रयः अथवा प्रथमदिवसेएकः पिंडः द्वितीयदिवसेचत्वारः तृतीयदिवसे पंचः एवंदशपिंडादातव्याःसद्यः शौचेत्वेकाह्नैव दशपिंडादातव्याः असंपूर्णशौचांतेरेएकेकंपिंडमेकेकस्मिन्दिने दत्वासदिनेऽव शिष्टाःपिंडादेयःपाकाशनेफलमूलशाकगुडदुग्धशालिसक्तूनामन्यतमेवपिंडेदेयःयेनद्रव्येनप्रथम पिंडोदत्तसजातीयेनैवपिंडांतरमपिदद्यात् पुत्राद्यधिकारिणिविदेशस्थेऽन्येनदाहकर्त्रापिंडदाने कृतेपिपुत्रादिरपिपिंडंदद्यान्नैवप्रथमः पिंडोदत्तःसएवपिंडांतरमपि दद्यात् अथास्थिसंचय चतुर्थे ब्राह्मणानांतुपंचमेहनिभूभुजां ववमेवैश्यजातीनांशूद्राणांदशमात्परे कर्त्तव्यं तुनरैश्राद्धं देशकालाविरोधतः श्राद्धमत्रास्थिसंचयनिमित्तकम् एतच्चसंपूर्णशौचेसदिनकथनम् एव मशौचिनांसंगस्पर्शोपि चतुर्थेनिविप्रस्यषष्ठेवैक्षत्रियस्यतु अष्टमेदशमेचैवस्पर्शःस्याद्वैश्यशू द्रयोः यत्तुप्रथमेन्हितृतीयेवासप्तमेनवमेपिवा अस्थिसंचयनंकार्यनिजैस्तगोत्रजैः सहेतिस्मृ तिवाक्यंनब्राह्मणादीनांचतुर्थादिदिनेस्थिसंचयासंभवेनायंप्रथमादिवसेस्थिसंचय विधायकं अल्पाशौचेतुद्वितीयेन्हिसद्यःशौचेतद्दिनएवास्थिसंचयः कर्त्तव्यः असंपूर्णशौचां तेरेवतृतीयभागोत्तरमस्थिसंचयोःपस्पर्शश्चकर्त्तव्यइतिअथप्रयोगःचतुर्थदिनेस्नात्वाचतुर्थपिं

Kirtikant Sharma Collection, Najafgarh

दत्वा देवश्राद्धदेशस्य गोमयोपलेपनं पंचगव्योपलेपनं ज्वलदंगारभ्रामणं गौरमृत्तिकाछादनानि कारयि
त्वा गौरसर्षपैस्तिलैश्च विकरणं स्वपंचश्राद्धकर्त्ता पाकमारभेत् ततः सिद्धेन्नेरक्षादीपं संस्थाप्य श्राद्ध
देयानि वस्तून्यासाद्य आचम्य पूर्वाभिमुख उपविश्य ओं अपवित्रः पवित्रो वा इत्यादि पठित्वा पुंडरीकाक्ष
पुनात्विति आत्मदीपवस्तूनी कुशत्रयजलेन सेचनम् ओं अद्यामुकगोत्रस्य पितुरमुकप्रेतस्यास्थिसंचय
निमित्तकमेकोद्दिष्टश्राद्धमहं करिष्ये इति संकल्पं कुर्यात् ततस्त्रिर्गायत्रीं जपित्वा ओं देवताभ्य इति
त्रिर्जपेत् ततो पसव्यं कृत्वा मोटकतिलजलान्यादाय दक्षिणाभिमुखः सव्यं जानु पातयित्वा ओं अद्या
मुकगोत्र पितरमुकप्रेत अस्थिसंचयनिमित्तैकोद्दिष्टश्राद्धे इदमासनं ते मया दीयते तवोपतिष्ठ
तामित्यासनं मोटकरूपमुत्सृजेत् ततो ओं अपहता ऽसुरा रक्षांसि वेदिषद इति श्राद्धदेशे वाम
वर्त्तेन तिलान्विक्षिपेत् ततो ओं आपस्सुन इति मंत्रं जपेत् ततः पुटके कुशपत्रद्वयं प्रादेशमात्रं द
क्षिणाग्रं धृत्वा ओं शन्नोदेवीरभिष्टय इति तत्र जलं दद्यात् ओं तिलोसीति तिलान् दद्यात् तूष्णीं गंधपु
ष्पं च तत्र क्षिपेत् ततस्तदर्घपात्रं वामहस्ते कृत्वा कुशत्रयद्वयं परिवेषणपात्रे उत्तराग्रं धृत्वा तदुपरि
किंचिदुदकं तत्र दत्वा ओं या दिव्या ऽआप इत्यादि पठित्वा मोटिकादिन्यादाय ओं अद्यामुकगोत्रपितरमुक
प्रेतास्थिसंचयनिमित्तैकोद्दिष्टश्राद्ध एष हस्तार्घस्ते मया दीयते तवोपतिष्ठतामिति पवित्रोपरि अर्घजलं द
द्यादुत्सृजेत् ततः पवित्रपुष्पसहितमर्घपात्रमासनवामपार्श्वे पितृस्थानमसीति अधोमुखं कृत्वा स्थापयेत्

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ततोमोदकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतास्थिसंचयननिमित्तकैकोदिष्टश्राद्धएतानिगंध
पुष्पधूपदीपनैवेद्यतांबूलयज्ञोपवीतवासांसितेमयादीयंतेतवोपतिष्ठतामितिनिगंधादीनि दद्यात् ततोजलेना
सनभोजनपात्रयोश्चतुर्दिक्षुमंडलंकृत्वा आहीयान्वाग्रभागंसघृतव्यंजनतिलजलं ॐ इदमन्नमेतद्भू
स्वामीपितृभ्योनम इति उत्सृजेत् ततोहस्ताभ्यांताम्रपात्रमन्नपूर्णमादायमनाक्स्थित्वापितॄन्ध्या
यन् पुरुषत्रिक्षममन्नंपरिविष्यात् व्यंजनघृतजलान्युपनीय अन्नोपरिमधुदत्वा ॐ मधुदत्वा ॐ
मधुवाताइत्यादित्रयं ॐ मधुमधुमध्विति च जपेत् ततोव्यस्ताभ्यांहस्ताभ्यामधोमुखाभ्यांपात्रमालभ्य
ॐ पृथिवीतेपात्रमितिपठेत् ॐ विष्णुरितिजपेत् हव्यकव्यमिदंरक्षस्वमदीयमितिपठित्वा ॐ इदमन्नम्
ॐ इदमापः ॐ इदंहविरिति अन्नजलघृतान्नेषु दक्षिणहस्तांगुष्ठंनिवेश्य ॐ अपहताइतितिलान्नवो
परिक्षिप्त्वावामहस्तेनपात्रमत्यजत् दक्षिणहस्तेनमोदकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुक
मुकप्रेतास्थिसंचयननिमित्तकैकोदिष्टश्राद्ध इदमन्नंसोपकरणंतेमयादीयतेतवोपतिष्ठतामित्युत्सृजे
त् ततोगायत्रीमधुवाता इत्यादित्रयं ॐ मधुमधुमध्विति ॐ अन्नहीनंक्रियाहीनंमितिजपेत् ततः
कुशेषूपविश्यगायत्रीमधुवाताइत्यादिकंजपेत् ततः ॐ कृणुष्वपाज इत्यादिरक्षोघ्नीः ॐ उदी
रतामित्यादि पितृमंत्रान् पुरुषसूक्तमप्रतिरथमन्यानिचपवित्राणियथाशक्तिजपेत्
ॐ नमस्तुभ्यमिति श्लोकंचजपेत् ततउच्छिष्टसन्निधावास्तृतकुशत्रयांसू ॥ ॥ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मिंजलेन प्रोक्षतिलघृतसहितमन्नजलेनाप्लाव्य ॐ अनग्निदग्धायेजीवायेप्रदग्धा कुले मम इत्यादिमंत्रेण
कुशोपरि अन्नं विकिरेत् ततः सव्यं कृत्वाचम्य हरिंस्मृत्वा अपसव्यं कृत्वाऽन्नपात्रे समीपे पिंडदानार्थं
मृत्पिंडकायां मध्ये प्रादेशमात्रं परिमाय वाम्वारब्धदक्षिणहस्तेन ॐ अपहता इत्यादिनत्तद्विलिख्य दर्भं
पिंजुलीमुत्तरस्या दिशि क्षिप्त्वा रेखोपरि ॐ ये रूपाणीति मंत्रेणाग्निं पारंभ्रामयित्वा गारदक्षिणतः क्षिपेत् त
तो रेखोपरि छिन्नमूलान्कुशान्नास्तीर्य ॐ देवताभ्य इति सव्येन त्रिर्जपेत् ततः सव्येन पुटके जलं तिलगं
धपुष्पाणि क्षिप्त्वा पुटकं वामहस्ते कृत्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्र पितरमुकप्रेताऽस्थिसंच
यनिमित्तिकैकोदिष्टश्राद्धपिंडस्थानेऽत्रावनेनिक्ष्व ते मया दीयते तवोपतिष्ठतामिति कुशोपरि अवने
जलं किंचिद्दद्यात् ततो घृतमधुतिलयुक्तेनान्नेन पिंडं निर्माय घृतमधुभिर्धारितं पिंडं मोटकादीनि चा
दय ॐ अद्यामुकगोत्र पितरमुकप्रेतास्थिसंचयनिमित्तिकैकोद्दिष्टश्राद्धे एष पिंडस्ते मया दीयते तवो
पतिष्ठतामिति कुशोपरि वामान्वारब्धदक्षिणहस्तेन पिंडं दद्यात् ततश्चास्तृतकुशमूले नृस्मीकारत्रो
ञ्छ्य सव्यं कृत्वाचम्याऽपसव्यं कृत्वा ॐ अत्र पितरमादयध्वमित्यादी मंत्रं पठित्वा उत्तराभिमुखी भूय श्वा
सनिरोधं कुर्यात् पितरं भास्करमूर्तिं ध्यायन् अमीमदन्त पितरो यथेत्यादिनाऊहेन जपेत् ततः
पूर्वावशिष्टजलमवनेजनपात्रं वामहस्ते कृत्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्र पितरमुक
प्रेताऽस्थिसंचयनिमित्तकैकोद्दिष्टश्राद्धपिंडेऽत्र प्रत्यवनेनिक्ष्व ते मया दीयते तवोपति । ६०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ष्ठतामिति प्रत्यवनेजनं दद्यात् ततो नीवीविस्रंस्य सव्यं कृत्वा चम्य हरिं स्मृत्वा अपसव्यं कृत्वा वाम
हस्तेन सूत्रमादाय कराभ्यां तद्गृहीत्वा एतत्ते पितर्वासः इति सूत्रं पिंडोपरि धृत्वा ओं अद्यामुकगोत्र पि
तरमुकप्रेताऽस्थिसंचयनिमित्तिकैकोदिष्टश्राद्धे पिंडे एतद्वासस्ते मया दीयते तवोपतिष्ठतामिति
मोदकादिना दद्यात् ततः पिंडं गंधपुष्पधूपदीपतांबूलैरभ्यर्च्य पिंडशेषान्नं पिंडसमीपे विकरये
त् ओं शिवा आपः संतु ओं सौमनस्यमस्तु ओं अक्षतं चारिष्टमस्तु इति अन्नपात्रे जलादीनि दत्वा मोदकादी
न्यादाय ओं अद्यामुकगोत्रस्य पितुरमुकप्रेतस्यास्थिसंचयनिमित्तके कोद्दिष्टश्राद्धे दत्तैतदन्नपानादिक
मुपतिष्ठतामित्युत्सृजेत् ततः सव्यं कृत्वा दक्षिणां दिशमपश्यन् ओं अघोरः पितास्त्विति पिंडोपरि पूर्वा
ग्रां जलधारां दद्यात् ततः पूर्वाभिमुखः ओं गोत्रं नो वर्द्धतां दातारो नोभिवर्द्धंतां वेदः संततिरित्यादिना आ
शिषो याचेत् ततो सव्यं कृत्वा पिंडोपरि सपवित्रान् कुशान् स्तीर्त्वा पुटकादि जलेन ओं ऊर्जं वहंती
रमृतं घृतं पयः इत्यादि पठित्वा कुशोपरि दक्षिणाग्रां जलधारां दद्यात् ततः पिंडमाघ्राय उत्थापये
त् छिन्नमूलकुशानां गात्रं वायो देहेत् अर्घपात्रमुत्तानीकृत्य मोदकादीनि दक्षिणा द्रव्यं चाद
य ओं अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य कृतैतदस्थिसंचयनिमित्तिकैकोदिष्टश्राद्धप्रतिष्ठार्थ
मिदं रजतं चन्द्रदैवतं यथा नामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति दक्षिणां दद्यात्
ततः स्वध्येन त्रिदेवताभ्य इति जपित्वाऽपसव्यं कृत्वा दीपं निर्वाप्य हस्तपादौ प्रक्षाल्य सव्येन चम्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ प्रमादादित्यादि पठित्वा विष्णुं स्मरेत् आच्छोय वस्तूनि ब्राह्मणाय प्रतिपादयेत् ततः पुत्रादिर्ज्ञातिबंधु
मिलितः स्नातः सुधौत वस्त्रो नानाविध फलमूल भक्ष्य पानादिभिः स्वजात्यनुरूपैश्च पात्राणि पूरयित्वा
गंधपुष्पधूपदीपादीं कंच गृहीत्वा श्मशान समीपमागत्य त्वरान्वितैः कैश्चिदर्भैः कैश्चित्पुष्पैः कैश्चिन्
जनैः कैश्चिद्धूपैः कैश्चिद्दीपैः कैश्चिन्माल्यैः कैश्चित्पानीयैः कैश्चिदक्षतैः संविनिवेदयेत् कैश्चिन्निरह्न
कारयुक्तैः समं तत्र चतुर्षु अन्नादि पूर्णपात्रेषु निवेदितेषु प्रथमं चितायाउत्तर द्वार समीपे उपविश्य
ॐ नमः क्रव्याद मुखेभ्यो देवेभ्य इति सर्वदा येऽस्मिन् श्मशाने देवाः स्युर्भगवंतः सनातनाः तेऽस्मत्स
काशाद्गृह्णन्तु बलिमष्टांगमक्षयम् प्रेतस्यास्य शुभान् लोकान् प्रयच्छंतु च शाश्वतान् अस्माकमायुरा
रोग्यं सुखं च दददतां वरं इति पठित्वा ॐ राधोऽष्टांगबलि शंकरादि देवताभ्यो नमः इत्येकं बलि दत्वा एवं
प्रदक्षिण क्रमेण परं बलित्रयं त्रिषु द्वारेषु दत्वा तान्बलीन् क्षीरेणाभ्युक्ष्य शंकरादि देवताः स्वोपक्षी
पस्थानं गच्छंतिति देवता विसृज्य अवशिष्ट क्षीरेण वाग्यता चितास्थानस्थीनि अभ्युक्ष्य प्रथमं शि
रो स्थीनि शमीपलाश शाखाभ्यां सुद्धृत्याज्येनाभ्युक्ष्य गंधवारिणा सिक्त्वा कृतापसव्यो दक्षिणां
गुष्ट कनिष्ठाभ्यां गृहीत्वा ततोऽन्यान्यपि अस्थीनि गृहीत्वा पंचगव्येन सुगंध वारिणा सिक्त्वा प
लाशपुटे निक्षिप्य क्षौमवस्त्रेण संवेष्ट्य मृन्मये नूतन भांडे साच्छादने निदध्यात् तद्भांडमरण्ये वृक्ष
मूले वायं कशो वले यत्र रगजैर्वा निम्नं निधापयेत् चिताभस्मादिनोये निक्षिपेत् गोमयांबुभिश्चिता

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भूमिशुद्धिं विधाय पूर्ववच्चतुर्दिक्षु शंकरादिदेवताभ्यो बलिं नयादियुक्तान् नमः क्रव्यादमुखेभ्यो देवेभ्य
इति मंत्रेण दद्यात् तान्विसृजेत् बल्यन्नमन्नेभ्यो दद्यात् अंभसि वा क्षिपेत् ततश्चिता भूमेराच्छादनार्थं १
वृक्षः पुष्करकः पट्टको वा कारयितव्यः पुष्करकः इष्टिकानिर्मितं देवकुटकाकारं गृहम् ततः सचैलो बं
धुभिः सह स्नायात् अथ कश्चित्सुतपौत्रः सहोदरादिर्गंगातीरमस्थीनि नीत्वा स्नात्वा तान्यस्थीनि पंचग
व्येन शोध्य हिरण्यमध्वाज्यतिलैः संयोज्य मृत्पिंडपुटे निधाय दक्षिणां दिशं पश्यन् ॐ नमोस्तु धर्म्मायेति
वदन् जलं प्रविश्य स मे प्रीतो भवत्विति स्वर्गकामो दक्षिणमुखः स मे प्रीत इत्युक्त्वा गंगांभसि निक्षिपेत् ततः स्नात्वा
उत्थाय सूर्यं पश्येत् ततः आचम्य ॐ अद्य कृतैतदस्थिप्रक्षेपप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतं यथाना
मगोत्राय ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् एवं कृते प्रेतस्य धरास्थितस्य स्वर्गे गतिः स्या
तु महेन्द्रतुल्या यावदस्थि मनुष्यस्य गंगातोये यमज्जति तावद्वर्षसहस्राणि स्वर्गलोके महीयते गंगातोयेषु
यस्यास्थि प्लवते शुभकर्मणः न तस्य पुनरावृत्तिर्ब्रह्मलोकात्कथंचन गौडाः दशाहाभ्यन्तरे यस्य गंगातोयेस्थि
मज्जति गंगायां मरणे यादृक् तादृक् फलमवाप्नुयात् ब्रह्मपुराणे मातुः कुलं पितृकुलं वर्जयित्वा नराध
मः अस्थीन्यन्यकुलोत्थानि नीत्वा चान्द्रायणं चरेत् एवं च मातृकुलान्यकुलान्यस्याप्यस्थिनयने धर्मे
बुद्ध्या दोषाभावः आचारान्निरग्नेरप्यस्थिपर्णनरदाहः दाह्यशरीरालाभे तदस्थिप्रोक्षणाभ्युक्षणेन दाह्य
हेतुः अस्थ्नामप्यलाभे षष्ट्यधिकपलाशपत्रशतत्रयेण पुरुषाकृतिं विन्यस्य ॐ असौ स्वर्गा ॥ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आ. यलोकायस्वाहेतिदहेत् उदकधारांदद्यात् तद्विन्यासप्रकारस्तु शिरस्यशीत्यर्द्धंदद्यात् ग्रीवायांतु द
वि. शैवतुबाह्वोश्चैवशतंदद्यात् दंगुलोष्ठनखादश्याउरसि त्रिंशतंदद्यात् विंशतिंजठरेतथा अष्टार्द्धंतुशिश्नेदद्या
६५ त् द्वादशार्द्धंवृषणयोः ऊर्वोश्चैवशतंदद्यात्रिंशतंजानुजंघयोः पादांगुलीषुदद्यादेवतन्यत्रविकल्पनं अन
हिताग्नेर्दहस्तदाखोशृष्याग्निनाद्विजैः तदलाभेपलाशोत्थैः पत्रैः कार्यंपुमानपि शतैस्त्रिभिस्तथाषष्ट्याश
रश्चात्तैविधानतः देष्टितव्यस्तथापश्चात् कृष्णसारस्यचर्मणः ऊर्णसूत्रेणबध्वाथप्रलिप्तव्यस्तथाय
वैः सपिष्टैर्जलसंमिश्रैः प्रदग्धव्यस्तथाग्निना अथोत्सर्गोयलोकायस्वाहेत्युक्त्वास्वसांयवैः एवंप
र्णनरंदग्ध्वात्रिरात्रमशुचिर्भवेत् तुल्यन्यायतयाऽस्थिरहितपित्रिखाशौचं एवंकृतेनष्टेऽस्थ्यान्यायद्या
गच्छेत्पुमान्क्वचित् कुर्याद्यथायुषीष्टिंपुनराधायपावकंसाग्नेरियमिष्टिः निरग्नेस्तुशांतिःस्व
स्त्ययनमन्यदिनि अथाशौचांतदिने कार्यंतत्राशौचांतपूर्वदिनेसर्वेषांस्वजनानांहस्तशुद्धिःकार्येति
तव्या अशौचांतदिवसेगृहशुद्धिंकृत्वामृण्मयानांभांडानित्यक्त्वास्नात्वादशमंपिंडंदत्वास्नात्वाब
हिरुदकांतेकेशलोमनखान् यथायोग्यंवापयित्वा तिलतैलेनाऽऽमगौरसर्षपकल्केनशिरस्स्नानम
न्यस्नात्वाप्रेतस्यष्टवासांस्यन्येभ्यःस्वाश्रितेभ्योदत्वाऽऽचम्यवाग्यतोवासोयुगमः हतेनवंशसद्भूपरातनंवाय
तंभद्रवर्णंपरिधायाऽश्मानिदृष्टोसुवर्णंगोरोचनंदधिदूर्वासितसितसर्षपंब्राह्मणाग्निंक्षत्रियोवाहनायुधंवैश्या
मतोदतृग्रहौशूद्रोयष्टिंसंस्पृश्यमंगलानिसंकीर्त्यब्राह्मणान्स्वस्तिवाचयित्वागृहंप्रविशेत् अ ६५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रा. त्रदिने ब्राह्मणः पंचगव्यपानं कुर्वीतेति सतामाचारः इति श्राद्धविवेके प्रथमः क्रियापरिछेदो द्वितीयः
वि. अथैकादशाहश्राद्धार्थं निमंत्रणादि तत्रादौ अशौचांतदिने निरामिषमेकवारं भुक्त्वा रात्रौ सर्वभुक्तजने
६५ गृहे विप्रनिवेशस्थानं गोमयोपलिप्तं दक्षिणप्रवणभूमौ ब्राह्मणमुदङ्मुखमुपवेश्य कृतापसव्यो दक्षिणाभि
मुखो नामितवामजानुः ओं गतोसि दिव्यलोकं त्वं कृतान्तविहितान्पथः मनसा वायुभूतेन विप्रे त्वाहं
नियोजये पूजयिष्यामि भोगेन इति प्रेतोद्देशेन पठित्वा पुष्पचंदनतांबूलानि ब्राह्मणाय दत्वा ब्राह्मणजानु
स्पृष्ट्वा ओं अस्यां रात्रौ अमुकगोत्रस्य पितुरमुकप्रेतस्य ऽऽद्य श्राद्धकरणाय भवंतं ब्राह्मणमहं मंत्रये इत्यामंत्र
येत् ओं आमंत्रितोस्मीति प्रतिवचने ब्राह्मणेनोक्ते ओं अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः भवितव्यं भवता
च मया च श्राद्धकारिणा सर्वायासविभुक्तेन कामक्रोधविवर्जितेन भवितव्यं भवता च अध्वलने श्राद्धकर्मणि इति
ब्राह्मणमुद्दिश्य पठेत् यद्यविघ्नेन रजनी यास्यति तदा सर्वमेतत्करिष्यामि इति तेनोक्ते ओं इदं ते पाद्यमिति
पाद्यं दत्वा द्विजं नमस्कृत्य प्रेतमुद्दिश्य तिलतैलमाजानु विप्रपादौ प्रक्षालयेत् अत्र स्त्रिया अप्युद्दे
श्यत्वे ओं गतोसीत्यविकृतमेव पठनीयं आत्मत्वेनोद्देश्यत्वात् अथैकादशाहकृत्यं वह्निर्नदीतो
रादौ प्रातः श्वेतवस्त्रयुगलेन स्नात्वा सूर्योदये ब्राह्मणस्य श्मश्रुकर्मनखच्छेदनं च कारयित्वा ता
म्रपात्रेण तैलोद्वर्तनेन स्नानोपकरणं च दद्यात् स्वयं स्नात्वा कृत्वा नित्यक्रियो नदीतीरे गृ
हे वा श्राद्धभूमिं परिकल्प्य पंचगव्येनोपलिप्य ज्वलदंगारैः संशोध्य गौरमृत्तिकया ऽऽ छा ६५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

घतिलैः सर्षपैश्च विकिरेत् गोमयोपलिप्ते तत्पाकस्थाने तिलान्विकीर्य परितः छागान्बंधयित्वा तु
त्रसपिंडद्वारा स्वयं वा नूतनमृन्मयभांडे पाकमारभेत् ततश्चांतः पूर्वाभिमुखः उदङ्मुखाय शय्याद
द्यात् तत्र ॐ सोपकरणशय्यायै नमः ॐ ब्राह्मणाय नमः इति देयब्राह्मणौ त्रिः संपूज्य इमां सोपक
रणं शय्यां ददानीति द्विजकरे जलदानं वारिणा शय्याभिषेचनं च ॐ ददस्वेति प्रतिवचनम् तत्र
कुशत्रयतिलजलान्यादाय ॐ अद्याशौचांतद्वितीयेऽह्नि अमुकगोत्रस्य पितुरमुकप्रेतस्य स्व
र्गप्राप्तिकाम इमां सोपकरणां शय्यां विष्णुदैवतां अमुकगोत्रायामुकशर्म्मणे ब्राह्मणायमहं
संददे इति दद्यात् ॐ स्वस्तिति प्रतिवचनम् ततः कुशत्रयतिलजलानि दक्षिणद्रव्यं चादाय
ॐ अद्य कृतैतत्सोपकरणशय्यादानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्म
णे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति दद्यात् ततः प्रतिगृहीतः ॐ स्वस्तीति प्रतिवचन
मुक्त्वा सोपकरणां शय्यां तुभ्यमहं संस्पृशेत् ततः आचम्य ॐ फलवस्त्रसमन्वितकांचनपुरुषं
ददानीति यनमः ॐ ब्राह्मणाय नमः इति देयब्राह्मणौ त्रिः संपूज्य ॐ इमं फलवस्त्रसमन्वितकांच
नपुरुषं ददानीति द्विजकरे जलदानं वारिणा देयद्रव्यसेचनं कुशत्रयादीन्यादाय ॐ अद्याशौचांत
द्वितीयेऽह्नि अमुकगोत्रस्य पितुरमुकप्रेतस्य स्वर्गप्राप्तिकाम इदं फलवस्त्रसमन्वितकांचनपुरुषं विष्णु
दैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति दद्यात् ॐ स्वस्तीति प्रतिवचनं ततो दक्षिण

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्रव्यमादाय ओं अद्यकृतैतत्फलवस्त्रसमन्वित कांचनपुरुषदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतंअ
मुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ततप्रतिगृहीतः ओं स्वस्तीत्युक्त्वा कांचनपुरुषस्य
शेत् ततआचम्य कुशत्रयतिलजलान्यादाय ओं अद्याशौचांतद्वितीयेह्नि अमुकगोत्रस्य पितुरमुकप्रेत
स्य स्वर्गप्राप्तिकामो द्विजदंपती पूजयेत् तत्रक्रमः एषोऽर्घ्यः ओं द्विजदंपतिभ्यां नमः इदमनुलेपनं ओं द्विजदं
पतिभ्यां नम इत्युभयोरपि पूजां कुर्यात् ततः पुष्पजलाभ्यामेतानि धूपदीपतांबूलनैवेद्यसिंदूरविभूष
णवासांसि द्विजदंपतिभ्यां नम इति दद्यात् तौ नम इति कुर्य्यात् एतच्च द्विजदंपतिपूजनं प्रधानत्वात् वृषोत्स
र्गाकरणेपि कर्तव्यं शय्यादानवदिति अथ वृषोत्सर्गप्रयोगः तत्र वृषोत्सर्गसंभृतिं विविक्तनिर्जनवनगो
मध्यो वसुदक प्रवणं देशं नयेत् ततः आचांतः पूर्वाभिमुख उपविश्य कुशत्रयतिलजलान्याद
य ओं अद्याशौचांतद्वितीयेह्नि अमुकगोत्रस्य पितुरमुकप्रेतस्य मोक्षकामः सोपकरणवत्स
तरीचतुष्टयसहितवृषोत्सर्गमहं करिष्ये इति संकल्पं कुर्य्यात् नीलवृषप्राप्तौ नीलपदप्रक्षेपः क
र्तव्यः कार्तिक्यां वृषोत्सर्गे ओं अद्यकार्तिक्यां तिथौ अमुकगोत्रस्य पितुरमुकशर्मणो मोक्षकामो
ऽपूपान् दत्वा सोपस्करण वत्सतरीचतुष्टयसहित वृषोत्सर्गमहं करिष्ये इति संकल्पे विशेषः व
त्सतर्य्यष्टकपक्षे चतुष्टये पदस्थाने ऽष्टक पदप्रक्षेपः ततः उत्तराभिमुखं ब्राह्मणमुपवेश्य ओं अ
द्यामुकगोत्रस्य पितुरमुकप्रेतस्य कर्तव्य वृषोत्सर्गांग भूतहोमकर्मणि कृताकृतावेक्षण ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रूपब्राह्मणकर्मकर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचंदनतांबूलवस्त्रयुगहेमाल
श्रा॰ रूपब्राह्मणकर्म कर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचंदनतांबूलवस्त्रयुगहेमाल
वि॰ ह्मत्वेनत्वामहंवृणे इति ब्राह्मणं ब्रूयात् ॐ वृतोस्मीति प्रतिवचनं ॐ यथाविहितं कर्म कुरु इति
६८ सुहिश्यवहेत् ॐ करवाणीतितत्प्रतिवचनं ततो ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य कर्तव्यवृषो
भूत होम कर्म कर्तुममुकशर्माणं ब्राह्मणमेभिः पुष्पचंदनतांबूलहेमालंकरणवासोभिर्होतृत्वेन
इत्याचार्यं वृणुयात् ॐ वृतोस्मीति प्रतिवचनं ॐ यथाविहितं कर्म कुरु इति यजमानस्तमुद्दिश्य वदेत् ॐ
तत्प्रतिवचनं ततो होता आचान्तो गोमयोपलिप्तवेदिकायां प्राङ्मुख उपविश्य पुरतः कुशैर्हस्तमात्रं च
डिलं परिसमुह्य कुशानैशान्यां क्षिप्त्वा गोमयोदकेनोपलिप्य मध्ये प्रादेशमात्रमुत्तरोत्तरक्रमेण स्रुवमू
लेन उल्लेखनक्रमेण दक्षिणांगुष्ठानामिकाभ्यां संगता पांसूनुद्धृत्य ऐशान्यां तत्क्षिप्त्वा तद्देशं जल
नत्र दक्षिणहस्तस्थकांस्यपात्रस्थमग्निं स्थापयेत् अग्नेर्दक्षिणतः परिस्तरणभूमिमतिक्रम्य सुहु
पकल्प्यः तत्र प्रागग्रकुशैः स्तरणं विधाय ब्राह्मणमग्नेर्वायव्यां दक्षिणमानीय कल्पितासने व
मुदङ्मुखमुपवेशयेत् ततोऽग्नेरुत्तरतः स्तरणभूमिमतिक्रम्य प्राग्ग्रमस्तीर्य तत्र सामर
त्रस्थं बर्हिषा छादितं सर्वकार्यार्थमुदकं क्षीरं च ब्रह्ममुखमवलोक्य निदध्यात् ततः
र्हिषामुष्टिं चतुर्थभागेनाग्नेः पार्श्वे ऐशान्यां तत्प्राच्याम् ब्रह्मणोऽग्निपर्यन्तं दक्षिणस्याम्
वायव्यां पश्चिमायाम् अग्नितः प्रणीतापर्यन्तं दक्षिणस्याम् नैर्ऋत्या वायव्यं पश्चि

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ग्नितः प्रणीतापर्यन्तमुदस्योत्तरेण कुर्यात् ततः आसादनमुपयोक्ष्यमाणानामग्नेरुत्तरतः प्रतीत
मोप्राक् संस्थमुदक् संस्थं वा तद्यथा पवित्रच्छेदनार्थं कुशत्रयं पवित्रार्थमनं गर्भिणं साग्र
द्वयं प्रोक्षण्यर्थं मृत्पात्रं। आज्यार्थं ताम्रस्थाली पायसचर्वर्थं मृत्तिकास्थाली स्रुवसंमार्ग
कुशत्रयं उपयमनार्थं वेणीरूपकुशत्रयं प्रादेशमित पलाससमित्त्रयम् स्रुव आज्यं तंडुलाद्दुग्
धमाज्यतदुत्तरतः पौष्णं सिद्धमेव पिष्टमयं चरुं ब्रह्मचरणार्थं पूर्णपात्रं होतृदक्षिणार्थं वस्त्र
वर्णं कांस्यामुपकल्पयेत् ततोऽनन्तरम् आसादितकुशपत्रद्वयमादाय पवित्रच्छेदनकुशैः प्रादेश
मनायच्छिंद्यात् तंमयास्य पवित्राभ्यां प्रणीतोदकमुन्मूयसन्निवः करेण प्रणीतोदकं त्रिप्रोक्षण्यं
कुउदगग्रपवित्रेऽत्र स्नहस्तयोरंगुष्ठानामिकाग्राभ्यामन्तयोरादयतन्मेन प्रोक्षण्युदकभूमौ त्रिः दि
णप्रोक्षण्यां निधाय तत्पात्रं दक्षिण हस्तेनादाय वामे निधाय दक्षिण हस्तानामिकांगुष्ठाभ्यां त
त्रिरूर्ध्वमुत्क्षिप्य प्रणीता जलेन प्रोक्षणी रनिषिच्य तज्जलेन यथासादितं द्रव्यं प्रत्येकं सकृन्प्रोक्ष्य पवि
जलसहितपात्रं प्रणीताग्न्योरंतरे निधाय आज्यस्थाल्यामाज्यं निरुप्य चरुस्थाल्यां तंडुल
प्य प्रणीतोदकेन ताभ्यां प्रक्षाल्य: तत्र प्रणीतोदकं दुग्धं च प्रक्षिप्य स्वयं चरु ब्रह्मणा
गृहीत्वा प्रदक्षिणी कृताग्निं पूर्वेण नीत्वा दक्षिणत आज्यमुत्तरतः पाप संचरुं श्रयणार्थ
पादग्नौ निधाय उल्मुकसहितं काग्नेः प्रदक्षिणं भ्रामयित्वा तत्रैव क्षित्वा स्रुवस्य

प्रा॰वि॰ ७० गणसावादुः स्रुवस्याग्नौ प्रतपनमुत्तानस्य संमार्ज्जनं कुशैराभ्यन्तरतोऽग्रान्मूलपर्यन्तं मध्येमध्यत एवमूले
बाह्यतो मूलादग्रपर्यन्तं संमार्ज्जनं प्रणीताद्भिरभ्युक्षणं पुनः प्रतपनं सान्मृनवर्हिः स्व पुरतः प्रागग्रस्य
स्थापनं विधाय ततः पाके कृते स्वयमाज्यमुद्वास्याग्निपश्चिमेन नीत्वा प्रणीतोत्तरतश्चरुं निधाय प्रोक्षणी
तः पवित्रे समानीय आज्ये प्रोक्षणी वहुत्यवनं पवित्रे प्रोक्षण्यं निधाय आज्यमवेक्ष्य सत्यपद्रव्ये तन्निर
स्य प्रोक्षण्युत्पवनं निधाय पायसचरोरुत्तरतः पूर्वसिद्धपिष्टकचरुं निधाय होमसमाप्तिपर्य्यन्तं सुप
ग्रहार्थं कुशैर्वामहस्ते उपग्रहं विधाय प्रजापतिं मनसा चिंतयन्नुत्तिष्ठन् प्रागग्रघृताक्तसमित्त्रयं व
न्हौ प्रक्षिप्योपविश्य प्रोक्षण्यद्भिः सह विष्कम्भमग्नौ प्रणीता ब्रह्मसहितं पर्य्युक्ष्य पवित्रे प्रणीता सुनि
धाय प्रोक्षणीपात्रं स्वस्थाने निदध्यात् ततो ब्रह्मणा कर वर्हिषान्वारब्धो दक्षिणजानुनाऽऽपित्वा
संस्रवं विनैवाज्येन जुहुयात् स्वाहान्तो होमः इदमग्नये इति त्यागः इह रतिः स्वाहा इदमग्न
ये १ इह रमध्वं स्वाहा इदमग्नये २ इह धृतिः स्वाहा इदमग्नये ३ इह स्वधृतिः स्वाहा इदमग्न
ये ४ उपसृजं धरुणं मात्रे धरुणो मातरम् इदमग्नये ५ रायस्पोषमस्मासु दीधरत स्वाहा इद
मग्नये ६ ततः प्राक् ऋजुमग्नेर्दक्षिणभागे मनसा ओं प्रजापतये स्वाहा इदं प्रजापतये १ अग्ने
उत्तरभागे ऋजु प्राक् ओं रुद्रायस्वाहा इदं मिद्राय २ तत उत्तर पूर्वार्द्धे ओं अग्नये स्वाहा इदमग्न
ये १ दक्षिणपूर्वार्द्धे ओं सोमायस्वाहा इदं सोमाय २ इत्याघारावाज्यभागौ च संस्रवं हुत्वा पापा ७०

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संपेष्टकमेकं चावदाय समिद्धतमे ग्नौ संस्त्रवं विनैव पायसेन जुहुयात् ओं अग्नये स्वाहा इदमग्नये
ओं रुद्राय स्वाहा इदं रुद्राय २ ओं सर्वाय स्वाहा इदं सर्वाय ३ ओं पशुपतये स्वाहा इदं पशुपतये ४ ओं उ
ग्राय स्वाहा इदमुग्राय ५ ओं अशनये स्वाहा इदमशनये ६ ओं भवाय स्वाहा इदं भवाय ७ ओं महादेवाय स्वा
हा इदं मीशानाय ८ इति हुत्वा पृष्टकेन ओं पूषण ऽ अन्वेतु नः पूषा रक्षत्वर्वतः पूषा वाजᳫं सनोतु नः स्वाहा
इदं पूष्णे १ ततपापसपिष्टकाभ्या सुजरार्द्धावदानभूताभ्यां ओं अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्ट
कृते अग्नेर्मध्यभागेनतः आज्येन ओं भूः स्वाहा इदं भूः १ ओं भुवः स्वाहा इदं भुवः ओं स्वः स्वाहा इदं स्वः
३ ओं त्वन्नो ऽग्ने वरुणस्य विद्वान्देवस्य हेडो ऽअवयासिसीष्ठाः यजिष्ठो । वन्हितमः शोशुचानो वि
श्वा द्वेषाᳫंसि प्रमुमुग्ध्यस्मत्स्वाहा इदमग्निवरुणाभ्याम् ४ ओं सत्वन्नो ऽग्नेवमो भवोती नेदिष्ठो ऽस्या
ऽउषसो व्युष्टौ अवयक्ष्वनो वरुणᳫं रराणो वीहि मृडीकᳫं सुहवो न ऽएधि स्वाहा इदमग्नी
वरुणाभ्याम् ५ ओं आयाश्चाग्नेस्यभिनाभिशस्तिपा सत्यमया असि अयानो यज्ञं वहास्य
यानो धेहि भेषजᳫं स्वाहा इदमग्नये ६ ओं ये ते शतं वरुण ये सहस्रं यज्ञियाः पा
शा वितता महान्तः तेभिर्नो ऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ओं उदुत्तमं वरुण पाशमस्म
दवाधमं विमध्यमᳫं श्रथाय अथा वयमादित्य व्रते तवानाग ॥ ॥ ॥ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पवित्राभ्यांशिरःप्रभृतिसंमार्जनं ॐ सुमित्रीयानआपःॐ षधयः सन्त्वितिमंत्रेण ततः ॐ दुर्मित्रियास्तस्मैसं
न्तु योस्मान् द्वेष्टि यंच वयंद्विष्म इति मंत्रेण प्रणीतोदकमैशान्यांनिनयेत् ततः फलपुष्पान्वितघृतेन
ॐ मूर्द्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतःआजातमग्निंकविं सम्राजमतिथिंजनानामासन्ना
पात्रंजनयन्तदेवाःस्वाहा इदमग्नयेः इतियजमानसहितहोता पूर्णाहुतिंकुर्यात् ततःस्तरणक्रमेणबर्हिं
हृत्वाप्याज्येनाभिघार्यॐ देवागातुविदोगातुंवित्वागातुमितमनसस्पत इदमंदेवयज्ञं स्वाहा वातेधाः
स्वाहा इदमग्नये इति बर्हिर्होमं हस्तेनैवकुर्यात् ततोयजमानः कुशत्रयतिलजलान्यादायॐ अद्य
कर्तव्यवृषोत्सर्गाङ्गभूतकृतैतद्धोमकर्मणि कृताकृतावेक्षणरूप ब्रह्मकर्म प्रतिष्ठार्थमिदं पूर्णपात्रं
प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय ब्रह्मणे दक्षिणां तुभ्यमहंसंप्रददे इति ब्रह्मणे
दक्षिणां दद्यात् ॐ स्वस्तीति प्रतिवचनं यजमानेन तत्परितोपार्यंकिंचित् दातव्यम् ततोवस्त्रयुग
मसुवर्णकांस्यान्युपनीयकुशादीन्यादाय ॐ अद्य कर्तव्यवृषोत्सर्गाङ्गभूतभूतेन होमप्रतिष्ठार्थमेतानि
वस्त्रयुगमसुवर्णकांस्यानिबृहस्पतिवन्हिचंद्रदैवतानिअमुकगोत्रायामुकशर्मणे ब्राह्मणायहोत्रेदक्षिणांतु
भ्यमहंसंप्रददे इति होत्रेदक्षिणां दद्यात् ॐ स्वस्तीतिप्रतिवचनं ततोरुद्रान्ध्यात्वाजपित्वाकर्मकारमाहूयवृ
षमकर्येति ब्रूयात् सचाग्निमयाद्दक्षिणपार्श्वेचक्रेण पश्चिमपादवाम पार्श्वेच क्रमेणपश्चिमपादवाम
पार्श्वेत्रिशूलेनवृषभमंकयेत् ततोवत्सरीचतुष्टयेसहितंवृषभं कुशजलेनस्नापयेत् ततःस्नानकरणमंत्राःॐ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2

श्रा· वर्णाः शुचयः पावका यासु जातः कश्यपो या स्विंद्रः या ऽअग्निगर्भं दधिरे सुवर्णास्तान ऽआपः संस्योनाभवं
वि· तु ॐ यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यन्जनानाम् या ऽअग्निं गर्भं दधिरे सुवर्णास्तान ऽआपः
७३ संस्योनाभवंतु ॐ यासां देवा दिवि कृण्वंति भक्ष्यं या ऽअंतरिक्षे बहुधा भवंति या अग्निं गर्भं दधिरे सुवर्णा
स्तानः आपः संस्योनाभवंतु ॐ शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृशत त्वचं मे सर्वां
अग्नीन् ऽप्सुषदो याः पावकास्तान ऽआपः संस्योनाभवंतु ॐ शन्नो देवीरभिष्टय ऽआपो भवंतु पी
तये शंयोरभिस्रवन्तु नः ततो लोहघंटिका नूपुर कनक घंटिकादिभिः पंचाप्यलंकृतस्य सावित्रीमध
मर्पणं रुद्राध्यायं पुरुषसूक्तं ॐ यदेवादेवहेडनमित्यादि नरक नं कूष्मांडीश्च जपेत् ततो वृषभस्य
दक्षिणकर्णे ॐ पिता वत्सानां पतिरघ्न्यानामथो पिता महतां गर्गराणां वत्सो जरायु प्रतिधुक् पीयूष आमि
क्षा घृतं तद्वस्य रेतः ॐ वृषोऽसि भगवान् धर्मश्चतुःपादः प्रकीर्तितः वृणोमि त्वामहं भक्त्या स मां रक्षतु
सर्वतः इति मंत्रद्वयं जपित्वा कुशत्रय तिलजलान्यादाय ॐ अद्येत्यादि चांद्रे द्वितीयेऽह्नि अमुकगोत्र
स्य पितुरमुकप्रेतस्य मोक्षकामो रुद्रदैवतं वृषभमेनं युवानं पतिं वो ददामि तेन क्रीडत नित्यं स्वरूपश्रियेण मान
सास्य जलुषा सुभगा रायस्पोषेण समिषा मदेमेत्युत्सृजेत् लोहितो यस्तु वर्णेन पुच्छाग्रेण तु पांडुरः श्वे
नः खुरविषाणाभ्यां स नीलो वृष उच्यते नील वृषे नीलपदप्रक्षेपः कार्तिक्यां वृषोत्सर्गे निमित्तकाभ्युदयिकं कृ ७३
त्वा ॐ अद्य कार्तिक्यां वृषमुत्सृज्यमानोऽहमिमान् पूषान् विष्णुदेवतान् अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भ्यमहंसंप्रददेति अमूपत्रयंब्राह्मणायदद्यात् दक्षिणांचदद्यात् ॐ अद्यकार्त्तिक्यामपूषान्दत्वा अमुकगोत्रस्य
पितुरमुकप्रेतस्यमोक्षकामोरुद्रदैवतंवृषमेनंयुवानंपतिंवोददामितेन क्रीडंतिश्चरथप्रियेणमानसाप्त्यजनु
षासुभगारायस्पोषेणसमिषामदेयेतिवाक्यंकर्त्तव्यं एतयैवोत्सृजेदिति पारस्करवचनात् अनयैव
तत्रोत्सर्गः एतंयुष्मद्वत्सतर्योवोयुष्माकमेनंपतिंस्वामिनंतरुणंददामित्वंजानितेनैनेनवृषेणसहक्री
डंति लेरकन्यश्चरथअमय यूयमयिहेवत्सतर्योमातरः नोस्माकंमानास्मत्सन्त्वविषयाः किंतुमयात्यक्ता
वयंवृषस्यभवतीनांत्यागेनरायस्पोषेणधनसमृद्ध्यासाप्तजनुषासप्तजन्मव्यापकेन इषाअन्नेनसम
देमहृष्टाभवेमसुभगाः लोकस्यप्रियाइति ऐशान्यांदिशि पंचापिचालयेत पंचापिपूजयेत् एषोर्घः
ॐ सोपकरणवत्सतरी चतुष्टयसहितायवृषायनमः इदमनुलेपनसोपकरणवत्सरी चतुष्टयसहि
तवृषायनमः पुष्पैःपूजयेत् एतानि धूपदीपतांबूलनैवेद्यानि ॐ सोपकरणवत्सतरी चतुष्टयसहि
तवृषायनमः ततोवत्सतरीचतुष्टयमध्यगतंवृषभमभिमंत्रयेत् तत्रमंत्राः ॐ मयोभूरभिमावाहि
स्वाहामारुतोसिमरुतांगणः शंभुर्मयोभूरभिमावाहि स्वाहा वस्वूरस्मिदुवस्वान् शंभूर्मयोभूरभिमा
वाहिस्वाहा ॐ यास्तेअग्नेसूर्येरुचोदिवमातन्वन्तिरश्मिभिः। ताभिर्नोअद्यसर्वाभीरुचेजनायनस्कृधि
यावोदेवाः सूर्येरुचोगोष्वश्वेषुयारुचः इंद्राग्नीताभिः सर्वाभीरुचंनोधत्त बृहस्पतेरुचंनोधेहि ब्रा
ह्मणेषुरुचं राजसुनस्कृधिरुचं विश्येषु शूद्रेषु मयिधेहिस्वाहा रुचंतस्त्वायामिब्रह्मणावन्दमान

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्तत्राशास्ते यजमानो हविर्भिः अहेडमानो वरुणे हवोध्युरुशंसमान ऽ आयुः प्रमोषीः स्वर्णघर्मः
स्वाहा स्वर्णार्कः स्वाहा स्वर्णशुक्रः स्वाहा स्वर्णज्योतिः स्वाहा स्वर्सूर्यः स्वाहा ततः कृतापसव्यो दक्षिणाभि
मुखो वामं जानु पातयित्वा यवतिलकुशपुष्पोदकान्यादाय ताम्रपात्रादिना मंत्रस्थं फलमुद्दिश्यांजलि
त्रयेण तर्पयेदनेन मंत्रेण ओं स्वधा पितृभ्यो वंशद्वयस्थाः पितरः ये मातृपक्षाश्च ये केचिद्ये चान्ये पितृपक्षजा
गुरुश्वशुरबंधूनां ये कुलेषु समुद्भवाः ये प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जिताः वृषोत्सर्गेण ते सर्वे लभ
न्तां प्रीतिमुत्तमामिति ततः कर्म्मकारमाहूयाभिमतं वेतनं तस्मै दद्यात् उत्तिष्ठ ब्राह्मणान् श्रावयेत् य
त्किंचिद्द्विजेनेमयोत्सृष्टं तदन्यो न नयेत् न वाहयेन्न चैतत्क्षीरं पातव्यं केन किंचित्क्वचित् ततो रुद्रार्थं बहु
सर्पिष्कं पायसं ब्राह्मणान्भोजयेत् अथ कपिलादानं ओं सोपकरणायै सवत्सकपिलगव्यै नमः ओं ब्रा
ह्मणाय नमः इति देयद्रव्यब्राह्मणौ त्रिः संपूज्य ओं इमां सोपकरणां सवत्सां कपिलां गां ददानीति द्विज
करे जलदानं जलेन देयद्रव्याभिषेचनम् कुशादीन्यादाय ओं अद्याशौचांत द्वितीयेऽह्नि अमुकगो
त्रस्य पितुरमुकप्रेतस्य स्वर्णप्राप्तिकामः इमां कपिलां गां प्रेमशृंगीं रौप्यखुरां वस्त्रयुगच्छन्नां कांस्यो
पदोहां मुक्तालांगूलविभूषितां सवत्सां रुद्रदैवताममुकगोत्रायामुकगोत्राय अमुकशर्मणे
ब्राह्मणाय तुभ्यमहं संप्रददे इति दद्यात् ओं स्वस्तीति प्रतिवचनम् ततो दक्षिणाद्रव्यादि
कषाय ओं अद्य कृतैतत्सोपकरणसवत्सकपिलगवीदानप्रतिष्ठार्थंमि ॥ ॥ ७५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं प्रददे इति दक्षिणां दद्यात्ततः
प्रतिगृहीता ॐ स्वस्तीत्युक्त्वा गोपुच्छग्रहणम् यथाशास्त्रं कामस्तुतिं च कुर्यात् तत्र को दात् कस्मा अदा
त्कामायादात् कामो दाता कामः प्रतिगृहीता कामैतत्ते इति यजुर्वेदे ॐ क इदं कस्मा अदात् कामः कामाया
दात् कामो दाता कामः प्रतिगृहीता कामं समुद्रमाविश दकामेन त्वा प्रतिगृह्णामि कामैतत्ते इति सामवेद
कामस्तुतिः यथोक्तकपिलालाभे केवलामपि दद्यात् तत्र स्रजादि पूर्ववत् ॐ अद्याशौचान्त द्वितीयेऽह्नि अ
मुकगोत्रस्य पितुरमुकप्रेतस्य स्वर्गप्राप्तिकामः इमां कपिलां गां रुद्रदैवतां अमुकगोत्रायामुकशर्मणे
ब्राह्मणाय तुभ्यमहं संप्रददे इति दद्यात् ॐ स्वस्तीति प्रतिवचनं ततो दक्षिणद्रव्यादि कामादायः ॐ अ
द्यकृतैतत्कपिलगवीदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षि
णां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् ॐ स्वस्तीति प्रतिवचनम् गोपुच्छग्रहणं कामस्तुतिश्च पूर्वव
त् ततो महानद्यादौ सचैलं स्नात्वा तीर्थानि मनसा ध्यात्वा तज्जलेनात्मानमभ्युक्ष्यान्तरत् अथैकाद
शाहश्राद्धप्रयोगः स च युगलसोपानानुसारेण लिख्यते तत्र मध्याह्ने अचिराचान्तः शुचिः स्नातो द्विवा
सा गोमयोपलिप्तायाम् अपसव्य वनकृत गोमूत्रमंडलायां भूमौ मंडलाद्बहिः ॐ भूम्यै नमः इति त्रिः पुष्पा
क्षतं भूजितायां भूमौ दर्भेषु तिष्ठन् पात्रं ब्राह्मणं यजमानसवर्णेनाऽऽहूतं स्वानमाचीनं ॐ स्वागतमिति पृष्टेन
ॐ सुस्वागतमिति तेनोक्तेऽआसनमुपविशतः ततः श्राद्धकर्ताऽसनेयाद्यमिति पाद्यमुपनीय विनीतः पुनः पुनः रभि ७६

सन्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नेद्यपात्रब्राह्मणपादौ प्रक्षाल्यापसव्यादिकृत्वा जलतिलगंधपुष्पयुतमर्घपात्रमादाय मोदकतिलजलानि
चादाय ओं अद्यामुकगोत्र पितरमुकप्रेत: आद्यश्राद्धे एष पादार्घस्ते तवोपतिष्ठतामिति पादार्घं दद्यात् तत:
स्वयं पादौ प्रक्षाल्याचम्य: शिरसा भिवंद्य जानुविति आच्य ओं इदंते आचमनीयमित्याचमनीयोदकं ब्राह्मणाय
दद्यात् तत: स्वयंपादौ प्रक्षाल्याचम्य: पात्र ब्राह्मणमाचमय्याग्रे कृत्वा श्राद्धदेशमागत्योपविश्यान्नासिधाये
ण सिद्धमिति प्रक्षेत् पूर्वरात्रौ निमंत्रणासंभवे तस्मिन्नेवाह्नि श्राद्धवेलायां मंडला द्वहि शुचिराचांत: शुल्क
हिवासा मौनयोपलिप्तायां भूमौ अपसव्यम् कृत गोमूत्र मंडलायां भूमौ मंडला द्वहि: ओं भूम्यै: नम इतित्रि:
पुष्पासन पूजितायां दर्भेषु तिष्ठन् स्नानमाचांतं ब्राह्मणं यजमान् सवर्णेनाहूतम् ओं स्वागतमिति पृच्छेत्
ओं स्वस्वागतमिति तेनोक्ते उभावप्युपविशत: तत श्राद्धकर्ता: इदंतेपाद्यमुपनीयविनीत: सन् पुन:पु
नरभिनद्यपात्र ब्राह्मणपादौ प्रक्षाल्यापसव्यादि कृत्वा पुष्पचंदनतांबूलानि ब्राह्मणाय दत्त्वा ब्रा
ह्मण दक्षिणजानु स्पृष्ट्वा ओं अद्यामुक गोत्रस्य पितुरमुकप्रेतस्याद्य श्राद्धकरणाय भवंतं ब्राह्मणमामं
त्रये ओं आमंत्रितोस्मीति प्रतिवचनम् अक्रोधनेन शौचपरेण सततं ब्रह्मवादिना भवितव्यं भवता
चमयाच श्राद्धकारिणा सर्वापासविनिर्मुक्तेन कामक्रोधविवर्जितेन भवितव्यं भवतानोद्यतने श्रा
द्धकर्मणीति ब्राह्मणं नियमान् श्रावयेत् भवितव्य मितितेनोक्ते अर्घ्यं परिकल्पादाय मोदकादि
कंचादाय ओं अद्यामुकगोत्र पितर मुकप्रेत आद्यश्राद्धे एष पादार्घस्ते मया दीयते तवोपतिष्ठतामिति पादार्घ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दद्यात् ततः शिरसाभिवंद्य जानुनि विन्यस्य ओं इदं तेऽआचमनीयमित्याचमनीयं जलं ब्राह्मणाय दद्यात् ततः ति
लतैलेन पात्रब्राह्मणपादौ वाऽजानु अभ्यंजयेत् ततः स्वयं पादौ प्रक्षाल्याचम्य पात्रब्राह्मणं चाचम्याग्रे कृ
त्वा श्राद्धदेशमागत्योपविश्य पात्राभिप्रायेण सिद्धिमिति पृच्छेत् दक्षिणाग्रैककुशसहितेन पालकांबला
द्यासिकं ब्राह्मणोपवेशनायासनमुपकल्प्यासनं स्पृशन् ओं अत्रासने देवराजाभ्यनुज्ञातो विश्रम्यतां
द्विजपर्य्यानुग्रहान् प्रसादयेत्वासनं ग्रहाण पूतं ज्ञानाग्निपूतेन करेण विप्र इति मंत्रं पठित्वा पात्रब्राह्म
णं दक्षिणहस्ते धृत्वोदङ्मुखमुपवेशयेत् ततः पात्रस्य पादयोस्तले दक्षिणाग्रं कुशत्रयं दद्यात् आसन
समीपे च तिलतैलेन घृतेन वा श्राद्धसमाप्तिपर्यंतस्थापितदीपं कुर्यात् तद्दत्ता पात्रब्राह्मणेन कर्त्तव्यार
क्षोघ्नान् गौरसर्षपान् तिलांश्च श्राद्धदेशे सन्निधापयेत् काककुक्कुटादीन् श्राद्धदृग्नपसारयेत् ततः
पूर्वाभिमुखः कुशोदकेन ओं अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा यः स्मरेत् पुंडरीकाक्षं सर्वाबाह्याभ्यं
तरः शुचिरिति पठित्वा ओं पुंडरीकाक्षः पुनात्विति पुंडरीकाक्षं स्मृत्वा श्राद्धीयद्रव्याण्यात्मानं च सिंचेत
ततः कुशत्रयतिलजलान्यादाय ओं अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य प्रेतत्वविमुक्तिकाम अद्यादि
यथाकालं षोडशश्राद्धान्यहं करिष्ये इति संकल्पयेत् एकादशमासाभ्यंतरेऽधिमासपाते अष्टापद
स्थाने सप्तदशपदं प्रयोज्यं ततः कुशत्रयतिलजलान्यादाय ओं अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य प्रेत
त्वविमुक्तिहेतुषोडशश्राद्धांतर्गताद्यश्राद्धमहं करिष्ये इति संकल्पयेत् ओं कुरुष्वेति ब्राह्मणप्रतिवचनं ओं गायत्री

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जपमहं करिष्ये इति पृष्ट्वा कुरुष्वेति ब्राह्मणानुज्ञातः त्रिर्गायत्रीं जपेत् सव्याहृतिकां सप्रणवां वा जपनीया गाय
त्री देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च नमः स्वाहा स्वधायै नित्यमेव नमो नम इति त्रिर्जपेत् ततोऽपसव्यं
कृत्वा दक्षिणाभिमुखः पातितवामजान्वोटकतिलजलान्यादाय ओं अद्यामुकगोत्रपितरमुकप्रेतश्राद्ध
श्राद्ध इदमासनं ते मया दीयते तत्रोपविश्यतामिति मोदकरूपमासनं तिलजलप्रोक्षितं दक्षिणाग्रमुत्सृजेत् ततः
सव्यं कृत्वा प्राङ्मुख उपविष्टः ओं छत्राय नमः ओं ब्राह्मणाय नमः इति देवब्राह्मणौ त्रिः संपूज्य इदं छत्रं द
दानीति द्विजकरे जलं दत्वा छत्रमभिषिंच्य कुशत्रयतिलजलान्यादाय ओं अद्यामुकगोत्रस्य पितुरमुक
प्रेतस्यावरणकाम इदं छत्रममुनानां गिरोदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे
इति दद्यात् ओं स्वस्तीति प्रतिवचनं ततस्तिलजलकुशान् दक्षिणाद्रव्यं चादाय ओं अद्य कृतैतच्छत्रदान
प्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति द
क्षिणां दद्यात् ततः प्रतिगृहीत्वा ओं स्वस्तीत्युक्त्वा छत्रं दण्डे धारयेत् ओं उपानद्भ्यां नमः ओं ब्राह्मणाय नमः
इति देवब्राह्मणौ त्रिः संपूज्य ओं इमे उपानहौ ददानीति द्विजकरे जलं दत्वा उपानहावभिषिंच्य कुशा
दीन्यादाय ओं अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य तप्तवालुकास्तिकण्टकितभूदुर्भसंतरणका
म इमे उपानहावमुतानां गिरोदैवते अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे
इति दद्यात् ओं स्वस्तीति प्रतिवचनं ततः कुशादीन् दक्षिणाद्रव्यं चादाय ओं अद्य कृतैतदुपानद्दानप्रतिष्ठार्थ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् ततः
प्रतिगृहीता ओं स्वस्तीत्युक्त्वा उपानहावरोहेत् ततोपसव्यं कृत्वा दक्षिणाभिमुखः पातितवामजानुः ओं
अपहता असुरा रक्षांसि वेदिषद इति श्राद्धदेशे मावर्त्तजतिलान्वीकिर्य्य ओं आयन्तु नः पितरः सोम्यासो
ग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन्यज्ञे स्वधया मदन्तोधिब्रुवन्तु तेवन्त्वस्मानिति जपेत् ततोर्घपात्रोपरि अ
नखच्छिन्नं दक्षिणाग्रपवित्रं धृत्वा ओं शन्नोदेवीरभिष्टय आपो भवन्तु पीतये शंय्योरभिस्रवन्तु न इति
मंत्रेणार्घपात्रे जलं दत्वा ओं तिलोसि सोमदेवत्यो गोसवो देवनिर्मितः प्रत्नमद्भिः पृक्तः स्वधया पितृँल्लो
कान्प्रीणाहि नः स्वाहेति तिलान्प्रक्षिप्य गंधपुष्पे तूष्णीं तत्र प्रक्षिप्य अर्घपात्रं वामहस्ते कृत्वा पवित्रं ब्राह्म
णहस्ते उत्तराग्रं दत्वा तदुपरि किंचिदुदकांतरं दत्वा ओं या दिव्या आपः पयसा संबभूवुर्या आन्तरिक्षा उत
पार्थिवीर्या हिरण्यवर्णा यज्ञियास्तान आपः शिवाः संस्योनाः सुहवा भवन्तु इति पठित्वा मोटकादी
न्यादाय ओं अद्यामुकगोत्र पितरमुकप्रेत आघ्याङ् एष हस्तार्घस्ते मया दीयते तवोपतिष्ठतामि
ति ब्राह्मणकरे पवित्रोपरि अर्घजलं ददद्भुत्सृजेत् पात्रं च वामपार्श्वे पित्रे स्थानमस्तीन्य च पात्रं सप
वित्रमधोमुखं स्थापयेत् तच्च दक्षिणादानपर्यन्तं न चालयेत् ततः श्राद्धदेशे तिलान् विकीर्य दर्भ
हस्तोम्भूतले प्रेतमावाहयेत् तत्र मंत्रः इहलोकं परित्यज्य गतोसि परमां गतिमिति अत्र स्त्रीश्राद्धेपि गता
सीत्येवमेव पठ्यमानत्वे नोहृश्यत्वात् ततो मोटकादीन्यादाय ओं अद्यामुकगोत्रपितरमुकप्रेत आयाहि ८०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसितेमयादीयतेतवोपतिष्ठन्तामितिगंधादीनुत्सृजेत् ततः
सर्वसुगंधइतिमंत्रेणगंधेन ओं प्रियदिव्या इतिमंत्रेणपुष्पं ओं वनस्पतिरसामितिमंत्रेण धूपं ब्राह्मणाय
निवेदयेत् ततः ओं एषदीप इतिनिवेदिते ओं सुदीपः ब्राह्मणो वदेत् ओं एतानितांबूलानि इतिनिवेदिते
ओं सुतांबूलानि ब्राह्मणो वदेत् ओं इमोयज्ञोपवीते इतिनिवेदिते ओं सुयज्ञोपवीते इतिब्राह्मणो वदेत् ओं
एतानिवासांसीतिनिवेदिते ओं सुवासांसीनिब्राह्मणो वदेत् पुष्पाणि शिवायामेवहिजनधार्याणि ततः प्रे
तोपभुक्तशय्यासनादिकं गंधपुष्पैरभ्यर्च्य श्राद्धमोक्षभूति पादयेत् ततोगेरस्थाने कपानी चारचूर्णेनजले
नब्राह्मणं वेष्टयित्वा चतुरस्रमंडलं कुर्यात् परकीयभूमौश्राद्धकरणेश्राद्धीयवस्तुष्वकिंचिदुद्धृत्य तिल
जलयुतयुक्तमन्नं ओं इदमन्नमेतद्भूस्वामिपितृभ्योनमः इतिदद्यात् जीवतांभूस्वामिनां किंचिद्राजनि
करंदद्यात् ततः उक्तमन्नं ताम्रपात्रेण कराभ्यामादायमनाक् स्थित्वापितरंध्यात्वापुरुषतन्निक्षमं परि
विष्यात् ततइदंमधुरमिदंमत्सुक्तमित्यादिव्यंजनगुणाननुकीर्तयन् मांसादीनिव्यंजनानिभूपिष्ठप
त्रानेरख परिविष्य घृतं सतिलजलं चोपनीयान्नं मधुनाभिघारयेत् ओं मधुवाताऋतायतेमधुक्षरं
तिसिंधवः माध्वीर्नः सन्त्वोषधीः ओं मधुनक्तमुतोषसो मधुमत्पार्थिवंरजः मधुद्यौरस्तुनः पिता
ओं मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः माध्वीर्गावो भवन्तु नः ओं मधुमधुमधु इति च पठित्वा व्यस्ता
भ्यां पाणिभ्यां पात्रमालभ्य ओं पृथिवीते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं ॥ ॥ ८१

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जुहोतिस्वाहाइतिजपेत् ओंइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् समूढमस्यपांसुरे इतिपठन् अ
न्नरूपतयान्नंविचिन्त्य ओंकृष्णकव्यमिदंरक्षस्मदीयमितिपठित्वा ओंइदमन्नं ओंइमाआप ओंइदमाज्यं ओंइ
दंहविरितिपात्रंब्राह्मणदक्षिणाङ्गुष्ठमन्नजलघृतान्नेषु विवेश्य ओंअपहताऽअसुरारक्षांसिवेदिषद
इत्यन्नोपरियवान्प्रक्षिप्यमोदकादीन्यादाय वामेनपाणिनापात्रमत्यजन् ओंअद्यामुकगोत्रपितरमुक
शर्मन्नाद्य। श्राद्धइदमन्नंसोपकरणंतेमयादीयतेतवोपतिष्ठतामित्युत्सृजेत् ततोभवानशमयत्विति ब्रू
यात् विप्रायापोशानंदत्वासप्रणवांसव्याहृतिकांगायत्रीं ओंमधुवाता इत्यादि त्र्यृचम् ओंमधुमधु
मध्वितिचजपित्वा ओंअन्नहीनंक्रियाहीनंविधिहीनंचयद्भवेत् तत्सर्वमच्छिद्रमस्त्वितिपठित्वा
ओंयथासुखंजुषस्वेतिब्राह्मणंब्रूयात् ब्राह्मणश्चवामेनपाणिनापात्रमत्यजन् ओंकारपूर्वकंभुंजीतसंस्त
याभिभक्ष्यप्रार्थनंनकुर्यात् श्राद्धकर्तादर्भेष्वासीनः सप्रणवव्याहृतिकांगायत्रींमधुवाताइत्या
दि त्र्यृचंमधुमधुमध्वितिजपेत् गायत्रींब्राह्मणंश्रावयित्वा ओं कृणुष्वपाज इत्यादी
रक्षोघ्नमंत्रान् पठित्वा भूमिंतिलैरात्रीर्य्यब्राह्मणपितृरूपतयाध्यापयेत् ततः उदी
रताम्इत्यादिपितृमंत्रान् ओंसहस्रशीर्षा इत्यादि पुरुषसूक्तम् ओंआशुःशि
शान इत्यादिकमप्रतिरथमन्यान्यपिशतरुद्रियप्रभृतिपवित्राणिरुचिस्तवप्रभृतीनिचपठेत्
अंततः ओंनमस्तेभ्यंविरूपाक्षंनमस्तेनेकचक्षुषे नमःपिनाकहस्तायवज्रहस्तायवैनमइति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वायवस्त्र इस्वायवेनम इतिश्लोकमपिपठेत् वीणादिभिर्ब्राह्मणं हर्षयेत् व्यंजनादिगुणान् कीर्त्तयेत्
तस्यपत्रपात्रे क्वोपलभ्यते तत्तदुपनमंदं मंदं भोजयेत् ततस्तं तृप्तं ज्ञात्वा उच्छिष्टसन्निधौ वास्तृत दक्षिणाग्रकु
शास्तृतायां भूमिं प्रोक्ष्य सर्वप्रकारकमन्नं तिलयुत सहितं जलेनाप्लाव्यास्तृ इत्वा ॐ अनग्निदग्धायेजीवायेप्र
दग्ध्याः कुलेममभूमौदत्तेनतृप्यन्तुतृप्तायांतुपरांगतिं मितिमंत्रेण मंत्रस्थं फलमुद्दिश्य कुशोपरितद्दत्त्वा विकी
त ततः सव्यंकृत्वा चमस्य हरिंस्मृत्वा अपसव्यंकृत्वा दक्षिणाभिमुखो ब्राह्मणाय जलगंडूषमिदंते अत्यापोशानमिति
दत्त्वा ॐ स्वदितमिति ब्राह्मणं पृच्छेत् ॐ सुस्वदितमिति तेनोक्ते ॐ पिंडमहं करिष्ये इति पृच्छेत् कुरुष्वेति ब्राह्मणा
नुज्ञातः उच्छिष्टसन्निधौ चतुरस्रं हस्तैकप्रमाणं दक्षिणप्रवणं चतुरंगुलोच्छ्रितं स्थानं निर्माय तन्मध्ये वामहस्तेन द
र्भपिंजुलीमादाय तन्मूलेन वामान्वारब्धदक्षिणकरेण प्रादेशमात्रं लिखेत् ॐ अपहता असुरा रक्षांसि
वेदिषद इति मंत्रेण रेखामुल्लिखेत् दर्भपिंजुलीं उत्तरस्यां दिशि निक्षिपेत् तदुपरि ये रूपाणि प्रतिमुंच
माना ऽअसुराः सन्तः स्वधया चरंति परापुरो निपुरो ये भरन्त्यग्निष्टाल्लोकात्प्रणुदात्यस्मात् इत्यु
ल्मुकं भ्रामयित्वा रेखा दक्षिणतः क्षिपेत् तदुपरि उपमूलसकृल्लूनकुशान् दक्षिणाग्रानास्ती
र्य सव्यं कृत्वा ॐ देवताभ्य इति त्रिर्जपेत् ततोऽपसव्यं कृत्वा पर्णपुटकादिकमेकं तिलजलगंधपु
ष्पयुतं वामहस्ते कृत्वा दक्षिणहस्ते मोटकादिमादाय ॐ अद्यामुकगोत्रपितरमुकप्रेत श्राद्धस्थाने पिं
डस्थाने ऽत्रावनेनिक्ष्व ते मया दीयते तवोपतिष्ठतामिति कुशोपरि अवनेजनं दद्यात् ततः श्राद्धशेषमन्नाम् ८३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

र्व्यंजनतिलमधुघृतयुतमेकीकृत्यतेन बिल्वपरिमाणं पिंडं निर्माय घृतमध्वभिधारितं कृत्वा दक्षिण
हस्तेनादाय मोटकादीन्यादाय ॐ अद्यामुकगोत्र पितरमुकप्रेत आद्यश्राद्ध एष पिंडस्ते मया दीयते
तवोपतिष्ठतामिति कुशोपरि अवनेजनस्थाने सव्योपरिगृहीतदक्षिणकरेण पिंडं दद्यात् आस्तृतदर्भमूले
करं प्रोक्ष्य सव्यं कृत्वा चम्य हरिं स्मृत्वा अपसव्यं कृत्वा ॐ अत्र पितर मादयस्व यथा भागमावृषायस्व
इति पठित्वा वामावर्तेनोदङ्मुखीभूत्वा मनाक्श्वासं नियम्यते नैव यथा सुखं पर्यावर्तयन् पितरंमाख
स्मूर्तिं ध्यायन् अमीमदंत पितरो यथाभागमावृषायिष्ट इति पठेत् अवनेजनावशिष्टजलयुतपात्रं वाम
हस्ते कृत्वा दक्षिणहस्तेन मोटकादीन्यादाय ॐ अद्यामुकगोत्र पितरमुकप्रेत आद्यश्राद्धपिंडे ऽत्र प्रत्यव
नेनिक्ष्व ते मया दीयते तवोपतिष्ठतामिति पिंडोपरि प्रत्यवनेजनं दद्यात् ततो नीवीं विस्रस्य सव्यं कृत्वाचम्य
हरिं स्मृत्वा वामेन पाणिनाऽऽवृतं सूत्रं दक्षिणहस्तेन गृहीत्वा ॐ एतत्ते पितर्वासः इति पिंडोपरि धृत्वा मोटकमा
दाय ॐ अद्यामुकगोत्र पितरमुकप्रेत आद्यश्राद्धे पिंडे एतत् वासस्ते मया दीयते तवोपतिष्ठतामित्युत्सृ
जेत् ततः सूत्रोपि पिंडे गंधपुष्पधूपदीपताम्बूलानि दद्यात् ततः पिंडशेषान्नं पिंडसमीपे विकिरेत् ततः आचा
मनस्य ब्राह्मणस्य करे ॐ अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितं ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवंतु
मे इति जलं दद्यात् ॐ भवंतु ते ब्राह्मणस्य प्रतिवचनम् लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे ल
क्ष्मीर्वसति गोष्ठेषु सौमनस्यं सदास्तु मे इति पुष्पाणि दद्यात् ॐ अस्तु सदा तमेति प्रतिवचनं अ ८४

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सतंचास्तुमेंपुण्यशांतिःपुष्टिःधृतिश्चास्तुमे यद्यच्छ्रेयस्करंलोके ततदस्तुसदाममइतितंडुलानिदद्यात् ओंअ
स्तुसदातवेतिप्रतिवचनं अथवाशिवाआपःसंत्विति जलं सौमनस्यमस्त्विति पुष्पम् ओं अक्षतंचारिष्टम
स्त्विति तंडुलान्दद्यात् ओं संत्विति ओं अस्त्विति च प्रतिवचनं ततः पुरस्कादिपात्रंशान्युदकं परिकल्प्यमेदिनीशि
रसामिवंद्यइमंमंत्रंपठेत् ओंनमोनमोदिविलोकधात्रि उर्वि महि शैलगिरिधारिणि नमः धरणि काश्यपि
जगन्मातिष्ठे वसुधे नमो नुवैष्णविलोकधात्रि नमोऽनन्ते सर्वरसप्रतिष्ठितिवापनार्थीचिनमोनमोऽनन्ते
ततोमोदकादिकमादाय ओं अद्यामुकगोत्रस्यपितुरमुकप्रेतस्य आद्यश्राद्धेदत्तैतत्वपानादिकंसुपति
ष्ठतामिति विप्रकरे अक्षय्योदकंदद्यात् ओं उपतिष्ठतामिति प्रतिवचनं ततः सव्यंकृत्वा प्राङ्मुखः कृतांज
लिसंयतमनाः समन्तादक्षिणदिशंपश्यन् ओं अघोरःपितास्त्विति पठेत् अत्रपूर्वाभिमुखीपिंडोपरिजलधारांद
नीत्याचार ओं अस्त्विति प्रतिवचनम् पूर्वाभिमुखः गोत्रंनोवर्द्धतामितिवदेत् ओं वर्द्धतामिति प्रतिवचनं
ओं दातारोनोभिवर्द्धतांवेदाः संततिरेवच श्रद्धाचनोमाव्यगमद्बहुदेयंचनोऽस्तु अन्नंचनोबहुभवेद
तिथींश्चलभेमहि याचितारश्चनःसंतुमाचयाचिष्मकंचन एताःसत्याआशिषःसंत्विति आशिषोप्रा
र्थनं याचेत् ओंसंत्विति ब्राह्मणप्रतिवचनम् ततोपसव्यंकृत्वा सपवित्रकुशत्रयंपिंडोपरिदक्षिणाग्रं
धृत्वा ओंनमोवाचयिष्य इतिपृच्छेत् ओं वाच्यतामित्यनुज्ञातः ओं पित्रेनमःउच्यतामितिवदेत् ओं अस्तु
नमइतिप्रतिवचनं ततःपुरस्कादिस्थितंजलंगृहीत्वा ओं ऊर्ज्जं वहन्तीरमृतंघृतंपयःकीलालंपरि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्तुनम् स्वधास्त्वनर्घ्ये पततमे पितर मिति दक्षिणयांजलधारां सपवित्रकुशोपरि दद्यात् ततो नम्रीभूय पिंडमा
घ्रायोत्थापयेत् पिंडाधारकुशानुल्मुकं च वह्नौ क्षिपेत् ततोऽर्घपात्रमुत्तानीकृत्य सोदकतिलजलान्यादाय
दक्षिणाद्रव्यं चादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य कृतैतद्दायश्राद्ध प्रतिष्ठार्थमिदं रजितं चंद्रदैवतं अ
मुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति दक्षिणादानं ॐ स्वस्तीति प्रतिवचनं श्रा
द्धकर्त्ता पात्रब्राह्मणस्य चरणौ संवाहनं नमस्कुर्यात् ततो दक्षिणपाणिना पात्रब्राह्मणपाणिं गृहीत्वा शय्या
सनमंजनं कतकनिकां चार्पयेत् ब्राह्मण आंजनं कतकनिकां चादाय शय्यास्थ मुहूर्तं विश्रामेत् ततः साम
वेदाध्यायि ब्राह्मणास्तान्पात्रं संप्रतिलोदकमुपाहरेयुः ततः श्राद्धकर्त्ता तेन जलेन गृहास्थितं द्रव्यमभि
षिंचयेत् ततः सव्यं विधाय ॐ अग्निमुखदेवास्तृप्यंता मिति यवयुतजलेन कुशैः कुशोपरि तर्पयेत् अ
वशिष्टमन्नं ॐ भूतेभ्य एष बलिर्मम इति जल। पुष्पाभ्यां बलिं दद्यात् ततः सामग ब्राह्मणान्भोजनादिभि
संतोषयेत् ततो पसव्येन ॐ निरेकारं स्वस्ती ब्रूहीति ब्राह्मणाय वदेत् स्वस्तीति ब्राह्मणो ब्रूयात् स्वस्त्य
स्तु इत्युक्त्वा ब्राह्मणमुत्थाप्य जलपात्रं गृहीत्वा निमंत्रणस्थापनस्थितं ब्राह्मणं ॐ आमा वाजस्य
प्रसवो जगम्यादेमे द्यावा पृथिवी विश्वरूपे आमा गंतां पितरा मातरा चामा सामो ऽअमृत
त्वेन गम्यादिति पठेत् प्रदक्षिणी कुर्वन् वारिधारया त्रिर्वेष्टयित्वा प्रणम्याष्टौ पादाननुव्रज्य प्रद
क्षिणीकृत्याभिवादयेत् सव्यं कृत्वा ॐ देवतास्थ इति त्रिर्जपित्वा गृहं प्रविशेत् ततः पाणिभ्यामपसव्येन॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्वीपदीपनिर्वापणं सर्वं कृत्वा हस्तौ पादौ प्रक्षाल्याचम्य ततः श्राद्धसंपूर्णकामः ॐ प्रमादात्कुर्वतां कर्म प्रच्यवे
ताध्वरेषु यत् स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिरिति पठित्वा विष्णुस्मरणं कृत्वा ततो ऽशौचान्त द्वितीयदिने
एव यथाशक्ति महार्हाणि रत्नानि गाः वाहनं पात्राणि दासं दासीं महान्ति वस्त्राणि श्रेष्ठभूषणानि प्रेतहितमुद्दिश्य
ब्राह्मणाय दद्यात् तद्यथा अद्याशौचान्त द्वितीये ऽह्नि अमुकगोत्रस्य पितुरमुकप्रेतस्य स्वर्गप्राप्तिकामः इमां गां रु
द्रदैवतां यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृजेत् इति गां दद्यात् ॐ अद्य कृतैतद्गोदानप्रतिष्ठासिद्ध्य
र्थं हिरण्यमग्निदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति यथाशक्ति दक्षिणां दद्यात् एवं
भूमिहिरण्यादिनमपि अस्मिन्दिने दश प्रभृति श्रोत्रियान्भोजयेत् नान्यरितोषयेत् तत्र दिने विहितमपि पंचगव्य
पानं शिष्टानाचारात्तिह्नविनालिखितं अथान्नोदकुंभदानं तत्र एकादशाह श्राद्धं कृत्वा आचम्य प्राङ्मुख उप
विश्य कुशतिलजलान्यादाय ॐ क्षित्ययना हरहरन्नोदकुंभोपस्थितिरवगत श्वमेधयज्ञ जन्यफल समफल
प्राप्तिकामो अद्यादि पितृमरणदिनावधिकाशौचावच्छिन्नदेनो न वत्सरं यावत्प्रत्यहं पित्रे सान्नोदकुंभ
दानमहं करिष्ये इति संकल्पं कुर्यात् ततो पसव्यादि कृत्वा मोदकादीन्यादाय ॐ अद्यामुकगोत्र पित
रमुकप्रेत इदमासनं तेमया दीयते तवोपतिष्ठता मित्यासनमुत्सृज्य सघृत व्यंजनमन्नमुपनीय ॐ अद्या
मुकगोत्र पितरमुकप्रेत ऽयं सान्नोदकुंभस्ते मया दीयते तवोपतिष्ठतामित्युत्सृजेत् तदुभयं यात्नब्राह्मणाय प्र
तिपादयेत् अशौचापनिपाते व्यपदांतव्य इति सपिंडने कृते वर्षाभ्यंतरे ॐ अद्यामुकगोत्र पितरमुकशर्मन्निद

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तुभ्यंस्वधा ॐ अद्यामुकगोत्रपितरमुकशर्म्मन्नयं सान्नोदकुंभस्तुभ्यंस्वधेतिवाक्यंकुर्यात् ततोमोदकादीन्याद
य ॐ अद्यकृतैतत्सान्नोदकुंभस्तुभ्यंस्वधेतिवाक्यंकुर्यात् ततोमोदकादीन्यादाय ॐ अद्य कृतैतत्सान्नोदकुं
भ दान प्रतिष्ठार्थमिदंरजितं चंद्र दैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजेत् इतिमन्त्र
हं सान्नमुदकुंभं दत्वा दक्षिणां दद्यात् अत्र द्वादशाह श्राद्धकार्यमितिकेचित् तदपि एकादशाहवत् अथ
सिकश्राद्धप्रयोगः तत्र श्राद्धपूर्वदिने एकभक्तादिकं विधायप्रातःश्वेतवस्त्रयुग्मेन स्नात्वा मध्यदिने पुनःस्नात्
कृतनित्यक्रियआचांतउपविष्टः पूर्वोपकल्पितं प्रज्वालितप्रदीपं स्थापितगौरसर्षपतिलारक्षोघ्नं श्राद्धदेश
मागत्य ॐ सिद्धमितिपठन्कुशत्रयजलेन ॐ अपवित्रः पवित्रोवा सर्वावस्थांगतोपिवायः स्मरेत्पुंडरीकाक्षं
सबाह्याभ्यंतरः शुचिः ॐ पुंडरीकाक्षः पुनात्वितिपुनःश्राद्धदेयद्रव्याण्यात्मानंचसिंचेत् ॐ अद्यामुकगोत्रस्य
पितुरमुकप्रेतस्य प्रेतत्वविमुक्तिहेतु षोडशश्राद्धांतर्गतः प्रथममासिकश्राद्धमहंकरिष्य इतिसंकल्पं कुर्यात्
एकादशमासाभ्यंतरेऽधिकमासपाते षोडशपदस्थाने सप्तदशपदं योज्यं ततस्त्रिर्गायत्रीं जपित्वा
ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एवच । नमः स्वाहायै स्वधायै नित्यमेव नमोनमः इतित्रिर्जपेत् ततो
प सव्यादिकृत्वा मोटकादिकमादाय ॐ अद्यामुकगोत्रपितरमुकप्रेत प्रथममासिकश्राद्ध इदमासनं
ते मयादीयते तवोपतिष्ठा मित्यासनमुत्सृजेत् ॐ अपहताः असुरारक्षांसिवेदिषद इतिवामवर्तेनश्रा
द्धदेशे तिलान्विकिरेत् ततआयंतु वापितर इतिमन्त्रं पठेत् ततः पुटकादौ पवित्रं दक्षिणाग्रं धृत्वा ॐ शन्नोदेवीरितिमंत्रे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतत्त्रजलंक्षिपेत् ॐतिलोसिसोमदेवत्योगोसवोदेवनिर्मितःप्रत्नमद्भिःपृक्तःस्वधयापितॄंल्लोकान्प्रीणहिनः
स्वाहेतितिलान्प्रक्षिप्यतूष्णींगंधंपुष्पंचनिक्षिपेत् ततस्तदर्घपात्रंवामहस्तेकृत्वापवित्रमन्यपात्रोपरिउत्त
रांग्रंधृत्वातदुपरिकिंचिदुदकांतरंदत्वाॐयादिव्याऽआपःपयसासंबभूवुर्याआन्तरिक्षाऽउतपार्थिवीर्याहि
रण्यवर्णायज्ञियास्तानऽआपःशिवाःसꣳस्योनाःसुहवाभवन्तुइतिपठित्वादक्षिणहस्तेनमोटकादीन्यादा
यःॐअद्यामुकगोत्रपितरमुकप्रेतप्रथममासिकश्राद्धएषहस्तार्घस्तेमयादीयतेतवोपतिष्ठतामितिप
वित्रोपरिजलंदद्यात् ततःपवित्रादिसहितमर्घपात्रमासनवामपार्श्वेॐपित्रेस्थानमसीतिन्युब्जं
कुर्यात् पुनर्मोटकादीन्यादायॐअद्यामुकगोत्रपितरमुकप्रेतप्रथममासिकश्राद्धएतानिगंधपु
ष्पधूपदीपतांबूलयज्ञोपवीतवासांसितेमयादीयन्तेतवोपतिष्ठतामितिगंधादिकमुत्सृजेत् तत
आसनस्यभोजनपात्रसहितस्यचतुर्दिक्षुचतुरस्रंमंडलंकृत्वाआहीयान्नाग्रभागंघृतव्यंज
नतिलजलयुतंपुटकादौकृत्वाॐइदमन्नमेतन्नःस्वामिपितृभ्योनमइत्युत्सृजेत् ततस्तान्न
पात्रादिस्थितमन्नंहस्ताभ्यामादायमनाकस्थित्वापितरंध्यायन्भोजनपात्रेउपनयेत्
पुरुषत्वतिक्षममन्नंपरिविष्यभूयिष्ठपात्रांतरेषुव्यंजनान्युपकल्प्यपुटकस्थितंघृतंजलं
चोपनीयअन्नोपरिहस्तद्वयगृहीतपात्रेणमधुदत्वाततःॐमधुवाताइत्यादिऋचंॐमधुमधुम
ध्वितिजपेत् ततोव्यस्तहस्ताभ्यामन्नपात्रमालभ्यॐपृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेअमृतेऽअमृ ८९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तेजुहोमिस्वाहाॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्समूढमस्यपांसुरेकृष्णकव्यमिदंरक्षमदीयमितिपठित्वावामेनपाणिवापात्रमन्यजन् दक्षिणहस्तांगुष्टमन्नजलघृतान्नेषुॐइमाआपःॐइदमाज्यंॐइदंहविरितिनिक्षिप्यॐअपहताऽअसुरारक्षांसिवेदिषदइत्यन्नोपरितिलान्विकीर्यदक्षिणहस्तेनमोदकादीन्यादाय ॐअद्यामुकगोत्रपितरमुकशर्मन्प्रथममासिकश्राद्धइदमन्नंसोपकरणंतेमयादीयतेतवोपतिष्ठतामित्युत्सृजेत् ततोगायत्रीमधुवाताइत्यादिकृचंॐमधुमधुमध्वितिचजपेत् अन्नहीनमंत्रंपठेत् ततःकुशेषूपविश्य पुनर्गायत्रीमधुवाताइत्यादिकृचंमधुमधुमध्वितिचजपेत्रक्षोघ्नंमंत्रान्कृणुष्वपाजइत्यादिकान्जपेत् भूमौतिलान्क्षिप्त्वापित्र्यमंत्रपुरुषसूक्तप्रतिरथादीनिपवित्राणियथाशक्तिजपेत् ॐनमोस्तुभ्यंविरूपाक्षेतिश्लोकमपिचपठेत् उच्छिष्टसन्निधावास्तृतकुशात्रयाभूमिंप्रोक्ष्यव्यजनघृततिलयुतमन्नं वारिणाप्लाव्य ॐअग्निदग्धायेजीवायेप्रदग्धाः कुलेममभूमौदत्तेनतृप्यन्तु तृप्तायान्तु परांगतिमिति तदन्नंकुशोपरिविकिरेत् ततःसव्यंकृत्वा आचम्य हरिंस्मृत्वा अपसव्यंकृत्वापिंडस्थानंनिर्माय तन्मध्येवामहस्तेपातदक्षिणहस्तगृहीतदर्भपिंजुलीमूलेनप्रादेशमात्रमम्म हतेत्यादिनोलिख्य दर्भपिंजुलीमुत्तरतस्त्यजेत् ततोरेखोपरिॐयेरूपाणिमिंत्रेणांगारंभ्रामयित्वा अंगारंदक्षिणतस्त्यजेत् ततोरेखोपरिउपमूलसकृल्लूनकुशत्रयंदक्षिणाग्रंमास्तीर्यसव्येनदेवताभ्यइतित्रिजपेत् ततोऽपसव्यंकृत्वा पुटकेतिलजलंगंधपुष्पाणि कृत्वा मोदकादीन्यादायॐअद्यामुकगोत्रपितरमुक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रथममासिकश्राद्धपिंडस्थानेऽत्रावनेनिक्ष्व ते मया दीयते तवोपतिष्ठतामित्यवनेजनं कुशोपरि निदध्यात् तत
स्तिलघृतमधुयुतेनान्नेन पिंडं कृत्वा घृतमधुभ्यामभिघार्य्य दक्षिणहस्तेन मोदकादीनि चादाय ॐ अद्यामुकगो
त्रपितरमुकप्रेत प्रथममासिकश्राद्धे एष पिंडस्ते मया दीयते तवोपतिष्ठतामिति वामान्वारब्ध दक्षिणहस्तेनाव
नेजनस्थाने पिंडं दद्यात् ततो दर्भमूले करं प्रोञ्छ्य सव्यं कृत्वाचम्य हरिं स्मृत्वा अपसव्यं कृत्वा दक्षिणाभिमुखः
ॐ अत्र पितर्मादयस्व यथाभागमावृषायस्वेति पठेत् तत उत्तराभिमुखीभूय श्वासं नियम्य पितरं भास्वरमूर्तिं
ध्यायन् मुखं पर्यावर्तयन् अमीमदंत पिता यथाभागमावृषायिष्टेति पठेत् ततोऽवनेजनपात्रं दत्त्वावशिष्ट
जलयुतं वामहस्ते कृत्वा दक्षिणहस्तेन मोदकादीन्यादाय ॐ अद्यामुकगोत्र पितरमुक प्रेत प्रथममासि
कश्राद्धे पिंडेऽत्र प्रत्यवनेनिक्ष्व ते मया दीयते तवोपतिष्ठतामिति प्रत्यवनेजनं पिंडोपरि निदध्यात् ततो नीवी
विस्रस्य सव्यं कृत्वाचम्य अपसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय उभाभ्यां पिंडोपरि रा तले
पितर्वासस्त्वनि सूत्रं धृत्वा मोदकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेत प्रथममासिकश्राद्धपिंडए
तद्वासस्ते मया दीयते तवोपतिष्ठतामिति सूत्रं समुत्सृजेत् ततस्तूष्णीं गंधपुष्पादिकं दद्यात् ततः पिंडशे
षान्नं पिंडसमीपे विकिरेत् ॐ शिवा आपः संत्विति जलं ॐ सौमनस्यमस्त्विति पुष्पं अक्षतं चारिष्ट
मस्त्विति तंडुलान् तत्र पात्रे परिक्षिपेत् मोदकादीन्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रे
तस्य प्रथममासिकश्राद्धदत्तैतदन्नपानादिकमुपतिष्ठतामित्यक्षय्योदकं दद्यात् ततः सव्यं (९१

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कृत्वा ओं अघोरः पितास्त्विति दक्षिणां दिशं पश्यन् पिंडोपरि पूर्वाग्रां जलधारां दद्यात् ततः पूर्वाभिमुखी
भूय ओं गोत्रं नो वर्द्धतां दातारो नोभिवर्द्धतां वेदाः संततिरेव चेत्यादिनाशीःप्रार्थनं कुर्यात् ततोऽपसव्येन
पिंडोपरि सपवित्रान् कुशान् धृत्वा पुटकादिस्थजलेन ओं ऊर्जं वहंतीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधा
स्थ तर्प्पयत मे पितरमिति कुशोपरि दक्षिणाग्रां जलधारां दद्यात् ततः पिंडमाघ्राय उत्थापयेत् पिंडाधा
रकुशान् उल्मुकं च वन्हौ प्रक्षिपेत् अर्घपात्रमुत्थाप्य मोदकादीन्यादाय ओं अद्यामुकगोत्रस्य पितुरमुकप्रे
तस्य कृतैतत्प्रथममासिकश्राद्धप्रतिष्ठार्थमिदं रजितं चंद्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां ददा
तुमहमुत्सृजे इति दक्षिणां दद्यात् ततः सव्यं कृत्वा ओं देवताभ्य इति त्रिर्जपेत् ततोऽपसव्यं कृत्वा पाणिना दी
पं निर्वाप्य हस्तौ पादौ प्रक्षाल्य सव्यमाचमनं कुर्यात् ओं प्रमादादिति पठित्वा विष्णुं स्मरेत् श्राद्धीयवस्तूनि
ब्राह्मणाय प्रतिपादयेत् जले वा क्षिपेत् प्रायेण पात्रिकमेव मासिकश्राद्धं कुर्वंतीत्यपात्रकप्रयोगो लिखि
तः त्रिपक्षश्राद्धमपि कर्तव्यमिति तच्च मासिकवत् एवमेव द्वितीयमासिक तृतीयमासिक चतुर्थमासि
क पंचममासिकोनषाण्मासिक षाण्मासिक सप्तममासिकाष्टममासिक नवममासिक दशममासिकैका
दशमासिकोनवार्षिक द्वादशमासिक श्राद्धेषु तत्तदप्रक्षेपेण प्रयोग ऊह्यः अधिमासिपाते एकादशमासिका
नंतरं द्वादशमासिकं ततऊनवार्षिकं ततस्त्रयोदशमासिकं श्राद्धमिति क्रमः सपात्रकमासिकश्राद्धकरणे
ब्राह्मणनिमंत्रणस्वागतप्रश्नपादार्घ्यदानाचमनीयदानब्राह्मणोपवेशनप्रतिवचननमोवाचन ब्राह्म

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रा॰ णविसर्जनादिविशेष श्राद्ध श्राद्धप्रयोगवदूह्यइति अथ सपिंडनश्राद्धप्रयोगः तत्र चाधुनिकाः प्रेतश्रा
वि॰ द्धानि रिक्तश्राद्धचतुष्टयमपाकमेव कुर्वंतीति तथैव लिख्यते तत्र पूर्वदिने निरामिषमेकवारंभुक्त्वारा
९३ त्रौ सर्वभुक्तान्नेन गृहे विप्रं वेनिवेशनं गत्वा दक्षिणप्लवगोमयोपलिप्तायां भूमावाचान्तउपविश्य ब्राह्मणमु
दङ्मुखमुपवेश्य कृतापसव्यः पुष्पचंदनतांबूलानि ब्राह्मणकरे दत्वा दक्षिणकरेण ब्राह्मणजानुस्पृष्ट्वा
ॐ अस्यां रात्रावमुकगोत्रस्य पितुरमुकप्रेतस्य श्वः सपिंडीकरणश्राद्धकरणाय भवंतं ब्राह्मणमामंत्रये
इत्यामंत्रणं कुर्यात् ॐ आमंत्रितोस्मीति प्रतिवचनं ततः ॐ अक्रोधनैरित्यादि ॐ सर्वायासविनिर्मुक्तेनकाम
क्रोधविवर्जितेन भवितव्यं भवतानः श्वस्तने श्राद्धकर्म्मणि ब्राह्मणं नियमान् श्रावयेत् यद्यविघ्नेन रजनीय
स्यात्तदा सर्वमेतत्करिष्यामीति प्रतन्प्रतिवचनं ततोऽग्निमद्दिने प्रातः श्वेतवस्त्रयुग्मेन स्नात्वा मध्यंदिने
पुनः स्नात्वा कृतनित्यक्रिया श्राद्धकर्ता श्राद्धनिषिद्धेतरवेलायां गोमयोपलिप्तात्वतपाकस्थानेज्वि
लान्विकीर्य्य परितश्छागान्बंधयित्वा सपिंडद्वारा नूतनभाण्डैः स्वयं वा पाकमारभेत् श्राद्धभूमिंपं
चगव्येनोपलिप्य जलदर्भाद्यैः संशोध्य गौरस्रनिकायाछाद्यानिलैः सर्षपैश्च विकिरेत् द्विजं कारित
श्मश्रुनखच्छेदनमभिगम्य दंतधावनं ताम्रपात्रे तैलोद्वर्तनान्युपनीय स्नानार्थे दत्तजलं तं स्नानं य
जमानसवर्णेनाहूतमाचांतं मध्याह्ने शुचिराचांतः शुक्लद्विवासाउपविश्य गोमयोपलिप्तायां भूमौ वामा
वर्त्तेनभक्तभोमत्रमंडलायां ॐ भूम्यै नमः इत्यक्षतपुष्पैस्त्रिरर्चयित्वा भूमौ कुशत्रयमास्तीर्य तदुपरि ९३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निषन्ने ॐ स्वागतमिति स्थितं ब्राह्मणं पृच्छेत् ॐ सुस्वागतमिति तेनोक्ते ॐ इदं ते पाद्यमित्युपनीय विनीतः
सन् पुनरभिनवपात्रे ब्राह्मणपादौ प्रक्षालयेत् ततः पुटकेऽर्घं कृत्वा दक्षिणाभिमुखोऽपसव्यं कृत्वा मोट
कादिकमादायार्घपात्रं वामे कृत्वा ॐ अद्यामुकगोत्रपितरमुकगोत्रामितरप्रेतसपिंडीकरणं श्राद्ध एष पादा
र्घस्ते मया दीयते तेन वोपतिष्ठतामिति पादार्घं दद्यात् तत आचमनीयजलं पात्रस्थमभिनीय शिरसाभिवंद्य जा
नुवी विश्राव्य ॐ इदं ते आचमनीयजलं ब्राह्मणाय दत्वा स्वयं पादौ प्रक्षाल्याचम्य तमाचमय्याग्रे कृत्वा
श्राद्धदेशमागच्छेत् पूर्वरात्रौ निमंत्रणं संभवे तस्मिन्नेवाह्नि श्राद्धवेलायां पूर्वोक्तविशेषणविशिष्टयज
मानसवर्णेनाहूतं पूर्ववत्कृतगोमूत्रमंडलायां भूमावुभावप्युपविशतः ततः श्राद्धकर्ता ॐ इदं ते पाद्यमु
पनीय विनीतः पुनः पुनरभिनवपात्रे ब्राह्मणपादौ प्रक्षालयेत् ततोऽपसव्यं कृत्वा पुष्पचंदनतांबूला
नि विप्रकरे दत्वा ब्राह्मणजानु दक्षिणं हस्तेन स्पृष्ट्वा ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडी
करणश्राद्धकरणाय भवंतं ब्राह्मणमहमामंत्रये इत्यामंत्र्य ॐ आमंत्रितोस्मीति तेनोक्ते ॐ अ
क्रोधनैरित्यादिना ॐ सर्वायासविनिर्मुक्तैरित्यादिना च ब्राह्मणं नियमान् श्रावयेत् ॐ भवि
तव्यमिति तेनोक्ते अर्घं परिकल्प्य वामहस्ते कृत्वा मोटकादिकमादाय ॐ अद्यामुकगो
त्रपितरमुकप्रेतसपिंडीकरणश्राद्धे एष पादार्घस्ते मया दीयते तेन वोपतिष्ठतामिति पादार्घं
दद्यात् तत आचमनीयजलं पात्रस्थं शिरसाभिवंद्य जानुनि विश्राव्य ॐ इदं ते आचमनीयमिति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्राह्मणाय दत्वा सव्येन स्वयं पादौ प्रक्षाल्याचम्य तमाग्रे कृत्वा श्राद्धदेशमागच्छेत् तत्र प्रांमुख उप
विश्य सिद्धमिति पृष्ट्वा ऽऽस्त्वेति ब्राह्मणमुख्यमुपवेशयेत् द्विजपादयोस्तले कुशान् दद्यात् आसन
समीपे तिलतैलेन दीपं प्रज्वाल्य स्थापयेत् अन्यांश्च प्रत्यासन समीपे चतुरो दीपान् स्थापयेत् ब्रा
ह्मणे न दीपरक्षा कर्तव्या रक्षोघ्नान् गौरसर्षपान् तिलान् श्राद्धदेशे सन्निधापयेत् काकाकुक्कुटादीन्
श्राद्धहन्तृन् अपसारयेत् ततः ॐ अपवित्रः पवित्रो वेत्यादि पठित्वा ॐ पुंडरीकाक्षः पुनात्विति श्राद्धीयद्रव्याणि
चात्मानं कुशत्रयेण सिंचयेत् ततः कुशत्रयतिलजलान्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य प्रेत
त्वाविमुक्तिहेतु षोडशश्राद्धान्तर्गतसपिंडीकरणश्राद्धमहं करिष्ये इति संकल्पं कुर्यात् ॐ कुरुष्वे
ति ब्राह्मणो वदेत् ॐ गायत्रीजपमहं करिष्य इति ब्राह्मणं पृच्छेत् ॐ कुरुष्वेति तेनाभ्यनुज्ञातः प्रणवव्या
हृतिसहितां गायत्रीं त्रिर्जपेत् ततो देवताभ्य इति त्रिर्जपेत् ततो देवश्राद्धार्थोपकल्पितरीक्षिदिदेशाभाग
न्यो दङ्मुख उपविश्य कुशत्रययवजलान्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरण
निमित्तकामुकगोत्रपितामहप्रपितामहवृद्धप्रपितामहामुकामुकशर्मश्राद्धसंबंधिनो विश्वेदेवा
इदमासनं वो नमः इति पूर्वाग्रं कुशत्रयरूपं सजलयवप्रोक्षितमुत्सृजेत् ॐ विश्वान्देवानहमावाह
यिष्ये इत्युक्त्वा ॐ विश्वेदेवास ऽआगत शृणुता म ऽइमर्ठ हवम् इदं बर्हिर्निषीदतेत्यावाह्य ॐ यवो
सि यवयास्मद्द्वेषो यवयारातीरिति यवान्विकीर्य ॐ विश्वेदेवाः शृणुतेम ऽइदमर्ठ हवम्मे ये ऽअन्त

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रिक्षेपऽउपद्यविष्टाये ऽग्नाग्निजिव्हा उत्तवायउग्राऽग्रासद्यास्मिन्वर्हिषिमादयद्ध्वम् ऊँ ग्रागन्तुमहा
भागा विश्वेदेवा महाबलाः ये यत्रयोजिता श्राद्धे सावधाना भवन्तुते इति पठेत् ततः पुटके पूर्वाग्रं पवित्रं धृत्वा
ऊँ शन्नोदेवीरभिष्टय ऽआपो भवन्तु पीतये शंय्योरभि स्रवन्तु न इति जलं क्षिप्त्वा ऊँ यवोसीति यवान् प्रक्षि
प्या गंधपुष्पे तूष्णीं तत्र प्रक्षिप्य अर्घपात्रं वामहस्ते कृत्वा पवित्रं भोजनपात्रे पूर्वाग्रं धृत्वा तदुपरि किंचि
दुदकांतरं दत्वा ऊँ यादिव्या ऽआपः पयसा संबभूवुर्या ऽग्नान्तरिक्षा ऽउत पार्थिवीर्य्याः हिरण्यवर्णा यज्ञि
यास्ता न ऽआपः शिवाः शं स्योनाः भवन्तु इति पठित्वा कुशात्रययवजलान्यादाय ऊँ अद्यामुकगोत्रस्य पि
तुरमुकप्रेतस्य सपिंडीकरणनिमित्तिकामुकगोत्रपितामहप्रपितामहवृद्धप्रपितामहामुकामुकशर्म
श्राद्धसंबंधिनो विश्वेदेवा एष वो हस्तार्घो नम इति पवित्रोपरि अर्घजलमुत्सृजेत् ततः पवित्रसहितमर्घ
पात्रमासनदक्षिणपार्श्वे ऊँ विश्वेभ्यो देवेभ्यः स्थानमसीति विश्वेदेवार्घपात्रमुत्तानं स्थापयेत् ततः
कुशात्रययवजलान्यादाय ऊँ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकामुकगो
त्र पितामहप्रपितामहवृद्धप्रपितामहामुकामुकशर्म श्राद्धसंबंधिनो विश्वेदेवा एतानि गंधपुष्पधू
पदीपतांबूलयज्ञोपवीतवासांसि वो नम इति गंधादीनुत्सृजेत् ततो भोजनपात्रासनयोश्चतुर्दिक्षु जलेन च
तुष्कोणं मंडलं कृत्वा अपसव्येन मोदकादिकमादाय तिलघृतं व्यंजनयुतं मन्त्रं ऊँ इदमन्नमेतज्जस्वामिपितृ
भ्यो नम इति दक्षिणमुखमुत्सृजेत् ततः सव्यं कृत्वा ताम्रपात्रादिकं गृहीत्वान्नेतान्नमादाय मनाकथि ९६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वादेवान्ध्यायन् पात्रे परिविष्यात् व्यंजनानि घृतं जलं च तत्रोपनीयान्नोपरि मधु दत्वा ॐ मधुवाता
इति त्र्यृचं ॐ मधु मधु मध्विति मंत्रैरन्नमभिमंत्रयेत् ततः ऋजुहस्ताभ्यामन्नपात्रमालभ्य ॐ पृथिवी ते
पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽमृते अमृतं जुहोमि स्वाहा ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्
समूढमस्य पांसुरे इति च पठित्वा ॐ हव्यकव्यमिदं रक्षस्वेदमिति पठित्वा ॐ इदमन्नमित्यन्ने ॐ इ
मा आप इति जले ॐ इदमाज्यमिति घृते ॐ इदं हविरिति पुनरन्ने दक्षिणकरांगुष्ठमावेश्य ॐ यवोसीत्यन्नोप
रि यवान्विक्षिप्य कुशत्रययवजलान्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनि
मित्तकामुकगोत्रपितामहप्रपितामहवृद्धप्रपितामहामुकामुकशर्मश्राद्धसंबंधिनो विश्वेदेवा
एतद्वोन्नं सोपकरणं न मम इत्यन्नमुत्सृजेत् एवमेव काण्डं निर्वर्त्य हस्तौ पादौ प्रक्षाल्य कुशवटुकादि
कं पुनर्गृहीत्वा प्रेतश्राद्धदेशमागत्योपविश्य अपसव्यं कृत्वा दक्षिणाभिमुखो मोदकादीन्या
दाय ॐ अद्यामुकगोत्र पितरमुकप्रेत सपिंडीकरणश्राद्ध इदमासनं मया दीयते तवोपतिष्ठतामि
ति पित्रे आसनं मोदकरूपं तिलप्रोक्षितमुत्सृजेत् पुनर्मोदकादिकमादाय ॐ अद्यामुकगोत्रस्य पित
रमुकप्रेतस्य सपिंडीकरणनिमित्तकश्राद्धेऽमुकगोत्र पितामहाऽमुकशर्मन्निदमासनं ते स्वधा इति
स्थानत्रये ऽक्रमासनेषु सर्वपश्चिमस्थानस्थितमासनं पितामहायोत्सृजेत् पुनर्मोदकादीन्यादाय ॐ अ
अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकश्राद्धेऽमुकगोत्रप्रपितामहामुक ९७

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शर्मन्निदमासनंतेस्वधा इतिमध्यमासनं प्रपितामहायोत्सृजेत् पुनर्मोदकादिकमादाय ॐ अद्यामुक
गोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरण निमित्तक श्राद्धेऽमुकगोत्रवृद्धप्रपितामहामुक शर्मन्निदमा
सनंतेस्वधेतिसर्वं पूर्वमासनं वृद्धप्रपितामहायोत्सृजेत् ततः पितामहादीनुद्दिश्य ॐ पितॄनहमा
वाहयिष्य इत्युक्त्वा ॐ उशन्तस्त्वानिधीमह्युशन्तः समिधीमहि ॐ उशन्नुशतः आवाहपितॄन्हवि
षे अत्तवे इतिपितामहादीनावाह्य ॐ अपहते इत्यादि उभयश्राद्धस्थाने तिलान् विकार्य्य ॐ आयंतु
नः पितर इत्यादिमंत्रं जपेत् ततोऽर्घपात्रचतुष्टयेऽनखच्छिन्नं दक्षिणाग्रं पवित्रं प्रत्येकं धृत्वा ॐ शन्नोदे
वीरिति प्रत्येकं जलं क्षिप्त्वा ॐ तिलोसीति स्वाहा तेन मंत्रेण प्रत्येकं यवतिला अक्षिप्य गंधपुष्पैतेष्वेवतू
ष्णीं प्रक्षिप्य प्रेतार्घपात्रं वामहस्ते कृत्वा पवित्रं पात्रब्राह्मणकरे उत्तराग्रं धृत्वा तदुपरि किंचिज्जलां
तरं दत्वा ॐ या दिव्या आप इति पठित्वा मोदकादीन्यादाय ॐ अद्यामुकगोत्रपितुरमुकप्रेतसपिंडीक
रण श्राद्ध एष हस्तार्घस्ते मया दीयते तवोपतिष्ठतामिति पात्रं ब्राह्मणहस्ते पवित्रोपरि अर्घजलं ददु
त्सृजेत् अवशिष्टजलसहितार्घपात्रं ब्राह्मणाग्रे निदध्यात् पितामहार्घपात्रं वामहस्ते कृत्वा पवित्रं
भोजनपात्रे धृत्वा तदुपरि जलांतरं दत्वा ॐ या दिव्या इत्यादि पठित्वा मोदकादीन्यादाय ॐ अद्यामुकगो
त्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तक श्राद्धेऽमुकगोत्रपितामहामुकशर्मन्नेष ते हस्तार्घः
स्वधेति पूर्ववदर्घं दद्यात् अवशिष्टजलं प्रेतमर्घपात्रे धारयेत् ततः प्रपितामहार्घपात्रं वा ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

महस्ते कृत्वा पवित्रं भोजनपात्रे धृत्वा तदुपरि जलान्तरं दत्त्वा ॐ या दिव्या इत्यादि पठित्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकश्राद्धे अमुकगोत्र प्रपितामह अमुकशर्मन्नेष ते हस्तार्घः स्वधेत्यर्घं दद्यात् पूर्ववदुत्सृजेत् तदर्घपात्रं सावशिष्टजलयुतमग्ने स्थापयेत् तृतीयार्घपात्रं वामहस्ते कृत्वा पवित्रं भोजनपात्रे धृत्वा तदुपरि जलान्तरं दत्त्वा ॐ या दिव्या इति पठित्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकश्राद्धे अमुकगोत्र वृद्धप्रपितामहामुकशर्मन्नेष ते हस्तार्घः स्वधेति पूर्ववदर्घमुत्सृजेत् अवशिष्टजलयुतार्घपात्रमग्ने स्थापयेत् ततः सव्यं कृत्वा आचम्य अपसव्यं कृत्वा पटकत्रयमग्ने धृत्वा प्रेतार्घपात्रं गृहीत्वा ॐ ये समानाः सुमनसः पितरो यमराज्ये तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ये समानाः सुमनसो जीवा जीवेषु मामकाः तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतं समाः इति मन्त्राभ्यां प्रेतार्घपात्रस्थजलतृतीयभागं पटकान्तरे धृत्वा पुनरपि मन्त्रद्वयं पठित्वा परतृतीयभागं पटकान्तरे धृत्वा प्रेतार्घपात्रस्थतृतीयभागजलं पटकान्तरे धृत्वा तूष्णीं प्रथमपटकस्थविभक्तजलतृतीयभागं प्रेतार्घपात्रे कृत्वा पवित्रपुष्पसहितं प्रेतार्घपात्रमादाय ॐ ये समाना इति मन्त्रद्वयेन प्रेतार्घपात्रस्थतृतीयभागजलं पितामहार्घपात्रस्थजले मेलयेत् एवमपरपटकस्थितार्घतृतीयभागद्वयं क्रमेण प्रत्येकं प्रेतार्घपात्रे कृत्वा प्रत्येकं मन्त्रद्वयं पठित्वा प्रपितामहार्घपात्रस्थजलवृद्धप्रपितामहार्घपा ९९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्रस्थजलेमेलयेत् ततःश्रेतार्घपात्रं ब्राह्मणवामपार्श्वेॐपि। त्रेस्थानमसीतिन्युब्जं कृत्वास्थापयेत् वृद्धप्रपि
तामहार्घपात्रस्थजलादिकंप्रपितामहार्घपात्रेकृत्वा तत्सर्वंपितामहार्घपात्रेकृत्वापितामहार्घपात्रेकृ
त्वापितामहार्घपात्रमुत्तानंप्रपितामहार्घपात्रोपरिस्थित्वा तद्वयमुत्तानंवृद्धप्रपितामहार्घपात्रोपरिस्थ
त्वा पात्रत्रयमेकदैवपितामहासनवामपार्श्वेॐपितृभ्यः स्थानमसीन्युब्जं कृत्वास्थापयेत् एवंस्थापि
तमहार्घपात्रचतुष्टयंदक्षिणपर्यंतेनचालयेत् ततोमोटकादिकमादायॐ अद्यामुकगोत्रपितरमुक
प्रेतसपिंडीकरणश्राद्धे एतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसितेतवोपतिष्ठंतांमितिपित्रे
गंधादीनिदद्यात् पुनर्मोटकादीन्यादायॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यसपिंडीकरणनिमित्तक
श्राद्धे अमुकगोत्रपितामहामुकशर्मन्नेतानिगंधागंधधूपपुष्पदीपतांबूलयज्ञोपवीतवासांसिते
स्वधेतिपितामहायगंधादीन्युत्सृजेत् एवंप्रपितामहायवृद्धप्रपितामहायचगंधादीन्युत्सृजेत्। य
थाक्रमेण ततःपितृब्राह्मणहस्तेस्वहस्तेनॐ एषगंधइतिचंदनंनिवेदयेत् ॐसुगंधइतितेनो
क्ते ॐ एतानिपुष्पाणिनिनिवेदयेत् ॐसुपुष्पाणीतितेनोक्ते ॐ एषधूपइतिनिवेदयेत् ॐसुधूपइ
तितेनोक्तेॐ एषदीपइतिदीपंनिवेदयेत् ॐसुदीपइतितेनोक्तेॐ इमेयज्ञोपवीतेइतिनिवेदयेत्
ॐसुयज्ञोपवीतेइतिप्रत्युक्तेॐ एतानिवासांसीतिनिवेदतेॐसुवासांसीतितेनोक्तेब्राह्मणायप्र
तिपादयेत् पुष्पाणिशिखानिरिक्तदेशेनधारयेत् ततःपात्रब्राह्मणचतुर्दिशंचतुष्कोणंमंडलंजलेन १००

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रा॰ कुर्यात् नामहादित्रिके चतुष्कोणं मंडलं कुर्यात् ततः सव्यं कृत्वा प्राङ्मुख उपविश्य दक्षिणजानुस्ताम्रपात्रादौ
वि॰ व्यंजनक्षारवर्जितं सघृतमन्नं कृत्वा पुटकादिस्थजलेलेहस्तेन ओं अग्नये कव्यवाहनाय स्वाहा ओं सोमाय
२०१ पितृमते स्वाहा ओं सोमाय पितृमते स्वाहा इत्याहुतिद्वयं तदन्नेन जुहुयात् ततः अपसव्यं कृत्वाऽव
शिष्टमन्नं पितामहादिपात्रे किंचित् पिंडार्थं चावशेषयेत् ततो हस्ताभ्यां ताम्रपात्रमादाय तेनान्नं
गृहीत्वा प्रेतपात्रे ध्यायन् परिविष्यात् पृथक् पुटकादिस्थितानि घृतजलव्यंजनानि चोपयेत् ततस्ते
नैव क्रमेण पितामहादिपात्रत्रये प्रत्येकं मन्त्रादिपरिवेषणं कुर्यात् ततः प्रेतपात्रादिस्थितान्नेषु प्रत्येकं म
धु दद्यात् ततः प्रत्येकमभिमंत्रयेत् ओं मधुवाता ऋतायते मधु क्षरंति सिंधवः माध्वीर्नः संत्वोषधीः ओं
मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः मधुद्यौरस्तु नः [illegible] माध्वी
र्गावो भवन्तु नः ओं मधु मधु मध्विति मंत्रैः ततः प्रेतान्नपात्रं व्यस्ताभ्यां हस्ताभ्यामालभ्य ओं पृथिवी ते पात्रं द्यौर
पिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा ओं इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसु
रे इति जपित्वा ओं कृष्ण कव्यमिदं रक्षस्व मदीयमित्युक्त्वा पात्रं ब्राह्मणस्य दक्षिणहस्तांगुष्ठं गृहीत्वा ओं इदमन्नं
ओं इमा आपः ओं इदमाज्यं ओं इदं हविरिति क्रमेण अन्नजलघृतान्नेषु तं निवेश्य ओं अपहता इत्यनेनोपरि प्रचुर
तिलान् प्रक्षिप्य मोटकादीन्यादाय ओं अद्यामुकगोत्र पितरमुक प्रेत सपिंडीकरण निमित्तक श्राद्धे इदम
न्नं सोपकरणं ते मया दीयते तवोपतिष्ठतामिति पित्रे अमुमुत्सृजेत् अनेनैव क्रमेण पितामहादिपात्र १८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मालभ्य ओं पृथिवीते पात्रमित्यादि पठित्वा ओं इदमन्नमित्यादिना स्वदक्षिणहस्तांगुष्ठनिवेशनं कृत्वा ओं अ
पहता इत्यादिना तिलानन्ने विकीर्य्य मोटकादीन्यादाय ओं अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिं
डीकरणनिमित्तकश्राद्धेऽमुकगोत्र पितामहामुकशर्म्मन्नेतत्तेऽन्नं सोपकरणं स्वधेति पितामहपात्र
मुत्सृजेत् ततः प्रपितामहान्नपात्रमालभ्य पूर्ववत् ओं पृथिवीते पात्रमित्यादिकं सर्वं कृत्वा मोटकाद
न्यादाय ओं अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरण। निमित्तकश्राद्धेऽमुकगोत्र प्रपितामहा
मुकशर्म्मणे तत्तेऽन्नं सोपकरणं स्वधेति प्रपितामह पात्रमुत्सृजेत् ततो वृद्धप्रपितामहान्नपात्र
मालभ्य पूर्ववत् ओं पृथिवीते पात्रमित्यादिकं सर्वं कृत्वा मोटकादीन्यादाय ओं अद्यामुकगोत्रस्य
पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकश्राद्धेऽमुकगोत्रस्य वृद्धप्रपितामहामुकशर्म्मन्नेतत्तेऽन्नं सो
पकरणं स्वधेति वृद्धप्रपितामहायान्नमुत्सृजेत् तत ओं भवान् प्रागयत्विति पात्रं ब्राह्मणाय जलचुलु
कं दत्वा सप्रणव व्याहृतिकां गायत्रीम् ओं मधुवाता इत्यादिकं च ओं मधुमधुमध्विति च जपित्वा
ओं अन्नहीनमित्यादि च पठित्वा ओं यथासुखं जुषस्वेति पात्रं ब्राह्मणं प्रति ब्रूयात् सेंच ओंकार
पूर्ववास्मैं नयाणि तपात्र मत्यजन चुलुकं गृहीत्वा भुंजीत हासको धत्वरादिकं कुर्यात् व्यंज
नार्थं हस्तादिनां संस्तानकुर्यात् श्राद्धकर्त्ता दर्भेष्वासीनः सप्रणव्याहृतिकां गायत्रीं ओं मधुवाता
इत्यादिकं ऋचं ओं मधुमधुमध्विति च जपेत् गायत्रीं ब्राह्मणमनुश्रावयेत् ओं कृणुष्व पाज इत्यादीन् रक्षोघ्नान्

Kirtikant Sharma Collection, Najafgarh

श्रा॰ वि॰ १०३ मान् पठित्वा भूमिं तिलैरास्तीर्य्य आहूतब्राह्मणं पितृरूपतया ध्यात्वा ॐ उदीरतामित्यादि पितृमंत्रान् ॐ
सहस्रशीर्षा इत्यादि पुरुषसूक्तं ॐ आशुः शिशानो इत्यादिकमप्रतिरथमन्यानि च शिवसंकल्पप्रभृ
तीनि पवित्राणि ऋग्यजुःसामानि रुचि स्वव प्रभृतीनि च यथाशक्ति जपेत् ॐ नमस्तुभ्यं विरूपाक्ष इति श्लो
कमपि पठेत् वीणाध्वनिभिर्ब्राह्मणं हर्षयन् व्यंजनगुणान् इदमन्नमित्यादिक्रमेण कीर्तयन् यत्र यत्रेच्छो
पलभ्यते तत्तस्य तत्तदुपनयन् मंदं मंदं भोजयेत् ततस्तृप्तं ब्राह्मणं ज्ञात्वा पितामहपात्रसन्निधावास्तृत द
क्षिणाग्रकुशत्रयां भूमिं प्रोक्ष्य सर्वप्रकारकमन्नमादाय सतिलजलेनाप्लाव्य ॐ अग्निदग्धायेजी
वाये प्रदग्धाः कुले मम भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिमित्यादि स्मृती कुशोपरि तदन्नं विकिरे
त् ततः सव्यं कृत्वा चामेत् हरिं स्मृत्वा अपसव्येन पात्रे ब्राह्मणाय ॐ इदं नेप्रत्यायोशानतिति जलगंडूषं
दत्वा ॐ स्वदितमिति पृष्ट्वा ॐ सुस्वदितमिति तेनोक्ते ॐ पिंडमहं करिष्ये इति पृच्छेत् ॐ कुरुष्वेत्यनुज्ञा
तः पात्रब्राह्मणयाचमनार्थं पात्रं दापयेत् ततः प्रेतपिंडार्थमेकामपरां पितामहादित्रिकपिंडदानार्थं
मेकहस्तमितां चतुरस्रां चतुरंगुलोच्छ्रितां सैकतां दक्षिणप्लवां पिंडिकां निर्माय तन्मध्ये वामेन पाणिना दर्भ
पिंजुलीं गृहीत्वा दक्षिणहस्ते कृत्वा तन्मूलेन सव्योपगृहीत्वा दक्षिणपाणिना ॐ अपहता इत्यादि पठित्वा
दक्षिणाग्रं रेखां प्रदेशप्रमाणं सकृदुल्लिख्य तं दर्भपिंजुलीमुरस्यां दिशि क्षिपेत् एवमेवापरपिंडिकाया
मध्ये कां रेखां कुर्यात् ततः पूर्वपिंडिकारेखोपरि ॐ ये रूपाणि प्रतिमुंचमानाऽसुराः संतः स्वधया १०३

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

श्रा॰
वि॰
१०४

चरन्ति पराणपुरो निपुरो ये भरन्त्यग्निष्टाल्लोकात्प्रणुदात्वस्मादिति मंत्रेणांगारैर्भ्रामयित्वा दक्षिणतः क्षि
पेत एवमेवापरेखायामंगारभ्रामयेत् तत उभयत्रैरेखायामुपमूलसकृल्लूनान्दक्षिणाग्रान् कुशानास्त्र
णयात् ततः सव्यं कृत्वा ओं देवताभ्यः इति त्रिर्जपेत् ततोऽपसव्यं कृत्वा पुटकचतुष्टये जलतिलगंधपुष्पा
णि कृत्वा एकं पुटकं वामहस्ते कृत्वा मोदकादीन्यादाय ओं अद्यामुकगोत्र पितरमुकप्रेत सपिंडीकर
णश्राद्धे पिंडस्थाने त्रावनेनिक्ष्व ते मया दीयते न वोपतिष्ठतामिति पूर्वपिंडिकायां छिन्नमूलोपरि अवनेजनं
दद्यात् ततोऽपरं पुटकं वामहस्ते कृत्वा मोदकादीन्यादाय ओं अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीक
रण निमित्तक श्राद्धे पिंडस्थानेऽमुकगोत्र पितामहामुकशर्मन्नत्रावनेनिक्ष्व ते स्वधेति द्वितीयपिंडिकाया
मास्तृत कुशमूलसन्निधाने पितामहायावनेजनजलं दद्यात् ततो परपुटकं वामहस्ते कृत्वा दक्षिणहस्ते
न मोदकादीन्यादाय ओं अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तक श्राद्धे पिंडस्थाने
ऽमुकगोत्र प्रपितामहामुकशर्मन्नत्रावनेनिक्ष्व ते स्वधेत्यास्तृत कुशमध्ये प्रपितामहायावनेजनज
लं दद्यात् ततोऽपरं पुटकं वामहस्ते कृत्वा मोदकादीन्यादाय ओं अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य
सपिंडीकरण निमित्तक श्राद्धे पिंडस्थानेऽमुकगोत्र वृद्धप्रपितामहामुकशर्मन्नत्रावनेनिक्ष्व ते स्व
धेत्यास्तृतकुशाग्रे वृद्धप्रपितामहायावनेजनं जलं दद्यात् ततः जनतिलजलमध्याज्यसहितान्नेन प्रेत
पिंडं सर्वव्यंजनतिलजलमध्वाज्यहुतशेषान्नेन पिंडत्रयं च निर्माय चतुरः पिंडाः

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मधुघृताभ्यामानिधार्य प्रथमं प्रेतपिंडं दक्षिणहस्तेन मोदकतिलजलानि चादाय ॐ अद्यामुकगोत्र पितरमुक
प्रेत सपिंडीकरण श्राद्ध एष पिंडस्ते मया दीयते तवोपतिष्ठतामिति पूर्वपिंडिकायां कुशोपरि पित्रे पिंडं
दद्यात् ततो मोदकादीनि चादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकश्राद्धे
ऽमुकगोत्र पितामहामुकशर्म्मन्नेष पिंडस्ते स्वधेति द्वितीयपिंडिकायां प्रथमावनेजनस्थाने पितामहाय
पिंडं दद्यात् पुनर्मोदकादीनि पिंडं चादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकश्रा
द्धेऽमुकगोत्र प्रपितामहामुकशर्म्मन्नेतत्ते पिंडः स्वधेति प्रपितामहायापरावनेजनस्थाने पिंडं द
द्यात् पुनर्मोदकादीनि पिंडं चादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकश्रा
द्धेऽमुकगोत्र वृद्धप्रपितामहामुकशर्म्मन्नेष ते पिंडः स्वधेति वृद्धप्रपितामहायापरावनेजनस्थाने पिंडं
दद्यात् ततः पितामहादिपिंडास्तरण कुशमूले ॐ लेपभागभुजस्तृप्यन्त्विति करं प्रोञ्छ्य सव्यं कृत्वा
चम्य हरिं स्मरेत् ततोपसव्यं कृत्वा दक्षिणामुखः पितरमुद्दिश्य ॐ अत्र पितरमादाय स्व यथाभा
गमावृषायस्वेति पठित्वोत्तराभिमुखो भूत्वा श्वासं नियम्य भास्वरमूर्तिं पितरं ध्यायन्नुमुखं दक्षिणां
दिशं प्रत्यावर्तयन् ॐ अमीमदन्त पितरो यथाभागमावृषायिषतेति पठेत् पितामहादींस्तु द्दिश्य दक्षि
णामुखः ॐ अत्र पितरो मादयध्वं यथाभागमावृषायध्वमिति पठेत् उत्तराभिमुखो भूत्वा श्वासं निय हु
म्य तुष्टान् भास्वरमूर्तीन् पितामहादीन् ध्यायन्मुखं दक्षिणां दिशं प्रत्यावर्तयन् ॐ अमीमदन्त पितरो यथाभा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रुपायेनेति पठित: ततः प्रत्यवनेजनपात्रं वामहस्ते कृत्वा मोदकादीन्यादाय ओं अद्यामुकगोत्रस्य ममामुकप्रेतस्य सपिं
डीकरणश्राद्धे पिंडेऽत्रावनेनिक्ष्व ते मया दीयते नवोपतिष्ठतामिति पित्रे प्रत्यवनेजनं दत्वा पितामहावनेजन
पात्रं वामहस्ते कृत्वा मोदकादीन्यादाय ओं अद्यामुकस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकश्राद्धे
पिंडेऽमुकगोत्रपितामहामुकशर्म्मन्नत्र प्रत्यवनेनिक्ष्व ते स्वधेति पितामहाय प्रत्यवनेजनजलस्थं दद्यात्
प्रपितामहावनेजनपात्रं गृहीत्वा मोदकादीन्यादाय ओं अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकर
णस्य निमित्तके श्राद्धे पिंडे मुकगोत्र प्रपितामहामुकशर्म्मन्नत्र प्रत्यवनेनिक्ष्व ते स्वधे प्रपितामहाय प्रत्य
वनेजनं दद्यात् ततोऽवशिष्टं पुटकमादाय मोदकादीनि चादाय ओं अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य
सपिंडीकरणनिमित्तकश्राद्धे पिंडे मुकगोत्र वृद्धप्रपितामहामुकशर्म्मन्नत्र प्रत्यवनेनिक्ष्व ते स्वधेति वृ
द्धप्रपितामहाय प्रत्यवनेजनं दद्यात् ततो नीवी विस्रस्य सव्यं कृत्वा चस्य हरीं स्मृत्वा अपसव्यं कृत्वा वा
मेन पाणिना सूत्रं दक्षिणेनादाय ओं एतत्ते पितरो वास इत्युभाभ्यां हस्ताभ्यां पितृपिंडोपरि सूत्रं
धारयेत् पूर्ववत् पुनः सूत्रमादाय ओं नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जी
वाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो न
मो वो गृहान्नः पितरो दत्तं सतो वः पितरो देष्म ओं एतद्वः पितरो वास इति मंत्रं पठित्वा प्रत्येकं पिंडो
परि सूत्रं धारयेत् ततो मोदकादीन्यादाय ओं अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणश्राद्धपिंडे. १०६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वा देवाभ्यायन् पात्रे परिविष्यात् व्यंजनानि घृतं जलं च तत्रोपनीयान्नोपरिस्थं दत्वा ॐ मधुवाता
इति त्र्यचं ॐ मधु मधु मध्विति मन्त्रैरन्नमभिमन्त्रयेत् ततः ऋजु हस्ताभ्यामन्न पात्रमालभ्य ॐ पृथिवी ते
पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पद
मूसमूढमस्य पांसुर इति च पठित्वा ॐ कृष्ण कव्यमिदं रक्षमदीयमिति पठित्वा ॐ इदमन्नमित्यन्ने ॐ इ
मा आप इति जले ॐ इदमाज्यमिति घृते ॐ इदं हविरिति पुनरन्ने दक्षिणकरांगुष्ठमावेश्य ॐ यवोसीत्यन्ने
परि यवान्विक्षिप्य कुशत्रय यव जलान्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनि
मित्तकामुकगोत्र पितामह प्रपितामह वृद्धप्रपितामहामुकामुक शर्म श्राद्धसंबंधिनो विश्वेदेवा ए
तद्वोन्नं सोपकरणं नमः इत्युत्सृजेत् एवं देवकाण्डं निर्वर्त्य हस्तौ पादौ प्रक्षाल्य कुश वटुकादिकं प
रिगृहीत्वा प्रेत श्राद्ध देशमागत्योपविश्य अपसव्यादि कृत्वा दक्षिणाभिमुखो मोटकादीन्यादाय
ॐ अद्यामुकगोत्रपितरमुकप्रेत सपिंडीकरणश्राद्ध इदमासनं मया दीयते तवोपतिष्ठतामिति
पित्रे आसनं मोटकरूपं तिलप्रोक्षितमुत्सृजेत् पुनर्मोटकादिकमादाय ॐ अद्यामुकगोत्रस्य पितु
रमुकप्रेतस्य सपिंडीकरणनिमित्तक श्राद्धेऽमुकगोत्र पितामहाऽमुकशर्मन्निदमासनं ते स्वधा इति
स्थानत्रयेऽप्यासनेषु सर्वपश्चिमस्थानस्थितमासनं पितामहायोत्सृजेत् पुनर्मोटकादीन्यादाय ॐ अ
द्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तक श्राद्धेऽमुकगोत्र प्रपितामहामुक ॥ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रा. सव्येनदेवान्नपात्रे ॐ शिवा आपसंतुइति जलंदत्वा असव्येनपितृपितृब्राह्मणहस्ते पूर्वमंत्रेण जलंदद्यात्
वि. ॐ संत्विति प्रतिवचनम् ततः पितामहाद्यन्नपात्रेषु प्रत्येकं जलं दद्यात् अनेनैव क्रमेण ॐ सौमनस्यमस्त्वि
१०८ तिदेवान्नपात्रेषु पुष्पम् ततोपसव्येन पितृब्राह्मणहस्तेनेनैव मंत्रेण पुष्पं ततः पितामहाद्यन्नपात्रत्रिके
ऽनेनैवमंत्रेण प्रत्येकं पुष्पं दद्यात् ततः सव्येनाक्षतंचारिष्टमस्त्विति देवान्नपात्रे तंडुलप्रक्षेपः ततोपसव्ये
न प्रेतश्राद्धपात्रब्राह्मणहस्ते ॐ अक्षतंचारिष्टमस्त्विति तंडुलप्रक्षेपः ॐ अस्त्विति ब्राह्मणप्रतिवचनं
पितामहाद्यन्नपात्रत्रिकेपि प्रत्येकं ॐ अक्षतंचारिष्टमस्त्विति तंडुलप्रक्षेपः ततो मोदकादीन्याद
य ॐ अद्यामुकगोत्रस्यपितरमुकप्रेतस्य सपिंडीकरणनिमित्तक श्राद्धेऽमुकगोत्रस्य पितामह
स्यामुकशर्मणो दत्तेनदन्नपानादिकमक्षय्यमस्त्विति पितामहायाक्षयोदकं दद्यात् पुनर्मोदकादीन्या
दाय ॐ अद्यामुकगोत्रस्य पितुरमुकमक्षय्यमस्त्विति प्रपितामहायाक्षय्योदकं दद्यात् एवं वृद्धप्रपिताम
हायाक्षय्योदकं दद्यात् ततः सव्यंकृत्वांजलिसन्मनाः सुमना दक्षिणांदिशंपश्यन् ॐ अघोराः पितरः संत्विति पि
तामहादिपिंडत्रयोपरि पूर्वाग्रां जलधारां दद्यात् ॐ संत्विति ब्राह्मणप्रतिवचनं अत्रवारिधारादानमाचा
रात् अन्यथातु पाठमात्रं ततः प्राङ्मुखो गोत्रं नो वर्द्धतामिति पठेत् ॐ वर्द्धतामिति प्रतिवचनं दातारो नोभिवर्द्धन्तां
वेदाः संततिरेवच श्रद्धा च नो माव्यगमद्बहुदेयं नो स्त्विति अन्नंच नो बहु भवेदतिथींश्च लभेमहि याचितारश्च नः सं १०८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रा
वि.
१०९

माचयाविस्मकंचन एताःसन्त्वाशिषःसन्त्विति याचेत् ॐ सन्त्विति प्रतिवचनं ततोपसव्यं कृत्वा पिंडोपरि
सपवित्रकुशत्रयं दक्षिणाग्रमास्तीर्य ॐ नमो वाचयिष्ये इति ब्राह्मणं ब्रूयात् ॐ वाचनामित्यनुज्ञातः ॐ पितृ
नमः उच्यतामिति ब्राह्मणं ब्रूयात् ॐ अस्तु नम इति ब्राह्मणो वदेत् ततो वामहस्तोद्धृतजलपात्रं दक्षिणेनादाय ॐ
ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् स्वधास्थ तर्पयत मे पितॄनिति पित्रादीनुद्दिश्य सपवित्रकुशो
परि दक्षिणाग्रं जलधारां दद्यात् ततो नम्रीभूय पिंडानाघ्राय उत्थापयेत् पिंडाधारकुशान् उल्मुकं च वह्नौ प्रक्षिपेत् स
व्येन देवार्घपात्रं संचाल्य अपसव्येन पित्रार्घपात्राण्युत्तानीकृत्य दक्षिणां दद्यात् ततः सव्येन कुशत्रययवज
लदक्षिणाद्रव्याण्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकश्राद्धे अमुकगोत्र
पिताप्रपितामहवृद्धप्रपितामहामुकामुकशर्मश्राद्धसंबंधिनां विश्वेदेवानां कृतैतच्छ्राद्धप्रतिष्ठार्थमिदं
हिरण्यमग्निदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति भाजनस्थमुत्सृजेत्
ततोऽपसव्यं कृत्वा दक्षिणामुखो मोटक तिल जलान्यादाय दक्षिणां चादाय ॐ अद्यामुक
गोत्रस्य पितुरमुकप्रेतस्य कृतैतत्सपिंडीकरण श्राद्धप्रतिष्ठार्थमिदं रजितं चन्द्रदैवतं मम
कगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां पितृब्राह्मणकरे द
द्यात् ॐ स्वस्तीति प्रतिवचनम् पुनस्तथैव दक्षिणाद्रव्यादिकमादाय ॐ अद्यामुकगोत्रस्य पितु
रमुकप्रेतस्य सपिंडीकरणनिमित्तकश्राद्धे कृतैतदमुकगोत्रपितामहामुकशर्मश्राद्ध । १०९

सपिंडीदक्षिणाब्राह्मणाय्यः ५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रतिष्ठार्थमिदंरजितंचंद्रदैवतंयथानामगोत्राय ब्राह्मणायदक्षिणांदातुमुत्सृजेत् इति पितामहश्राद्ध
दक्षिणांदद्यात् पुनर्दक्षिणाद्रव्यादिकमादाय ओं अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरण
निमित्तकश्राद्धे कृतैतदमुकगोत्रप्रपितामहामुकशर्म्मश्राद्धप्रतिष्ठार्थमिदंरजितंचंद्रदैवतंयथानाम
गोत्राय ब्राह्मणायदक्षिणांदातुमहमुत्सृजे इति प्रपितामहश्राद्धदक्षिणांदद्यात् पुनर्दक्षिणाद्रव्यादिक
मादाय ओं अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकश्राद्धे कृतैतदमुकगोत्रवृद्धप्रपि
तामहामुकश्राद्धप्रतिष्ठार्थमिदंरजितंचंद्रदैवतंयथानामगोत्राय ब्राह्मणाय दक्षिणांदातुमहमुत्सृजेत् इति
वृद्धप्रपितामहश्राद्धदक्षिणांदद्यात् ततः सव्यंकृत्वा ओं विश्वेदेवाः प्रीयंतामिति देवविसर्जनं कृत्वा अपसव्यं
कृत्वा पितृश्राद्धब्राह्मणं ओं निरेकारं स्वस्ति ब्रूहीति च दत्ते स्वस्तीति तेनोक्ते स्वस्त्यस्तु इति पितृब्राह्मणं विस
र्ज्य गृहीतपितृब्राह्मणं पृष्ठे गृहीतोदकपात्रो बाहिर्निमंत्रणस्थानमागत्य ब्राह्मणं यस्थापयित्वा ओं आमा
वाजस्य प्रसवो जगम्या देमे द्यावापृथिवी विश्वरूपे आमागन्तां पितरा मातरा चामा सोमो ऽमृतत्वेन ग
म्यादिति प्रदक्षिणीकुर्वन् उदकधारया विवेष्टयेत् ततः प्रणम्याद्यो मादनमुपसृज्य प्रदक्षिणीकृत्याभि
वादयेत् ततः सव्यं कृत्वा ओं देवताभ्य इति त्रिर्जपेत् ततो गृहं प्रविश्य सव्याभ्यां देवपितृश्राद्धदीयान् पा
णिभ्यां निर्वापयेत् ततः सव्येन पाणिपादप्रक्षालनमाचमनं च कुर्यात् ततः ओं प्रमादादित्यादि पठित्वा
गतम्फलकामो वैक्षुमस्तरे अपरश्राद्धचतुष्टयद्रव्यप्रतिपत्तिं ब्राह्मणाय कुर्यात् पिंडान् जले प्रपित्वा ११०

Kirtikant Sharma Collection, Najafgarh

श्रा॰ दद्यात् उच्छिष्टमार्ज्जनं कुर्यात् वैश्वदेवबल्यनंतरंदश॰ अर्वाक्तिथ्योनियान् यथाशक्तिभोजयेत् ज्ञातिभिः
वि॰ मिलित्वा सहभोजयेत् इतिश्राद्धविवेकः सपिंडनपद्धतिः सपिंडीकरणकालव्यवस्थायामपि वत्सरान्ते
१११ स्यैवैतानि षोडशश्राद्धानि केनचिद्विस्मरणादिना न कृतानि तेन कस्मैकादश्यां तत्कृतादेवाषोडशश्रा
द्धानि कर्तव्यादीनि मिताक्षराश्राद्धपल्लवयोर्लिखितं यत्तं चैतत् एकोद्दिष्टरूपश्राद्धस्य कस्मै का
दश्यांविधानात् एषांचैकोद्दिष्टरूपत्वात् अथचाधिकारिणी कृतषोडशश्राद्धसंकल्पे सपिंडनस्यक
त्वा विपन्ने कान्निष्ठेनावशिष्टश्राद्धानि कार्याणीति श्राद्धप्रदीपः एषु सर्वेषु प्रेतश्राद्धादिषु शेषान्न
भोजनंकर्त्तव्यं यदाह देवलः एकोद्दिष्टस्य शेषं तु ब्राह्मणाय समुत्सृजेत् ततः परं तु भुंजीत स्वयंमंगल
जनं अस्यार्थः प्रेतश्राद्धे श्राद्धार्थं यत्किंचित्साधितमोदनादि तत्सर्वं ब्राह्मणायैव प्रतिपादयेत् नोद्धार
यव स्वयंमंगलभोजनं कुर्यात् पृथक्पाकसाधितान्नभोजनं कुर्यात् पृथक्पाकस्य मंगलस्वरू
पत्वात् सपिंडने पितामहादिश्राद्धे शेषान्नस्यैकपाकसाधितत्वात् प्रेतश्राद्धे शेषान्नत्वादेवन्यायः स
पिंडनादेन स्वयं हृद्यं पावनं श्राद्धदत्तशेषान्नापि भोजनं न कर्तव्यं तथा च श्राद्धान्नभोजननिषेधे शातातपः
नवश्राद्धं ग्रामयाजकान्नं संन्यासभोजनं नारीणां प्रथमे गर्भे भुक्त्वा चांद्रायणं चरेत् चांद्रायणं नवश्राद्धे परा
कोमासिके ततः मासत्रये तु कृच्छ्रं स्यात् षाण्मासिके कृच्छ्र एव हि आब्दिके पादकृच्छ्रः स्यादेकाहः पुनरा
ब्दिके अनेन ऊर्द्ध्वं न दोषः स्यात् शंखस्य वचनं यथा अथ नवश्राद्धमेकादशाहे श्राद्धं ग्रामं याजका १११

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वेप्रसिद्धमेवसंग्रहभोजनंसूर्ययोरुपरागकालेभोजनम् नारीणांप्रथमगर्भसंस्कारभोजनं आब्दिके प्रथमसांवत्सरिके पुनराब्दिके द्वितीयसांवत्सरिके तदुपकरणवस्त्रादिग्रहणंवर्षद्वयेपिकुर्वतीतिसमाचारः स्त्रीशूद्रकर्तृकेऽस्मिन् श्राद्धे स्वधास्थानेनमः पदप्रयोगः कर्तव्यः सपिंडने जीवति पत्यौ श्वशुरादिभिः सापिंडनंकार्यम् मृतेपत्यौ पतिश्वशुरादिभिः सहमेलनंकार्यम् पतिपुत्ररहितायाः सपिंडनमेवनिषिद्धम् तथाचमार्कंडेयपुराणे सपिंडीकरणंतासांपुत्राभावेनविद्यते अत्रपुत्राभाव इत्युपलक्षणं पतिपुत्राभावे इति द्रष्टव्यम् पतिकर्तृकस्यस्त्रीसापिंडनस्यविधानात् एवंसपत्नीपुत्रेवन्ध्याः पुत्रिणीत्वादिशेनैः नंभवति बह्वीनामेकपत्नीनांमध्येकाचित्पुत्रिणीभवेत् सर्वास्तेनैवपुत्रेण पुत्रिणीर्मनुरब्रवीत् इतिसपत्नीपुत्रेवन्ध्याः पुत्रिणीत्वादिशेनापुत्रत्वाभावात् एवं त्रैवर्णिकजातस्यशूद्रस्यसपिंडनं निषिद्धंनीयते नुसपिंडत्वंयेषां शूद्रकुलोद्भवः सर्वेशूद्रत्वमायांति यदिस्वर्गजितोपिते इति शंखलिखितवाक्यात् पत्रचसपिंडनंनिषिद्धम् तत्र ब्रह्मपुराणोक्तं षोडशश्राद्धेप्रेतत्वविमुक्तिः तथाचब्रह्मपुराणंतृणंतुत्यक्तदेहानां श्राद्धेषोडशसंख्यायाचतुर्थे पंचमेचैवनवमैकादशेतथा ततोद्वादशभिर्मासैः श्राद्धंद्वादशसंख्ययाः कर्तव्यंशुचिस्तेषांततोविप्रांश्चभोजयेदिति अत्रचमृतकार्येषु मरणदिनावधिकादिनमासादिगणनाच्चतुर्थदिनादित्वंमरणदिनावधिकमेवज्ञेयं तथाचाशौचाभ्यंतरेपिचतुर्थदिनादिषुश्राद्धं कर्तव्यं अत्रचवर्षेयावत्सापिंडनकाले अनिषिद्धनक्षत्रसंभवेनिषिद्धनक्षत्रे सपिंडननिषेधात् तत्रापिब्रह्म ११२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुराणेयषोडशश्राद्धानिकर्त्तव्यानीतिबहुषुनिबंधेषुलिखितम् लोकास्तुनिषिद्धनक्षत्रेपिंडनकरणेपित्रा
दिगतकुश्लेषाभावात्तस्मात्रगतानीष्टसंभावान्नक्षत्रानुरोधंनाचरंति अथावीरायाःसपिंडकर्त्तृकषो
डशश्राद्धविधिर्लिख्यतेसपिंडेवाशौचाभ्यंतरे एवचतुर्थदिनेश्राद्धंकर्त्तव्यं तत्रप्रथमतोस्थिसंचयनि
मित्तकर्मकोद्दिष्टंकृत्वा।अस्थिसंचयेकृतेपुनःस्नात्वाश्राद्धंकर्त्तव्यं तत्रमध्यान्हेशुचिराचांतोयजमान
स्सवर्णेनाहूतंब्राह्मणंस्नातमाचांतंगोमयोपलिप्तायां मंडपाद्बहिर्भूमौगोमूत्रेणयसव्यवत् कृतमंड
लायाम् ॐभूम्यैनमइतित्रिरक्षकपुष्पपूजितायामास्तृतदक्षिणाग्रकुशत्रयोपरिनिष्ठन् स्वागतमिति
पृच्छेत् ॐसुस्वागतमितितेनोक्तेउभावप्युपविशतः ततः पुटकजलंकृत्वा ॐइदंतेपाद्यमित्युप
नीययात्रब्राह्मणपादयोर्दद्यात् ततोऽपसव्यंकृत्वा पुष्पचंदनतांबूलानिब्राह्मणायदत्वाब्राह्मण
दक्षिणजानुदक्षिणकरेणस्पृष्ट्वा ॐअद्यामुकगोत्रायाःसपिंडायाअमुकप्रेतायाश्चतुर्थदिनश्राद्ध
करणायभवंतंब्राह्मणमहमामंत्रये ॐआमंत्रितोस्मीति प्रतिवचनं ॐअक्रोधनेनेत्यादिना ॐसर्वा
यासंविनिर्मुक्तेनेत्यादिनाचनियमान्श्रावयेत् ॐभवितव्यमितितेनोक्तेजलतिलगंधपुष्पाणि
पुटकेकृत्वा ॐअद्यामुकगोत्रेसपिंडेमुकप्रेतेचतुर्थदिनश्राद्धएषपादार्घस्तेमयादीयतेनवोप
तिष्ठतामितिमोटकादीनापादार्घंदद्यात् तत आचमनीयजलंनमस्कृत्यजानुनिविन्यस्य ॐइदंते
आचमनीयमित्यादीमनीयमर्पयेत् ततसव्येनस्वयमाचम्यतमाचमय्याग्रेकृत्वा श्राद्धदेशमागत्यतत्रासन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उपविशेत् ओं सिद्धमिति वदेत् ततास्सने ऽत्रास्वेति ब्राह्मणं मंगुष्ठे गृहीत्वा सकुशे आसने उत्तराभिमुखमुपवे
शयेत् पादयोस्तले दक्षिणाग्रं कुशत्रयं दद्यात् आसनसमीपे तु तिलतैलेन रक्षादीपं स्थापयेत् त
तः ओं अपवित्र इत्यादि पठित्वा ओं पुंडरीकाक्षः पुनात्विति कुशत्रयजलेन सर्वाणि श्राद्धीयद्रव्याणि
सिंचयेत् ततः कुशत्रयतिलजलान्यादाय ओं अद्यामुकगोत्रायाः सपिंडीया अमुकप्रेतायाः प्रेतत्ववि
मुक्तिकामः आद्यादियथाकालं षोडश श्राद्धान्यहं करिष्ये इति संकल्पयेत् पुनः कुशत्रयतिलजलान्याद
य ओं अद्यामुकगोत्रायाः सपिंडीया अमुकप्रेतायाः प्रेतत्वविमुक्तिहेतु षोडशश्राद्धांतर्गतं चतुर्थदिनश्रा
द्धमहं करिष्ये इति वदेत् ओं कुरुष्वेति प्रतिवचनं ओं गायत्रीजपमहं करिष्ये इति ओं कुरुष्वेति प्र
तिवचनम् ततः सप्रणवव्याहृतिगायत्रीं त्रिर्जपित्वा ओं देवताभ्य इति त्रिर्जपेत् ततोऽपसव्यं कृ
त्वा मोटकादीन्यादाय ओं अद्यामुकगोत्रे सपिंडे अमुकप्रेते चतुर्थदिनश्राद्ध इदमासनं ते मया दी
यते तवोपतिष्ठतामित्यासनमुत्सृजेत् ततः ओं अपहता इत्यादिना श्राद्धदेशे वामावर्त्तेन तिलान् वि
किरेत् ततः आयंतु न इति मंत्रं जपेत् ततोऽर्घपात्रे पवित्रं कृत्वा ओं शन्नो देवी रिति जलं तिलोसी
ति स्वाहा तेन तिलान् क्षिप्त्वा तूष्णीं गंधपुष्पे प्रक्षिपेत् ततोऽर्घपात्रं वामहस्ते कृत्वा पवित्रं पात्र
ब्राह्मणकरे उत्तराग्रं धृत्वा तदुपरि उदकांतरं दत्वा ओं या दिव्या इति पठित्वा मोटकादीन्यादाय ओं अद्या
मुकगोत्रे सपिंडे अमुकप्रेते चतुर्थदिनश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठतामिति विप्रकरेऽर्घजलं दद्यादुत्सृजेत्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रा. दर्भपात्रपवित्रे सहितं ब्राह्मणवामपार्श्वे ओं सपिंडार्थे स्थानमसीति न्युब्जीकरणम् ततो मोदकादीन्यादाय
वि. ओं अद्यामुकगोत्रे सपिंडैऽमुकप्रेते चतुर्थे दिने श्राद्धे एतानि गंधपुष्पधूपदीपतांबूलसिंदूरवासांसि तेम
११५ या दीयंते तवोपतिष्ठतामिति गंधादीनुत्सृजेत् ततः पात्रस्य चतुर्थे दिशि चतुष्कोणं मंडलं कार्यात् ततश्श्राद्धी
यान्नव्यंजनाग्रभागं गृहीत्वा घृततिलजलसहितं तदन्नं ओं इदमन्नमेतद्भूस्वामिपितृभ्यो नम इति मोदका
दिना दद्यात् ततः कराभ्यां ताम्रपात्रमादाय तेनान्नं गृहीत्वा मनाक् स्थित्वापि डों ध्यात्वा भोजनपात्रे पुरु
षत्रिममन्नं परिविष्यात् पटकोत्तरे व्यंजनानि घृतं जलं चोपनीय अन्नोपरि पटकाहीना हस्ताभ्यां मधु
दद्यात् ओं मधुवाता ऋतायते इति ऋचं मधु मधु मध्विति च जपेत् ततो व्यस्तानतानपाणिभ्यामन्नपात्रमा
लभ्य ओं पृथिवीते पात्रमित्यादि जपित्वा ओं इदं विष्णुरिति पठित्वा अमृतरूपतया अन्नं विचिंत्य ओं कृष्णकव्यमिद
मिति पठित्वा ओं इदमन्नं ओं इदमापः ओं इदमाज्यं ओं इदं हविरिति पात्रं ब्राह्मणदक्षिणहस्तांगुष्ठमन्नज
लघृतान्नेषु निवेश्य ओं अपहता इत्यादिनान्नोपरि वह्निं तिलान्विकिर्य वामेन पाणिना पात्रमत्यजन् ओं
अद्यामुकगोत्रे सपिंडऽमुकप्रेते चतुर्थे दिने श्राद्धे इदमन्नं सोपकरणं ते मया दीयते तवोपतिष्ठतामि
त्यन्नमुत्सृजेत् ओं भवान्नाश्नयत्विति ब्राह्मणाय जलं गुडपंड दद्यात् ततो गायत्रीं मधुवाता इत्यादित्र्यृचं च
ओं मधु मधु मध्विति च जापित्वा ओं अन्नहीनमित्यादि पठित्वा ओं यथासुखं जुषस्वेति ब्राह्मणं ब्रू
यात् ब्राह्मणो वामेन पाणिना पात्रमत्यजन् ओंकारपूर्वं भुंजीत त्वराक्रोधादिकं वर्जयेत् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रा व्यंजनार्थं हस्तादिना संज्ञामपि न कुर्यात् श्राद्धकर्त्ता दर्भेष्वासीनो गायत्रीं मधुव्वातादिकं जपेत् ब्राह्मणान् गाय
वि. त्रीमनुश्रावयेत् ॐ कृणुष्व पाजइत्यादि रक्षोघ्नं मंत्रान् पठेत् भूमौ तिलान् विकीर्य्य ब्राह्मणं सपिंडारूपत
११६ याध्यायेत् ॐ उदीरतामित्यादि मंत्रान् ॐ सहस्रशीर्षा इत्यादि पुरुषसूक्तं ॐ आशुः शिशानो इत्या
दिकमप्रतिरथमन्यानि च शतरुद्रिय रुचि स्तव प्रभृतीनि पवित्राणि जपेत् ततः ॐ नमस्तुभ्यं विरूपा
क्षेत्यादि श्लोकमपि पठेत् वीणादिभिः ब्राह्मणं हर्षयेत् व्यंजनगुणानुत्कीर्त्तयन् मंदंमंदमुपनयन् ब्राह्मण
भोजयेत् ततः संतृप्तं ज्ञात्वा उच्छिष्टसन्निधावास्तृतीय दक्षिणाग्र कुशात्त्रयां भूमिं प्रोक्ष्य सर्वतिलघृत
व्यंजनयुतमन्नं जलेनाप्लाव्य ॐ अग्निदग्धा इति मंत्रेण कुशोपरि अन्नं विकिरेत् ततः सव्यं कृत्वा चस्यवि
ष्णुं स्मरेत् अपसव्यं कृत्वा इदं नेमन्यापोशानमिति जलगंडूषं ब्राह्मणाय दत्वा ॐ स्वदितमिति पृच्छेत् ॐ सुस्व
दितमिति तेनोक्ते ॐ पिंडमहं करिष्य इति पृच्छेत् ॐ कुरुष्वेत्यनुज्ञातो हस्तमात्रपरिमितां पिंडिकां मृत्तिका
मयीं निर्माय तन्मध्ये प्रादेशमितां रेखां वामेन पाणिना दर्भपिंजुलीमादाय हस्ताभ्यां गृहीत्वा तन्मूलेन
दक्षिणाग्ररेखां कुर्यात् दर्भपिंजुलीमुत्तरस्यां दिशि क्षिपेत् ये रूपाणीति मंत्रेणांगारभ्रामणं कृत्वांगारं द
क्षिणस्यां दिशि क्षिपेत् रेखां परि उपमूलसहलून्नान कुशान्दक्षिणाग्रानास्तीर्य्य सव्यं कृत्वा ॐ
देवताभ्य इति त्रिर्जपेत् अपसव्यं कृत्वा जलतिलगंधपुष्पाणि पुटके कृत्वा वामहस्तेन तमादा
य दक्षिणहस्ते मोटकादीन्यादाय ॐ अद्यामुकगोत्र सपिंडे ऽमुक एते चतुर्थदिनश्राद्धपिंडस्थाने ११६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

 ऽत्रावनेनिक्ष्वते मया दीयते तवोपतिष्ठतामिति कुशमध्ये ऽवनेजनं दद्यात् ततो मोदकादीनि पिंडं चादाय
 ॐ अद्यामुकगोत्रे सपिंडे ऽमुकप्रेते चतुर्थदिनश्राद्धे एष ते पिंडः स्ते मया दीयते तवोपतिष्ठतामिति कुश
 मध्ये पिंडं दद्यात् ततः आस्तृतकुशामूले करं प्रोञ्छ्य सव्यं कृत्वा चम्य हरिं स्मृत्वा ॐ अत्र सपिंडे मादा
यस्व यथाभागमावृषायस्वेति दक्षिणामुखः पठेत् तत उदङ्मुखीभूय श्वासं नियम्य मङ्गलमूर्तिं ध्यायन्
ॐ अमीमदंत सपिंडे यथाभागमावृषायिषतेति पठन् सुखमत्यावर्त्तयेत् मोदकादीन्यादाय वामहस्ते ऽवनेज
नपुटकं कृत्वा ॐ अद्यामुकगोत्रे सपिंडे मुकप्रेते चतुर्थदिनश्राद्धे ऽत्र प्रत्यवनेनिक्ष्वते मया दीयते तवोपतिष्ठ
तामिति पिंडोपरि प्रत्यवनेजनं दद्यात् ततो नीवीविस्रंस्य परिधाय सव्यं कृत्वाचामेत् अपसव्यं कृत्वा वा
मेन पाणिनोद्धृतं सूत्रं दक्षिणेनादाय ॐ एतत्ते सपिंडे वास इति पिंडोपरि हस्ताभ्यां दद्यात् मोदकादीन्या
य ॐ अद्यामुकगोत्रे सपिंडे ऽमुकप्रेते चतुर्थदिनश्राद्धे पिंडे एतद्वासस्ते मया दीयते तवोपतिष्ठतामिति
सृजेत् ततो गंधपुष्पधूपदीपतांबूलैः पिंडमर्चयेत् पिंडशेषान्नं पिंडसमीपे विकिरेत् ॐ शिवा
आपः सन्त्विति आचांत ब्राह्मणकरे जलदानं ॐ सन्त्विति प्रतिवचनम् ॐ सौमनस्यमस्त्विति
पुष्पम् ॐ अस्त्विति प्रतिवचनं ॐ अक्षतं चारिष्टमस्त्विति तंडुलदानं ॐ अस्त्विति प्रतिवचनम्
मोदकादीन्यादाय ॐ अद्यामुकगोत्रायाः सपिंडायाः अमुकप्रेतायाश्चतुर्थदिनश्राद्धे दत्तैतदन्न
पानादिकमुपतिष्ठतामित्यक्षय्योदकदानं ब्राह्मणकरे दद्यात् ॐ उपतिष्ठतामिति प्रतिवचनं ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नम ततःसव्यंकृत्वासुमनास्संमनादक्षिणांदिशंपश्यन् ॐ अघोराःसपिंडाःस्वितिपूर्वाग्रंजलधारांदद्यात् ॐ
अस्त्विति प्रतिवचनं पूर्वाभिमुखोभूत्वा ॐ गोत्रंवर्द्धतामित्याशिषंब्राह्मणंयाचेत् ॐ वर्द्धतामितितेनोक्ते ॐ दा
तारोनोभिवर्द्धतामित्यादिनाशीःप्रार्थनं ॐ संत्विति प्रतिवचनं अपसव्यं कृत्वा पिंडोपरिसपवित्र कुशानास्तीर्य
दक्षिणाग्राम् ॐ नमोवाचयिष्ये इति ब्राह्मणंब्रूयात् ॐ वाच्यतामित्युक्ते ॐ सपिंडायैनमः उच्यतामितिवदे
त् ॐ अस्तुनम इत्युक्तेपुटकादिस्थितंजलंहस्ताभ्यामादाय ॐ ऊर्जंवहंतीरितिमंत्रेणसपवित्र कुशोपरिद
क्षिणाग्रवारिधारांदद्यात् ततोनाम्नीभूपपिंडमाघ्रायोत्थापयेत् पिंडाधारकुशानुकंचवन्हौनिक्षिपेत् अर्घ्यपात्र
मुत्तानीकृत्यततोमोदकादिकं दक्षिणाद्रव्यंचादाय ॐ अद्यामुकगोत्रयःसपिंडाया अमुकप्रेतायाःकृतैतत्स
ज्यादिन श्राद्ध प्रतिष्ठार्थमिदंरजितममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणांतुभ्यमहंप्रददे इतिद
द्यात् ॐ निरोंकारंस्वस्तिब्रूहीतिब्राह्मणंवदेत् स्वस्तीतिब्राह्मणेनोक्ते स्वस्त्यस्तु इत्युक्त्वाब्राह्मणहस्तांगुष्ठंगृ
हीत्वोत्थापयेत् तंगृहीत्वाजलपात्रंचगृहीत्वानिमंत्रणस्थानेस्थापयेत् ॐ आमावाजस्यप्रसवोजगम्यादेवेद्या
वापृथिवी विश्वरूपे आमागंता पितरामातराचामासोमो अमृतत्वेनगम्यादितिमंत्रेणवारिधारया ब्राह्मणंत्रिर्वेष्टयेत् प्रणम्या
ष्टे पादाननुव्रज्यप्रदक्षिणीकृत्यनमस्कुर्यात् ततउपविश्यतत्रैवसव्यंदेवताभ्य इतित्रिर्जपयेत् ततःश्राद्धदेशमागत्य
पाणिभ्यांदीपनिर्वाप्यसव्यंकृत्वा हस्तौपादौप्रक्षाल्याचम्य ततःॐ प्रमादादित्यादिपठित्वा श्राद्धपूर्वकामोविष्णुंस्म
रेत्पिंडादिकंजलेक्षिपेत् उच्छिष्टापनयनंकुर्यात् दशप्रभृतिश्रोत्रियान् भोजयेत् बंधुभिर्मिलि ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न्वा स्वयं भुंजीत् अनेनैव प्रकारेण पंचमदिन श्राद्धं नवमदिन श्राद्धं एकादशाहे एकदिश विन श्राद्धं कुर्यात् चतुर्दिन विगोत्राय दि श्राद्धकर्त्ता तदा नस्याशान द्वितीयदिनत्वा तत्र शय्यादान कांचन पुरुष दानं दंपतिपूजनं वृषोत्सर्ग कपिला दानानि कुर्यात् सपिंडोयादि श्राद्धकर्त्ता तदात्तेनैकादशाहे ऽशौचात द्वितीय दिने शय्यादाने देयन्निपूजन वृषोत्सर्गादिकं च कर्तव्यं भवतीति अनेनैव प्रकारेण प्रथममासमारभ्य द्वादशमास पर्यंतं प्रति मासे शेषे सतीक्षयाहे प्रथममासिका द्वितीयमासिक तृतीयमासिक चतुर्थमासिक पंचमासिक षष्ठमासिक सप्तममासिकाष्टम मासिक नवमासिक दशममासिकैकादशमासिक द्वादशमासिकनि कर्तव्यानीति अधिकमास संभवे त्रयोदशमासिकानि कर्तव्यानि अस्मिन्ब्रह्मपुराणीय काल्ये मासिकानामय कर्ष्यकरणं न भवति प्रमाणभावादिति इति श्राद्धविवेके मध्यक्रिया परिच्छेदस्तृतीयः ३ अथापात्रकेको द्दिष्ट श्राद्धप्रयोगः तत्र पूर्वदिने कृत नियमः श्राद्धदिने प्रातर्वस्त्रयुग्मे न कृतस्नातः पंचगव्योपलेपन ज्वलदंगारभ्रामणगोरष्टतिकाछादनै श्राद्धभूमि संस्कारं कृत्वा वस्त्रादि गावेष्टयित्वातिलगौरसर्षपैरवकीर्य्ये पित्रासनस्थाद्वामभागे श्राद्धदेयवस्तूनि साधयकृत स्नानादि मध्याह्ने शुचिः शुक्लाद्विवासाः पादौ प्रक्षाल्याचम्यः श्राद्धदेशमागच्छेत् तत्र स्वयं पाकं कुर्यात् सपिंडस्त्री काद्वारा वा पाचयेत् ततः पाकोद्धृतृ रक्षादीपं निधायपुनराचम्य प्राङ्मुख उपविशेत् अन्यकृते पाके सिद्धमिति पृष्ट्वा ओं अपवित्रः पवित्रो वेत्यादि ओं पुंडरीकाक्षः पुनातु त्विति पठित्वा कुशात्रय जलैः श्राद्धवस्तून्यभिषिंचेत् ततः कुशात्रयानि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लान्कोन्यादाय ॐ अद्यामुकमासि अमुकपक्षे अमुकतिथौ अमुकगोत्रस्य पितुरमुकशर्मणः सांवत्सरिकैकोद्दिष्टश्राद्धमहं करिष्ये इति संकल्पं कुर्यात् ततो गायत्रीं त्रिर्जपेत् ॐ देवताभ्य इत्यादि त्रिर्जपेत् ततोपसव्यं कृत्वा दक्षिणाभिमुखः पातितवामजानुः मोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धे इदमासनं ते स्वधेति पूर्वोपकल्पितमोटकरूपमासनं तिलजलप्रोक्षितं दक्षिणाग्रं पितृतीर्थेनोत्सृजेत् ॐ अपहता इत्यादिना भोजनपात्रे तिलान् विकीर्य ॐ आयन्तु न इत्यादि पठित्वा ततोर्घकरणं पुटकादौ दक्षिणाग्रं पवित्रं धृत्वा ॐ शन्नो देवीरिति मन्त्रेण जलं प्रक्षिप्य ॐ तिलोसीति तिलान् प्रक्षिप्य गंधपुष्पे तूष्णीं क्षिपेत् ततोर्घपात्रं वामहस्ते कृत्वा भोजनपात्रे पवित्रमुत्तराग्रं धृत्वा तदुपरि उदकान्तरं दत्वा ॐ या दिव्या इति पठित्वा ॐ अद्यामुकगोत्रपितरमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धे एष हस्तार्घः स्वधेति पवित्रोपरि यथा पतति तथैवोत्सृजेत् पवित्रयुतं तदर्घपात्रमवशिष्टजलयुतमेवासनवामभागे ॐ पितृभ्यः स्थानमसीति न्युब्जी कुर्यात् दक्षिणादानपर्यंतं नोद्धरेत् न चालयेत् ततो गंधादि दद्यात् ततो मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धे एतानि गंधपुष्पधूपदीपताम्बूलयज्ञोपवीतवासांसि ते स्वधेति गंधादीन् दद्यात् ततो जलेन भोजनपात्रासनयोश्चतुरस्रं मण्डलं कृत्वा सव्यंजनघृततिलजलमन्नं किंचिदग्रभागमुद्धृत्य मोटकादिना ॐ इदमन्नमेतद्भूस्वामिपितृभ्यो नमः इति भूस्वामिने अन्नं दद्यात् ततः सिद्धमुष्णमन्नं रजितादिपात्रस्थं कराभ्यामादाय पितरं ध्यायन् प

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रा. वि. १२१ दंसंदंपरिवेषणं कुर्यात् ततः पुरुषाहारक्षममन्नं परिदिया यथासंभवव्यञ्जनमन्नं जलं घृतं चपात्रांतर
स्थं तत्रोपनीय अन्नं मधुनाभिघार्य ॐ मधुवातेत्यादि ऋचं मधु मधु मध्विति कापित्वा पात्रमालभेत्
ततः सव्येन हस्तेन पात्रं पश्चिमभागे स्पृशन् तदुपरिगतदक्षिणहस्तेनाधोमुखेन पूर्वभागे पात्रं स्पृशं
न् ॐ पृथिवी पात्रमित्यादि ॐ इदं विष्णुरित्यादि ॐ क्षक्ष कव्यमिदं रक्षमदीयमिति पठित्वा वा
मेन पाणिना पात्रं स्पृष्टोन्नेव दक्षिणं पाणिमुद्धृत्य ॐ इदमन्नं ॐ इमा आपः ॐ इदमाज्यं ॐ इदं हविरिति
अन्नेजले घृते पुनरन्ने चांगुष्ठं निक्षिप्य ॐ अपहतेत्यादिना अन्नोपरि तिलान् कीर्य्य मोटकतिलजलान्यादा
य ॐ अद्यामुकगोत्रा पितरमुकशर्मन्नसांवत्सरिके श्राद्धे एतदन्नं सोपकरणं स्वधेत्युत्सृजेत्
ततो वामहस्तमभ्युत्कृत्य ॐ अन्नहनिमित्यादि पठित्वा ॐ गायत्रीं त्रिर्जपेत् कृशोपस्थिस्य ॐ मधुवातेत्या
दि जपेत् ततो ब्राह्मण स्वधाज इत्याधारक्षोघ्नी ऋचो जपित्वा भूमौ तिलान् विकीर्य पितरध्यात्वा उदीरतामवर इत्या
दि पितृमंत्रान् सहस्रशीर्षा इत्यादि पुरुषसूक्त ॐ आशुः शिशान इत्यादिकमप्रतिरथं च जपेत् यथाशक्त्यनान्य
पि पित्र्याणि जपेत् रुचिस्तवादीनि च जपेत् ॐ नमोस्तु भ्यां विरूपाक्षनमस्तेनेकचक्षुषे नमः पिनाकहस्ताय
वज्रहस्ताय वै नमः इति पठित्वा उच्छिष्टसमीपे दक्षिणाग्रं कुशत्रयमास्तीर्य्य जलेन सिक्त्वा किंचिदन्नं सघृत
तिलं जलसिक्तमादाय ॐ अग्निदग्धा इत्यादिमंत्रस्य फलमुद्दिश्य कुशोपरि अन्नं विकिरेत्
ततः सव्यं कृत्वाऽऽचम्य हरिं स्मृत्वा गायत्रीं मधुवाता इत्यादिकं मधुमध्विति जपेत् ततोऽपसव्यं कृत्वा । १२३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हस्तमात्र चतुरंगुलोच्छ्रित दक्षिणाग्रव पिंडकायां प्रादेशमात्रं परिमाया दर्भपिंजुल्या दक्षिणांगुष्ठतर्जनीधृ
तमूलया वामहस्तांगुष्ठतर्जनीधृतोपरिभागया ॐ अपहताः सुरा रक्षांसि वेदिषद इति प्रादेशमात्रमुल्लि
ख्य दर्भपिंजुलीमुत्तरस्यां दिशि त्यजेत् ॐ ये रूपाणीत्यादिनांगारं भ्रामयित्वा अंगारं दक्षिणस्यां क्षिपेत् त
तः स्तत्र छिन्नमूलकुशात्रयमास्तीर्य सव्यं कृत्वा देवताभ्य इति त्रिर्जपेत् अपसव्यं कृत्वा तिलजलगंधपु
ष्पाणि पुटके कृत्वा पुटकं वामहस्ते धृत्वा मोदकतिलजलान्यादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन्
सांवत्सरिकैकोद्दिष्टश्राद्धपिंडस्थाने ऽत्रावनेनिक्ष्व ते स्वधेति छिन्नमूलकुशोपरि अवनेजनं दद्यात् किंचि
ज्जलं पुटके ऽवशेषयेत् ततः तिलजलव्यंजनघृतमिश्रैः पिंडं बिल्वोपमं निर्माय मधुघृताभ्यासाधिधार्य्य
मोदकतिलजलसहितमादाय सव्योपगृहीतादक्षिणहस्तेन ॐ अद्यामुकगोत्रपितरमुकशर्मन् सांवत्स
रिकैकोद्दिष्टश्राद्ध एष ते पिंडः स्वधेति छिन्नमूलकुशोपरि पिंडं दद्यात् ततः कुशमूले तूष्णीं करंप्रो
ष्य। सव्यं कृत्वा द्विराचमेत् हरिं स्मृत्वा अपसव्यं कृत्वा दक्षिणामुखः ॐ अत्र पितरमादयस्व य
थाभागमावृषायस्वेति पठित्वा उत्तराभिमुखो भूयश्वासं नियम्य पितरं ध्यायन् पुनर्दक्षिणाभिमु
खो भवन् ॐ अमीमदन्त पितर्यथाभागमावृषायिषतेति पठेत् ततः पूर्वदत्तावशिष्टजलयुतं प्रत्यव
नेजनपात्रमादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धपिंडे ऽत्र प्र
त्यवनेनिक्ष्व ते स्वधेति पिंडोपरि प्रत्यवनेजनं दद्यात् ततो नीवीं विसृस्य सव्येनाचम्यापसव्यं कृत्वा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वामेन पाणिना सूत्रमादाय दक्षिणकरे धृत्वा ॐ नमस्ते पितारसायनमस्ते पितः शोषायनमस्ते पितर्जीवा
यनमस्ते पितास्वधायै नमस्ते पितर्घोराय नमस्ते पितर्मन्यवे नमस्ते पितः पितरो नमस्ते गृहान्नः पितरं हिस
नस्ते पितरेष्म इति पठित्वा ॐ एतत्ते पितरस्वासस इति पिंडे परिसूत्रं दद्यात् ततो मोदकतिलजलान्यादाय ।
ॐ अद्यामुकगोत्रपितरमुकशर्मन् सांवत्सरिकैकोदिष्टश्राद्धे पिंडे एतत्ते वासः स्वधेति सूत्रमुत्सृजेत् तत
पितरमुद्दिश्य पिंडेभ्यो गंधपुष्पधूपदीपतांबूलानि दद्यात् ततः शिवा आपः सन्त्विति जलम् ॐ सौमनस्य
मस्त्विति पुष्पं ॐ अक्षतं चारिष्टमस्त्विति तंदुलान् भोजनपात्रे निक्षिपेत् तत अमोदकतिलजलान्यादाय ॐ
अद्यामुकगोत्रस्य पितुरमुकशर्मणः सांवत्सरिकैकोदिष्टश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमुपतिष्ठतामि
त्यक्षय्योदकं दद्यात् सव्यं कृत्वा दक्षिणमुखः ॐ अघोराः पितरः सन्त्विति पिंडोपरि पूर्वाग्रां जलधारां दद्यात्
ततः पूर्वाभिमुखः कृतांजलिः सुमनाः ॐ गोत्रं नो वर्द्धतां दातारो नोभिवर्द्धन्तां वेदाः संततिरेव च । श्रद्धा च
नो मा व्यगमद् बहुदेयं च नोस्त्विति अन्नं च नो बहु भवेदतिथींश्च लभेमहि याचितारश्च नः सन्तु मा च
याचिष्म कंचन एताः सत्या आशिषः सन्तु इत्याशीः प्रार्थनं कृत्वा अपसव्यं कृत्वा सपवित्रकुशत्रयं
दक्षिणाग्रं पिंडोपरि धृत्वा ॐ ऊर्जं वहन्तीरमृतमिति मंत्रेण कुशोपरि दक्षिणां जलधारां दद्यात् ततो न
म्रो भूत्वा पिंडमवघ्राय उत्थापयेत् पिंडाधारकुशानुल्मुकं च वह्नौ क्षिपेत् अर्घपात्रमुत्तानं कृत्य दक्षिणां
दद्यात् तद्यथा मोदकादीन्यादाय रजतं च ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मणः कृतै ॥ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्सांवत्सरिकैकोद्दिष्टश्राद्धप्रतिष्ठार्थमिदं रजितं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमह
मुत्सृजे तत् यद्युपस्थितं रजितं न भवति तदा रक्तिकामिदं रजितं चन्द्रदैवतमित्येवमादिवाक्यं कर्तव्यं इदं पदं
ततदानव्यमिति विशेषः ततः ॐ अभिरम्यतामिति विसर्जनम् ततः सव्यं कृत्वा देवताभ्यः पितृभ्यश्च म
हायोगिभ्य एव च नमः स्वाहायै स्वधायै नित्यमेव नमो नमः इति त्रिः पठेत् ततोऽपसव्यं कृत्वा पाणिभ्यां
दीपं निर्वापयेत् ततो हस्तौ पादौ प्रक्षाल्य सव्यं कृत्वाचम्य ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्
स्मरणाद्देवतद्विष्णोः संपूर्णं स्यादिति श्रुतिरिति पठित्वा श्राद्धं संपूर्णं कामो विष्णुं स्मरेत् श्राद्धीयवस्तु निब्राह्म
णाय प्रतिपादयेत् अभसि वा क्षिपेत् ततः शेषान्नादिभिः सह भुञ्जीत एवमेव पितृव्यभ्रात्रादिश्राद्धप्रयोग
शस्त्रादिहतनिमित्तकमाश्विनकृष्णचतुर्दश्यामप्येकोद्दिष्टमेव कर्तव्यं तत्सांवत्सरिकपदं परं तदान
व्यमिति अथ मातृश्राद्धप्रयोगः अमुकश्राद्धकर्ता वरः स्नातो मध्याह्ने सुसमावृत्तं पंचगव्योपलेपितं जलदं
गारशोधितं गोरस्मृतिकाच्छादितं यथा प्रादेशासादित श्राद्धीयद्रव्यं तं देशमागत्य पादौ प्रक्षा
ल्याचम्य सपिंडान् ब्राह्मणानानयेत् स्वयं वा यजेत् ततः पादौ प्रक्षाल्याचम्य शुद्धासने उपवि
श्य दीपं प्रज्वालयित्वाचम्य प्राङ्मुखः परकर्तृके पाकोऽसिद्धमिति याचिकां दद्यात् ॐ अपवित्रः पवित्रो
वा सर्वावस्थां गतोऽपि वा यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॐ पुण्डरीकाक्षः पुनात्विति कुशाग्र
यजलैः श्राद्धीयद्रव्याणि सिंचयेत् ततः कुशत्रयतिलजलान्यादाय ॐ अद्यामुकमासीयामुकप

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्षीयामुकतिथावमुकगोत्रायामुकदेव्या सांवत्सरिकैकोद्दिष्टश्राद्धमहं करिष्ये इति संकल्पं कुर्य्यात
तो गायत्रीं त्रिर्जपित्वा ॐ अद्यामुकगोत्रे मातरमुकदेवि सांवत्सरिकैकोद्दिष्टश्राद्धे इदमासनं ते स्वधेति
मोटकरूपमासनं ते स्वधेति मोटकरूपमासनं दक्षिणे सतिलमुत्सृजेत् ततः ॐ अपहता असुरा रक्षा
ꣳसि वेदिषद इत्यन्नपात्रे वामावर्त्तेन तिलान्विकीर्य्य ॐ आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथि
भिर्देवयानैः अस्मिन्यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मानिति पठित्वा अर्घपात्रे पवित्रं धृत्वा
दक्षिणाग्रम् ॐ शन्नोदेवीरिति पठित्वा आपो भवन्तु पीतये शन्नो रभिस्रवन्तु न इति अर्घपात्रे जलं क्षिपेत्
ॐ तिलोसि सोमदेवत्यो गोसवो देवनिर्मितः प्रत्नमद्भिः पृक्तः स्वधया पितॄंल्लोकान्प्रीणाहि नः स्वाहेति
तिलान्क्षिप्त्वा गंधपुष्पे तूष्णीं क्षिपेत् ततोऽर्घपात्रं वामहस्ते कृत्वा पवित्रं भोजनपात्रोपरि उत्तराग्रं धृत्वा
तदुपरि किंचिदुदकांतरं दत्वा ॐ या दिव्या आपः पयसा संबभूवुर्या अन्तरिक्षा उत पार्थिवीर्या हिरण्यव
र्णा यज्ञियास्तान आपः शिवाः शꣳ स्योनाः सुहवा भवन्तु इति पठित्वा मोटकतिलजलान्यादाय ॐ अद्यामुक
गोत्रे मातरमुकदेवि सांवत्सरिकैकोद्दिष्टश्राद्धे एष ते हस्तार्घः स्वधेति अर्घं दददुत्सृजेत् ततोऽर्घशिष्टजलस
हितं पवित्रं सहितं वार्घपात्रमासनवामभागे ॐ मात्रे स्थानमसीति न्युब्जीकुर्यात् तच्च दक्षिणादानप
र्य्यन्तं न चालयेत् ततो गंधादिदानं ॐ अद्यामुकगोत्रे मातरमुकदेवि सांवत्सरिकैकोद्दिष्टश्राद्धे एतानि
गंधपुष्पधूपदीपतांबूलसिंदूरवासांसि ते स्वधेति दद्यात् ततो जलेनासनसहितभोजनपात्रस्य चतुर्दिक्षु चतु १२५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कोणंमंडलंकृत्वासर्वव्यंजनमाहृत्यान्नामामार्गेतिलजलसहितंपुटकोदोकृत्वाॐइदमन्नमस्मत्कुला
मिपितृभ्योनम इतिमोदकादिनाभूस्वामिनेऽन्नमुत्सृजेत् ततः कराभ्यांताम्रपात्रस्थमन्नंमातरेभ्या
यनुभोजनपात्रेपुरुषाहारक्षमंपरिविष्य भव्यंजनंघृतंपानीचपात्रांतरेणोपनीयमधुनान्नमभिघारयेत्
ततःॐमधुवाताऋतायतेमधुक्षरन्तिसिंधवःमाध्वीर्नःसन्त्वोषधीःॐमधुनक्तमुतोषसोमधुमत्पा
र्थिवंरजःमधुद्यौरस्तुनःपितामधुमान्नोवनस्पतिर्मधुमा॥२॥ऽस्तुसूर्य्यःमाध्वीर्गावोभवन्तुनः
ॐमधुमधुमध्वितिचजपेत् ततःपाणिभ्यांसुजीभ्यावस्त्राभ्यांपात्रंस्पृशन् ॐपृथिवीतेपात्रंद्यौर
पिधानंब्राह्मणस्यमुखेऽमृतेऽमृतंजुहोमिस्वाहाॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्समू
ढमस्यपांसुरेॐहव्यकव्यमिदंरक्षमदीयमिनिपठेत् ततोदक्षिणहस्तमुत्तान्यतदंगुष्ठंॐइदम
मित्यन्नेॐइमाआपइतिजलेॐइदमाज्यमितिघृतेॐइदंहविरितिपुनरन्नेनिवेशयेत् ॐअपहताऽसुरा
रक्षांसिवेदिषदइत्यनेनतिलान् क्षिपेत् ततोमोदकादीन्यादाय ॐअद्यामुकगोत्रेमातरमुकरे
विसांवत्सरिकैकोद्दिष्टश्राद्धइदमन्नंसोपकरणंतेस्वधाइत्यन्नमुत्सृजेत् ततःपात्रंत्यजेत् ॐ
अन्नहीनंक्रियाहीनंविधिहीनंचयद्भवेत्तत्सर्वमच्छिद्रमस्त्वितिपठित्वागायत्रींत्रिर्जपित्वाकु
शासूपविश्य ॐमधुवातेतिजपेत् ततःहव्यव्यपाजइत्याद्याररक्षोघ्नीर्ऋचोजपेत् तिलान्भूमौविकि
र्य्यमातरंध्यात्वाॐउदीरतामवरइत्यादिपित्र्यमन्त्रान्सहस्रशीर्षेत्यादिपुरुषसूक्तम् ॐआशु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शियान इत्यादिकमप्रतिरथं अन्यानि च मंत्राणि जपेत् ततउच्छिष्ट समीपे कुशान्त्रय मास्तीर्य जलेन प्रोक्ष्य सव्यं
त्रमन्नं सघृतं सतिलं जलप्रोक्षितमादाय ॐ अनग्निदग्धा ये जीवा ये प्रदग्धाः कुले मम भूमौ दत्तेन तृप्यन्तु तृ
प्ता यांतु परां गतिमिति कुशोपरि अन्नमुत्सृजेत् ततः सव्यं कृत्वाचम्य हरिं स्मृत्वा गायत्रीं मधुवातेति च
जपेत् अपसव्यं कृत्वा वेदिकां कृत्वा पिंडस्थाने प्रादेशमात्रं ॐ अपहता असुरा रक्षांसि वेदिषद इति मंत्रेण
दर्भपिंजुल्या उल्लिखेत् दर्भपिंजुलीमैशान्यां क्षिपेत् ततः ॐ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वध
या चरन्ति परापुरो निपुरो ये भरन्त्यग्निष्टाल्लोकात्प्रणुदात्यस्मादिति मंत्रेण रेखायामंगारं भ्रामयि
त्वा दक्षिणस्यां त्यजेत् ततस्तत्र छिन्नमूलकुशानास्तीर्य्य सव्यं कृत्वा देवताभ्य इति त्रिर्जपेत् ततोऽ
पसव्यं कृत्वा पुटके जल तिल पुष्प गंधान् कृत्वा मोटक तिलजलान्यादाय ॐ अद्यामुक गोत्रे मा
तरमुकदेवि सांवत्सरिकैकोद्दिष्ट श्राद्धे पिंडस्थाने ऽत्रावनेनिक्ष्व ते स्वधेति छिन्नमूल कुशोपरि अ
वनेजनं दद्यात् ततस्तिल घृत सहितान्नेन पिंडं कृत्वा मधुघृताभ्यामपि धार्य्य मोटक। तिलज
लपिंडानादाय ॐ अद्यामुक गोत्रे मातरमुकदेवि सांवत्सरिकैकोद्दिष्ट श्राद्धे एष ते पिंडः स्व
धेति पिंडं सव्योपगृहीत दक्षिण हस्तेन कुशोपरि दद्यात् ततः कुशमूले करं प्रोञ्छ्य सव्यं कृत्वा
हरिं आचम्य अपसव्यं कृत्वा दक्षिणमुख ॐ अत्र मातर्मादयस्व यथाभागमावृषायस्वे
ति पठेत् उदङ्मुखीभूय स्वासं धारयन् परावर्त्तमानः ॐ अमीमदन्त माता यथाभागमावृषा। १२७

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पिष्टूतिपठेत् ततो वनेजनावशिष्टजवसहितं पुटकमादाय मोटकतिलजलान्यादाय ओं अद्यामुकगोत्रे
पितरमुकदेवि सांवत्सरिकैकोदिष्टश्राद्धपिंडे अन्यवनेनिक्ष्वते स्वधे इति अन्यवनेजनं दद्यात् ततो नीवी
स्रंसयसव्यं कृत्वाचम्य अपसव्यं कृत्वा वामेन पाणिना घृतं सूत्रं दक्षिणेन चादाय ओं नमस्ते मातारसाय न
मस्ते मातः शोषाय नमस्ते मातर्जीवाय नमस्ते मातः स्वधायै नमस्ते मातर्घोराय नमस्ते मातर्मन्यवे नमस्ते
मातर्मातर्नमस्ते गृहान्नः मातर्देहि सतस्ते मातर्देष्म इति पठित्वा स्वधायै नमस्ते मातर्घोराय अन्यास्ते
मातर्मन्यवे नमस्ते मातर्मातर्नमस्ते गृहान्नः मातर्देहि सतस्ते मातर्देष्म इति पठित्वा दिष्टश्राद्धपिंडे एतत्ते वा
सः स्वधेति सूत्रमुत्सृजेत् ततः पिंडे गंधपुष्पधूपदीपतांबूलानि तूष्णीं दत्वा ओं शिवा आपः सन्त्विति जलं ओं
सौमनस्यमस्त्विति पुष्पम् ओं अक्षतं चारिष्टमस्त्विति तंडुलान् भोजनपात्रे निक्षिपेत् ततो मोटकतिलजला
न्यादाय ओं अद्यामुकगोत्राया मातुरमुकदेव्याः सांवत्सरिकैकोद्दिष्टश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमुप
तिष्ठतामित्यक्षयोदकमुत्सृजेत् ततः सव्यं कृत्वा दक्षिणामुखः ओं अघोरा मातास्तु इति पिंडोपरि दू
र्वाग्रां जलधारां दद्यात् ततः पूर्वाभिमुखः कृतांजलिः ओं अघोरा मातास्तु इति पिंडोपरि ओं गोत्रं नो
वर्द्धतां दातारो नोभिवर्द्धंताम् वेदाः संततिरेव च श्रद्धा नो माव्यगमत् बहु देयं च नोस्त्विति अन्नं च नो
बहु भवेदतिथींश्च लभेमहि याचितारश्च नः संतु मा च याचिष्म कंचन एताः सत्या आशिषः संत्विति
शीर्षार्थनं कुर्यात् ततोऽपसव्यं कृत्वा सपवित्रकुशत्रयं पिंडोपरि आस्तीर्य्य ओं ऊर्ज्जं वहंतिर १२८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मृतंपयः कीलालंपरिस्रुतस्वधास्थतर्प्पयत् मेमातरमितिकुशोपरि दक्षिणाग्रां जलधारांदद्यात् ततो
नम्रीभूयपिंडमाघ्रायोत्थापयेपिंडाधारकुशगुल्मकंवन्हौ निक्षिप्यर्घपात्रमुत्तानीकृत्यदक्षिणांदद्या
त्ततोमोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रायामातुरमुकदेव्याः सांवत्सरिकैकोद्दिष्टश्राद्धप्रति
ष्ठार्थंरक्तिकापरिमितंरजितंचंद्रदैवतंयथानामगोत्रायब्राह्मणायदक्षिणांदातुमहमुत्सृजेतद्द्रव्यावैभ
वंदद्यात् ॐ अभिरम्यतामितिविसर्जनम् ततः सव्यंकृत्वा ॐ देवताभ्यइतिनिर्जपेत् ततोपसव्यंकृत्वाह
स्ताभ्यांदीपंनिर्वाप्यः हस्तौपादौप्रक्षाल्यसव्येनाचम्य प्रमादात्कुर्वतांकर्म प्रच्यवेताध्वरेषुयत् स्मरणा
देवतद्विष्णोः संपूर्णंस्यादितिश्रुतिरित्युक्त्वा श्राद्धसंपूर्णकामोविष्णुंस्मरेत्ततः श्राद्धीयवस्तुनिब्राह्मणा
य प्रतिपादयेत् जलेवाक्षिपेत् ततः इष्टैः सहशेषभोजनम् एवंपत्न्यादिश्राद्धंपत्न्यादिसंबंधिनाम्नो
ल्लेखोविशेषः शस्त्रादिहतनिमित्तकेपि एकोद्दिष्ट एव एवप्रयोगः सांवत्सरिकपदंवचनदातव्यं
सद्यथा अश्विनकृष्णचतुर्दश्यांतिथावमुकगोत्रायामातुरमुकदेव्या एकोद्दिष्टश्राद्धमहंकरि
ष्य इतिसंकल्पंकुर्यात् अद्यामुकगोत्रेमातरमुकदेवि एकोद्दिष्टश्राद्ध इदमासनंतेस्वधा इत्येकमा
युधत्सर्गवाक्यम् इत्येकोद्दिष्टप्रयोगः अथस्त्रीकर्तृकश्राद्धप्रयोगः स्नानाच्छुक्लवस्त्रयुगधारिणीमध्या
न्हेसमावृतंपंचगव्योपलेपितंज्वलदंगारशोधितंगौरमृत्तिकाछादितंयथाप्रदेशमासादितंश्राद्धार्थंद्रव्यंज्व
लितदीपंविकीर्णतिलगौरसर्षपंश्राद्धदेशमागत्याचम्यासनेप्राङ्मुखीउपविशेत् पाचिकांतरपक्षेसंसिद्धमितमार्च १२९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कार्यंकुर्यात् अपवित्रःपवित्रो वा सर्वावस्थांगतोपिवा यःस्मरेत्पुंडरीकाक्षं सबाह्याभ्यंतरःशुचि पुंडरीकाक्ष
पुनातु ति कुशत्रय जलेन श्राद्धीयद्रव्याणि सिंचयेत् ततः कुशत्रय तिलजलान्यादाय अद्यामुक
गोत्रस्य पत्युरमुकशर्मणः सांवत्सरिकैकोद्दिष्टः श्राद्धं हं करिष्ये इति संकल्पयेत् ततः देवता
भ्यः इति त्रिर्जपेत् ततो दक्षिणमुखपातितवामजानुर्मोटकतिलजलान्यादाय अद्यामुकगोत्रपते ऽ
मुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धे इदमासनं ते नमः इति पितृतीर्थेन मोटकरूपमासनमुत्सृजेत्
ततस्तूष्णीं भोजनपात्रे तिलान् प्रक्षिप्य अर्घपात्रे पवित्रधारणं जलप्रक्षेप तिलगंधपुष्पप्रक्षेपश्च ऽर्घपात्रं वामह
स्ते कृत्वा पवित्रमुत्तराग्रं भोजपात्रे धृत्वा तदुपरि उदकांतरं दत्वा मोटकादीन्यादाय अद्यामुकगोत्रपतेऽमु
कशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धे एष ते हस्तार्घो नमः इत्यर्घं पवित्रोपरि दद्यादुत्सृजेत् ततोऽवशिष्टजलपवित्रस
हितमर्घपात्रमासनं वामभागे पत्येस्थानमसीनि न्युब्जीकुर्यात् ततो गंधादिदानं मोटकतिलजलान्याय अद्याम
कगोत्रपतेऽमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धे एतानि गंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसि ते
नमः ततो जलेनान्नसहितं भोजनपात्रं मंडलेन वेष्टयेत् श्राद्धीयान्नाग्रभागं सव्यंजनं सतिलजलमो
टकादौ कृत्वा मोटकादीन्यादाय इदमन्नमेदतन्न स्वामिपितृभ्यो नमः इति भू स्वामिने ऽन्नं दद्या
त् ततस्ताम्रपात्रस्थितमन्नं कराभ्यामादाय पतिं ध्यायन्ति परिवेषयेत् जल घृत व्यंजनं पुटकां
तरस्थं तत्रोपनीय अन्नेन मधु दत्वा मधुमधुमध्विति च जपेत् तत उभाभ्यां व्यस्ताभ्यां हस्ता ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भ्यां भोजनपात्रमालभ्यान्नमस्तृतनया चिंतयेत् हास्मकव्यमिदंसमदीयमिति पठित्वा दक्षिणहस्तम
नोल्यतदंगुष्ठमिदंमन्त्रं इमा आप इदमाज्यमित्यत्र जलघृतेषु निक्षिप्य इदं हविरिति पुनरन्ने ध्यष्टति
क्षिप्य अन्नोपरि तिलान्वीकीर्य्य मोटकादीन्यादाय अद्यामुकगोत्रपतेऽमुकशर्मन् सांवत्सरिकैकोद्दिष्ट
श्राद्ध इदन्नं सोपकरणं ते नमः इत्युत्सृजेत् ततो वाममपुतोल्यान्नहीनमित्यादि पठित्वा ततो भूमौ तिला
न्विकीर्य्य दर्भैरपविध्य नीलकंठस्तुतिरुचिरलवादीनि पठेत् अशक्तो नमस्तुभ्यं विरूपाक्ष इति श्लोकमपि पठेत्
ततः उच्छिष्टसंनिधावास्तृत कुशत्रयामूमिशोस्य सतिलजले प्रोक्षितं सर्वव्यंजनयुतमन्नमादाय अग्निदग्धा
पक्ष्विा कुशोपरि कुशादिना विकिरेत् ततः आचम्य हरिं स्मृत्वा दक्षिणमुखो पिंडस्थानं प्रादेशमात्रं परिस्म
करद्वयतर्जन्यंगुष्ठयुतमूलयादर्भपिंजुल्या तदल्लिख्य दर्भपिंजुलोमुत्तरतः क्षिपेत् ततः स्तकचलदं
गारं भ्रामयित्वा दक्षिणस्यां क्षिपेत् ततस्तत्र छिन्नमूलकुशत्रयमास्तीर्य्य प्राङ्मुखो देवताभ्य इत्यादि
त्रिपठेत् ततो दक्षिणमुखो पुटके तिलजलगंधपुष्पाणि कृत्वा पाणिना मोटकादीन्यादाय अद्या
मुकगोत्रपतेऽमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धपिंडस्थानेऽत्रावनेनिक्ष्व ते नम इति कुशोप
रि अवनेजनं दद्यात् अद्यामुकगोत्रपतेऽमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्ध एष ते पिंडो न
म इत्यवनिक्तकुशोपरि वामान्वारब्ध दक्षिणपाणिना पिंडं दद्यात् ततो हिरण्यचम्य हरिं स्मृ
त्वा दक्षिणाभिमुख ततः उत्तराभिमुखो भूयश्च संनियम्य पत्निं ध्यायतो दक्षिणमुखो ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवेत् ततो दत्तावशिष्टजलयुतमवनेजनपात्रंमोदकादीनिचादाय अद्यामुकगोत्रपितेऽमुकशर्मन
संवत्सरिके कोदिष्टश्राद्धपिंडेऽत्रावनेनिक्ष्वतेनम इति प्रत्यवनेजनं दद्यात् अद्यामुकगोत्रपते मु
क शर्मन् सांवत्सरिके कोद्दिष्टश्राद्धपिंडे एतत्ते वासोनम इतिमोदकादीन् सूत्रमुत्सृजेत् ततः पिंडगन्धादिदानं
ततः शिवा शिवा आपः संत्विति जल सौमनस्यमस्त्विति पुष्पम् अक्षतं चारिष्टमस्तीति तंडुलान्भाजनपात्रे शर्कः
प्यमोदकादीन्यादाय अद्यामुकगोत्रस्य पत्युरमुकशर्मणः सांवत्सरिके कोदिष्टश्राद्धे दत्तैतदन्नपानादि
कमक्षय्यमुपतिष्ठत्वमित्यक्षय्योदकं दद्यात् ततः पिंडोपरि अघोरः पितरस्तु इति पूर्वाग्रां जलधारां द
द्यात् ततः कृतांजलिः गोत्रं नो वर्द्धतामित्यादि पठित्वा एताः सत्या आशिषः संत्वित्याशिषः प्रार्थयेत्
ततः पिंडोपरि दक्षिणामुखी सपवित्रकुशत्रयं दक्षिणाग्रमास्तीर्य्य तदुपरि दक्षिणाग्रं जलधारां
दद्यात् ततो नम्रीभूय पिंडमाघ्राय सोत्थापयेत् पिंडाधारकुशानुल्मुकं च वह्नौ क्षिपेत् ततोऽर्घपात्रमु
त्तानी कृत्य दक्षिणादानं अद्यामुकगोत्रस्य पत्युरमुकशर्मणः कृतैतत्सांवत्सरिकै कोदिष्टश्रा
द्ध प्रतिष्ठार्थं रक्तिकापरिमितं रजितं चंद्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृ
जेत् इति दक्षिणां दद्यात् ततोऽभिरम्यतामिति विसर्जनम् ततः प्राङ्मुखी देवताभ्य इति पठेत्
ततो दक्षिणामुखी हस्ताभ्यां दीपं निर्वाप्य ततः हस्तौ पादौ प्रक्षाल्याचम्य प्रमादात्कुर्वतामित्यादि
पठित्वा श्राद्धसंपूर्णं कामनया विष्णुं स्मरेत् ततः श्रीद्धीयवस्त्र ब्राह्मणं चार्प्पयेत् अंभसिवाक्षिपेत् १३२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ततः द्विष्टैः सहभोजनं एवमेवशास्त्र हतादिनि मितकमा श्विनकृष्ण चतुर्दश्यां तिथौ श्राद्धंकर्तव्यमाव
श्रा. सरिकपदं तत्र न दातव्यं तद्यथा आश्विन कृष्ण चतुर्दश्यां तिथौ अमुकगोत्रस्य पत्युरमुकशर्मण एको
वि. दिष्टश्राद्धमहं करिष्ये इति संकल्पः अद्यामुकगोत्रयते ऽमुकशर्म्मणएकोदिष्टश्राद्धे इदमासनंतेनम
२३२ इत्येवमादिना ऽऽसनादिदानं एवमेव शूद्रकर्तृकैकोदिष्टश्राद्धप्रयोगः अथपार्वणिकपार्वणश्राद्धप्रयोग
अपरान्हे स्नातः शुक्लाक्लिवासः शुचिएवान्यवस्त्रादिनावेष्टितं श्राद्धदेशमागच्छेत् ततः प्राङ्मुखमुपविश्य
सिद्धान्नसंभवेसिद्धमिति याचिकांप्रश्ना ओं अपवित्र इत्यादि पठित्वा ओं पुंडरीकाक्षः पुनात्विति कुशत्रय
नीतजलैः श्राद्धवस्तूनि सिंचेत् रक्षार्थंदीपं निधाय गौरसर्षपैरवकीर्य्य ओं नमो नमस्ते गोविंद पुराण पुरुषो
त्तम इदं श्राद्धं हृषीकेश रक्षतो सर्वतो दिशः प्राच्यैनमः अवाच्यैनमः प्रतीच्यैनमः उदीच्यैनमः यवपुष्पै
र्भूम्यैनम इति भूमिं त्रिः संपूज्य पादयोरघेः कुशत्रयं दत्वा ततः कुशत्रयतिलजले : संकल्पंकु
र्य्यात् ओं अद्यामुकमासियामुकपक्षीयामुकतिथौ अमुकगोत्राणां पितृपितामहप्रपितामहानां
मुकशर्मणं मुकगोत्राणंमातामहप्रमातामहवृद्धप्रमातामहानांमसुका मुकशर्मणमपात्रकपार्वण
श्राद्धमहंकरिष्ये ततो गायत्रीं त्रिर्जपित्वा ओं देवताभ्य इत्यादि त्रिर्जपेत् ततः उत्तराभिमुखो दक्षिणे
नरजमसादित कुशत्रयात्मकासनद्वयं प्रथमंदक्षिणमासनं सयवमुत्सृजेत् ओं अद्यामुकगोत्राणां
पितृपितामहप्रपितामहानाममुकामुकशर्मणां पार्वणश्राद्धसंबंधिनो विश्वेदेवा इदमासनं वोनमः २३२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति कुशत्रययवजलैरुत्सृजेत् एवं अद्यामुकगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानाममुकशर्मणां
पार्वणश्राद्धसंबंधिनो विश्वेदेवा इदमासनं वो नम इत्यपरमुत्सृजेत् ततोऽपसव्यं कृत्वा पातितवामजा
नु दक्षिणाभिमुखो द्विगुणभुग्नकुशत्रयतिलजलादाय पूर्वपश्चिमासादितमोटकरूपाणि षडासनानि ति
लजलप्रोक्षितानि प्रत्येकं पित्रादिभ्यः पश्चिमत आरभ्य उत्सृजेत् तत्र वाक्यः ॐ अद्यामुकगोत्र पितरमुक
शर्मन् पार्वणश्राद्धे इदमासनं ते स्वधा एवं पितामहप्रपितामहयोः ॐ अद्यामुकगोत्रे मातामहामुकशर्मन्
पार्वणश्राद्धे इदमासनं ते स्वधा एवमेव प्रमातामहवृद्धप्रमातामहयोर्दद्यात् ततः सव्यं कृत्वा ॐ विश्वान्देवा
नहमावाहयिष्ये इत्युक्त्वा ॐ विश्वेदेवास आगत शृणुता म इमं हवम् एदं बर्हिर्निषीदतेत्यादि
ना देवानावाह्य ॐ यवोसि यवयास्मद्द्वेषो यवयारातीरिति यवान्विकीर्य ॐ विश्वेदेवाः शृणुते
त्यादि जपेत् ॐ आगच्छन्तु महाभागा विश्वेदेवा महाबलाः ये यत्र योजिताः श्राद्धे सावधाना भवं
त्विति श्लोकं च पठेत् ततोऽपसव्यं कृत्वा दक्षिणाभिमुखः ॐ पितॄनावाहयिष्ये इत्युक्त्वा ॐ उ
शन्तस्त्वा निधीमह्युशन्तः समिधीमहि ॐ उशन्नुशत आवह पितॄन् हविषे अत्तवे इत्यादिना पि
रा तॄनावाह्य ॐ अपहता असुरा रक्षांसि वेदिषदः इत्यादिना पात्रेषु तिलान् प्रकीर्य ॐ आयन्तु नः
पितरः सोम्यासः अग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन्यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मानि
त्यादि पठेत् ततः सव्यं कृत्वा देवार्घपात्रद्वये पवित्रं धृत्वा अपसव्येन पित्रार्घपात्रेषु पवित्रं धृत्वा सव्ये १२४

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नेदेवार्घपात्रद्वये ॐ शन्नो देवीरभीष्टय आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः इत्यादिना जलं प्रक्षिप्य
अपसव्येन पित्रार्घपात्रषट्के नेनैव मन्त्रेण जलं पितृतीर्थेनाक्षिपेत् ततः सव्यं कृत्वा ॐ यवोसि यवया
स्मा द्वेषो यवयारातीरिति देवार्घपात्रद्वये प्रत्येकं यवान् प्रक्षिप्य अपसव्येन पित्रार्घपात्रेषु प्रत्येक
मू ॐ तिलोसि सोमदेवत्यो गोसवो देवनिर्मितः प्रत्नमद्भिः पृक्तः पितृलोकान्प्रीणहि नः स्वाहा इति ति
लान्प्रक्षिपेत् ततः सव्येन देवार्घपात्रद्वये तूष्णीमेव गंधपुष्पे प्रक्षिप्य अपसव्येन पित्रार्घपात्रेषु प्र
क्षिपेत् ततः सव्यं कृत्वा एकं देवार्घपात्रं वामहस्ते कृत्वा तत्रस्थितं पवित्रं देवभोजनपात्रे पूर्वाग्रं धृत्वा
तदुपरि किंचिदुदकांतरं दत्वा ॐ या दिव्या आपः पयसा संबभूवुर्या आन्तरिक्षा उत पार्थिवीर्या हिरण्य
वर्णा यज्ञियास्ता नः आपः शिवाः शं स्योनाः सुहवा भवन्तु इति पठित्वा यवकुशजलान्यादाय ॐ अद्यामु
कगोत्राणां पितृपितामहप्रपितामहानाममुकामुकशर्मणां पार्वणश्राद्धसंबंधिनो विश्वेदेवा एष
ते हस्तार्घो नमः इत्यर्घं दद्यादुत्सृजेत् एवमेव मातामहादिदेवेभ्योपि दद्यात् ततोऽपसव्यं कृत्वा पित्रर्घपा
त्रं वामहस्ते कृत्वा पितृभोजनपात्रे दक्षिणाग्रं पवित्रं धृत्वा तदुपरि किंचिदुदकांतरं दत्वा ॐ या दिव्या
आपः पयसा संबभूवुर्या आंतरिक्षा उत पार्थिवीर्या हिरण्यवर्णा यज्ञियास्ता न आपः शिवाः शं स्योनाः
सुहवा भवन्तु इति पठित्वा मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्र पितरमुकशर्मन् पार्वणश्राद्धे एष
हस्तार्घः स्वधा इति अर्घं दद्यादुत्सृजेत् एवं पितामहादिभ्यो दद्यात् ततः सव्यं कृत्वा पवित्रसहितम् १३५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वशिष्टजलंयुतंदेवार्घपात्रद्वयंयथाक्रमं अन्येकेदेवासनदक्षिणपार्श्वे ॐ विश्वेभ्यो देवेभ्यः स्थानमसी
त्युक्त्वा उत्तानमेवधारयेत् अपसव्यं कृत्वा प्रपितामहार्घपात्रस्थितपवित्रादीनि पितामहार्घपात्रे
कृत्वा तानिसर्वाणि पित्रर्घपात्रेकृत्वा पित्रर्घपात्रं पितामहार्घपात्रोपरितदुभयंप्रपितामहार्घपात्रे
परिस्थत्वा पितृवामपार्श्वे ॐ पितृभ्यस्स्थानमसीतिमिलितान्येवन्युब्जीकुर्य्यात् एवमेवमातामहार्घ
पात्राणिमेलयित्वा मातामहवामपार्श्वे ॐ मातामहप्रमातामहवृद्धप्रमातामहेभ्यः स्थानमसीत्यर्घ
पात्राणिन्युब्जीकुर्यात् तथास्थापितानिचतानि दक्षिणदानपर्यंतंनोद्धरेत् नचालयेत् ततः सव्यंकृ
त्वा गंधादिदत्वा संकल्पंकुर्यात् ॐ अद्यामुकगोत्राणां पितृपितामहप्रपितामहानाममुकामुकशर्मणां
पार्वणश्राद्धसंबंधिनो विश्वेदेवा एतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसि वोनमः इति यथा
संभवेमुत्सृजेत् एवमेवमातामहादिदेवेभ्योपिदद्यात् ततोऽपसव्यंकृत्वा गंधादिदत्वा मोटकतिलजला
न्यादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन्पार्वणश्राद्ध एतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवी
तवासांसितेस्वधेतिपित्रेगंधादिदद्यात् एवमेवपितामहादिपंचभ्योपिदद्यात् ततोजलेनभोजनपात्र
सहितमासनंवेष्टयित्वा मंडलानिकुर्यात् ततः श्राद्धदेयान्नाग्रभागमानीय सघृतंतत्सव्येनैव
प्राङ्मुखः पुटकादिस्थितजले आहुतिद्वयंजुहुयात् ॐ अग्नये कव्यवाहनाय स्वाहा ॐ सोमाय
पितृएते स्वाहा ततोजलघृतसहितंतिलव्यंजनयुतमन्नमयसव्येन ॐ इदमन्नमेतद्भूः स्वामि १३६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रा पितृभ्योनम इतिदद्यात्ततो हस्तप्रक्षालनमन्त्रं किंचित्सव्येन दैवपात्रद्वये अपसव्येन पित्रादिपात्रेषु दत्वा पिंडा
वि. र्थं किंचिदवशेषयेत् ततउत्कृष्टमन्नं सिद्धमन्नं सिद्धमामं वा भक्ष्यभोज्याहारस्सम्भृत्वेकपरिविष्य यथासम्भ
१३० वमुपकरणं जलं घृतं च तत्रोपनीय सव्येन दैवे अपसव्येन पित्रादिपात्रेषु मध्वत्रोपरिदत्वा प्रत्येकं ओं मधुवा
ता ऋतायते मधुक्षरंति सिंधवः माध्वीर्नः संत्वोषधीः ओं मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः मधुद्यौ
रस्तु नः पिता ओं मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः माध्वीर्गावो भवन्तु नः ओं मधु मधु मध्विति च
जपेत् ततः सव्येन उत्तानपाणिभ्यां दैवपात्रं स्पृष्ट्वा ओं पृथिवीते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृ
तेऽमृतं जुहोमि स्वाहा ओं इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् समूढमस्य पांसुरे इति पठित्वा
ओं [illegible] हव्यमिदं रक्षस्व मदीयमिति पठित्वा ओं इदं गन्धमित्यन्ने ओं इमा आप इति जले ओं इदमाज्य
मिति घृते ओं हविरिति पुनरन्ने दक्षिणकरांगुष्ठमावेश्य ओं यवोसि यवयास्मद्द्वेषो यवयारातीरि
यवानन्ने प्रक्षिप्य ओं अद्यामुकगोत्राणां पितृपितामहप्रपितामहानाममुकामुकशर्मणां
श्राद्धसंबंधिनो विश्वेदेवा एतद्द्रव्यं सोपकरणं नमः इति कुशत्रययवजलैरुत्सृजेत् एव
मेव मातामहादिदेवेभ्योपि दद्यात् ततोऽपसव्यं कृत्वा दक्षिणमुखः पातितवामजानुः पितृ
पात्रं भुजाभ्यां व्यस्ताभ्यां पाणिभ्यां स्पृष्ट्वा ओं पृथिवीते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽमृ
स्तेऽमृतं जुहोमि स्वाहा ओं इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे इति पठित्वा ओं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कृष्णकव्यमिदंरक्षमदीयमितिपठित्वा ओं इदमन्नमित्यन्ने ओं इमा आप इतिजले ओं इदमाज्यमितिघृते
ओं इदं हविरितिपुनरन्ने दक्षिणकराङ्गुष्ठमावेश्य ओं अपहता: असुरारक्षा ᳪसिवेदिषद इत्यन्नोपद्धि
लाचिकोर्घ्यमोदकतिलजलान्यादाय ओं अद्यामुकगोत्र पितरमुकशर्मन् पार्वणश्राद्धएतत्तेन्नंसोपक
रणंस्वधेतिपित्रेयमुत्सृजेत् एवमेवपितामहादिभ्योपिदद्यात् यद्येकं पात्रंभवतिनदाएथिवीपात्रमिति
मन्त्र: पुनर्नपठनीय: तत: अन्नहीनंक्रियाहीनं विधिहीनंचयद्भवेत् तत्सर्वमच्छिद्रमस्तु इतिजपेत् ततोगा
यत्रीत्रिजपेत् कुशेषुपविश्य ओं मधुवाता इतिऋचंजप्त्वा रक्षोघ्नी ओं कृणुष्वपाजइत्यृच: पठित्वाष्ट
मितिलैरवकिरेत् ओं उदीरतामवरउत्परासु: उन्मध्यमा: पितर: सोम्यास: असुंयईयुरवृका ऋतज्ञ:
स्तेनोभवन्तुपितरोहवेषु इत्यादिपितृमंत्रान् ओं सहस्रशीर्षेत्यादिपुरुषसूक्तंजपेत् ओं आशु:शिशान
इत्यादिकमप्रतिरथं अन्यानिचपवित्राणिजपेत् पुराणेतिहासरवोत्रादीनिचजपेत् तत: उच्छिष्टसन्निधाव
स्तृतकुशाचयांभूमिंप्रोक्ष्यसर्वप्रकारमन्नमुद्धृत्य सतिलमेकीकृत्य ओं अनाग्निदग्धाश्चयेजीवायेप्यदग्धा
कुलेमम: भूमौदत्तेनतृप्यन्तुतृप्तायांतुपरांगतिं कुशोपर्य्यन्नमुत्सृजेत् तत: सव्यंकृत्वाचम्यह
रिस्मृत्वा गायत्रीमधुवाता इतिऋचंमधुमधुमध्वितिचजपेत् ततो ऽपसव्यंकृत्वापिंडपानना
र्थे निमित्तहस्तमात्रंचतुरंगुलोच्छ्रितं दक्षिणप्लववपिंडिकाद्वयमध्यमध्यस्थानसव्यहस्तध
तोपरिभागेनदक्षिणहस्तधृतमूलेनपवित्रेण ओं अपहता ऽअसुरारक्षाᳪसिवेदिष इतिमंत्रे १३८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

णप्रादेशमात्रमुल्लिखेत् पवित्रमैशान्यां दिशि क्षिपेत् ततः उभयत्र ॐ ये रूपाणि प्रति मुंचमानाऽसुराः सन्तः स्वधया चरन्ति परापुरो निपुरो ये भरंत्यग्निष्टांल्लोकात्प्रणुदात्वस्मादिति मंत्रेण ज्वलदंगारमन्त्ये कंभ्रामयेत् अंगारं दक्षिणतो निदध्यात् ततउपमूलसकृदच्छिन्नं दक्षिणाग्रकुशत्रयं रेखायामास्तृणुयात् ततः सव्यं कृत्वा ॐ देवताभ्य इति त्रिजपेत् ततोऽपसव्यं कृत्वा पुटकषट्के जलतिलगंधपुष्पाणि कृत्वा एकमात्रं वामहस्ते कृत्वा मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्र पितरमुकशर्मन् पार्वणश्राद्धपिंडस्थाने ऽत्रावनेनिक्ष्वते स्वधा इत्यास्तृत दर्भमूले वनेजनं दद्यात् एवं पितामहाय परपात्रमादाय कुशमध्ये तृतीयं पात्रमादाय प्रपितामहाय कुशाग्रे दद्यात् एवमपरपिंडिकायामपि यथाक्रमं कुशेष्ववनेजनादि दद्यात् ततः सव्यं जनतिलजलमध्वाज्यहुतशेषान्नेन षट्पिंडान्निर्माय मधुघृताभ्यामभिघार्य दद्यात् अथ मोटकतिलजलपिंडानादाय ॐ अद्यामुकगोत्र पितरमुकशर्मन् पार्वणश्राद्ध एष ते पिंडः स्वधा इति प्रथमावनेजनस्थाने पिंडं दद्यात् एवं पितामह प्रपितामहयोः प्रत्येकं तत दवनेजन। स्थाने पिंडं दद्यात् एवमपरपिंडानपि द्वितीयपिंडिकायां तत दवनेजनस्थाने मातामहादिभ्यो दद्यात् पिंडदानंच सव्योपगृहीत दक्षिणहस्तेन कार्यम् ततः प्रपितामहादूर्ध्वं मंत्रयाणां लेपभागभुंजां तृप्तिमुद्दिश्य ॐ लेपभागभुजस्तृप्यंतु इति पठित्वा पित्रादिक पिंडाधार कुशमूले करं प्रोंछ्य सव्यं कृत्वा त्रिराचामेत् ततो हरिं स्मृत्वा अपसव्यं कृ०

Kirtikant Sharma Collection, Najafgarh

श्रा॰ वि॰ १४॰

न्वादक्षिणंमुख ॐ अत्रपितरोमादयध्वंयथाभागमावृषायध्वमितिपठित्वा वामावर्त्तेनाद...
तमना: श्वासंनियम्य तेनैवयथाभागमावृषायिषत इतिजपेत् ततः पूर्वदत्ता वशिष्टजल मुतम
वनेजनपात्रमादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन् पार्वणश्राद्धे पिंडोऽत्र प्रत्यवनेनिक्ष्वते स्व
धेति अयमपिंडोपरि प्रत्यवनेजनं दद्यात् एवमेव ततद्वनेजनपात्रे पितामहादिभ्यस्ततपिंडोपरि
प्रत्यवेजनं दद्यात् ततो नीवीं विस्रस्य सव्येनाचम्य अपसव्यं कृत्वा वामेन पाणिना सूत्रमादाय
दक्षिणकरे सूत्रं कृत्वा ॐ नमोवः पितरोरसायनमोवः पितरः शोषायनमोवः पितरोजीवाय नमोवः
पितरः स्वधायैनमोवः पितरोघोरायनमोवः पितरोमन्यवेनमोवः पितरः पितरोनमोवोग्र
हान्नः पितरोदत्तसतोवः पितरोदेष्म इतिपठित्वा एतद्वः पितरोवास इत्यनु कायद सपिंडे षु स्
त्राणि धृत्वा मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन् पार्वणश्राद्धे पिंडएत
त्तेवासः स्वधेति सूत्रमुत्सृजेत् एवमपरपिंड पंचकेषु ततन्नाम्नोत्सृजेत् ततोगंधपुष्पधूपदीपतां
बूलानि प्रत्येके पिंडेषु दद्यात् ततः शिवा आपः सन्त्विति जलं सौमनस्यमस्त्विति पुष्पं ॐ अक्षतंचा
रिष्टमस्त्विति तंडुलानन्नपात्रे क्षिपेत् ततोमोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रस्यपितर
मुकशर्मणः पार्वणश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमस्त्वित्युत्सृजेत् एवमेव पितामहादी
नां षण्णां तन्नाम्ना प्रत्येकमुत्सृजेत् ततः सव्यं कृत्वा दक्षिणां दिशं पश्यन् सुमना पिंडो ॥ १४८

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परि ॐ अघोराः पितरः संत्विति पठन् पूर्वोयांजलधारां दद्यात् ततः कृतांजलिः प्राङ्मुख आशिषः प्रा
र्थयेत् ॐ गोत्रं नो वर्द्धतां दातारो नोभिवर्द्धन्तां वेदाः संततिरेव च श्रद्धा नो माव्यगमद्बहुदेयं च नो
स्त्विति अन्नं च नो बहु भवेदतिथींश्च लभेमहि याचितारश्च नः संतु मा च याचिष्म कंचन एता
स्सचत्या आशिषः संतु ततो ऽपसव्यं कृत्वा पिंडोपरि सपवित्र कुशानास्तीर्य ॐ ऊर्जं वहन्तीरमृतं घृतं
पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे पितॄनिति मंत्रेण सपवित्र कुशोपरि दक्षिणाग्रां
जलधारां दद्यात् ततः स्वस्थानस्थितामेव पिंडानन्नीभूयाघ्राय उत्थापयेत् ततः पिंडाधारकुशानुल्मु
कद्वयं च वह्नौ क्षिपेत् ततः सव्येन देवार्घ पात्र द्वयं संचाल्या ऽपसव्येन पित्राद्यर्घ पात्राण्युत्तानी कृत्य
सव्येन कुशत्रय यवजलैर्दैवदक्षिणां दद्यात् ॐ अद्यामुकगोत्राणां पितृपितामहप्रपितामहानां
ममुकामुकशर्मणां पार्वण श्राद्ध संबंधिनो विश्वेषां देवानां कृतैतत्पार्वण श्राद्ध प्रतिष्ठार्थं
हिरण्यमग्निदैवतं यथानाम गोत्राय ब्राम्हणाय दक्षिणां दातुमहमुत्सृजे तु एवं मातामहादि
श्राद्ध संबंधि विश्वे देव ब्राम्हणाय दक्षिणां दद्यात् ततो ऽपसव्येन सोदक तिल जलान्यादाय पित्रा
दि श्राद्ध दक्षिणां दद्यात् ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मणः कृतैतत्पार्वण श्राद्ध प्रतिष्ठार्थं
मिदं रजितं चंद्रदैवतं यथानामगोत्राय ब्राम्हणाय दक्षिणां दातुमहमुत्सृजे तु एवं पितामहा
दि श्राद्धानामपि दक्षिणां दद्यात् हिरण्यरजिताभावे यथासंभवम् ॥ ॥ ॥

श्लो० उत्तरोधनेशोधने परेराममन्तं ब्रह्मवादिनां भवति व्ययं भवना च मया
च श्राद्धकार्यादि....समर्थी यास....

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न्यदपिफलमूलादिकदक्षिणां दद्यात् ॐ वाजेवाजेवत वाजिनोनोधनेषुविप्राः ऽमृता ऋतज्ञाः अस्यमध्वःपि
वतमादयध्वंतृप्तायात यात्तपथिभिर्देवयानैरिति वादीन् विसर्जयेत् ॐ विश्वेदेवाःप्रीयंतामितिदेववि
सर्जयेत् ततः सव्येन देवताभ्यः पितृभ्यश्चेतित्रिर्जपेत् ततोऽपसव्येन रक्षा दीपं निर्वाप्य सव्यं कृत्वा
हस्तौ पादौ प्रक्षाल्याचम्यः ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषुयत् स्मरणादेव तद्विष्णोः संपू
र्णं स्यादिति श्रुति रिति पठित्वा कर्मपूर्णतार्थं विष्णुं स्मरेत् श्राद्धीय द्रव्याणि ब्राह्मणाय प्रतिपादयेत्
तदभावे जले वाक्षिपेत् ततो वैश्वदेव बलि कर्माणि कुर्यात् इतिपार्वण श्राद्ध विधिः एषविधिरुपरा
गनवान्न भक्षण तीर्थ प्राप्ति निमित्तकादि श्राद्धेषु बोधव्यः तीर्थ प्राप्ति निमित्त कादि श्राद्धस्वधीवाह
नवायइति विशेषः अथाभ्युदयिक श्राद्धम् तत्रप्रथमं तान्नियत पूर्वंकृत्वा मातृपूजा विधिः प्रातः काले
स्नातः कृत्य नित्यक्रियः कुड्ये फलके वास्या पितरक्षिका सप्तदश तपे गण पति सहित षोडशमा
तः मृतिकामयी श्रियं तदभावे तामपिरक्षिकायां पूजयेत् तत्रमातरश्च गौरी पद्मा शचीमेधासा
वित्री विजया जयाः देवसेना स्वधास्वाहामातरोलोकमातरः हृष्टिपुष्टि स्तथातुष्टि स्वस्थानकुल
देवतेति तत्रक्रमः आचम्यः प्राङ्मुख उपविश्य प्रथम रक्षिकामारभ्य क्रमेण गणपतिः रक्षिगौ
र्येसियद्मासिशच्यसिमेधासि सावित्र्यसि विजयासिजयासि देवसेनासिस्वधासि स्वाहासिमा
धरः स्यात लोकमातरः स्या हृष्टिरसि पुष्टि रसि तुष्टि रसि आत्म कुल रेदे वतासि॥ ॥ ॥ १४२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रा- श्रीरसीत्युक्त्वाऽक्षतानादायपुनःप्रथमरक्षिकामारभ्यःॐभूर्भुवःस्वर्गणपते इहागच्छ इहतिष्ठॐभूर्भुव
वि- स्वर्गौरि इहागच्छइहतिष्ठःॐभूर्भुवःस्वः पद्मे इहागच्छ इहतिष्ठ ॐभूर्भुवः स्वः शचि इहागच्छ इह
१५३ तिष्ठः ॐ भूर्भुवः स्वःस्वर्मेधे इहागच्छ इहतिष्ठः ॐ भूर्भुवः स्वः सावित्री इहागच्छ इहतिष्ठः ॐभू
र्भुवः स्वर्विजये इहागच्छ इहातिष्ठ : ॐभूर्भुवः स्वर्यजे इहागच्छ इहतिष्ठः ॐ भूर्भुवः स्वर्देवसेने
इहागच्छइहतिष्ठःॐभूर्भुवःस्वः स्वधेइहागच्छ इहतिष्ठः ॐभूर्भुवः स्वहे इहागच्छइहतिष्ठः ॐ
भूर्भुवः स्वर्मातर इहागच्छ तेइहतिष्ठ ॐ भूर्भुवः स्वर्लोकमातर इहागच्छ इहतिष्ठत ॐभूर्भुवः
स्वः हृष्ट इहागच्छ इहतिष्ठः ॐभूर्भुवः स्वः पुष्टे इहागच्छ इहतिष्ठ ॐभूर्भुवः स्वः तुष्टे इहागच्छ इहति
ष्ठः ॐभूर्भुवः स्वरात्मकुलदेवते इहागच्छ इहतिष्ठः ॐभूर्भुवः स्वः श्रि इहागच्छ इहतिष्ठ ॐभूर्भुव
स्वः गणपति सहिता एताभ्यात्र श्रियंच प्रत्येकं मोंकारव्याहृति पूर्वकमावाह्य स्थापयित्वा ॐमनो
जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञᳪ समिमं दधातु विश्वेदेवास इहमा
दयंतामोंप्रतिष्ठा इत्यक्षतान्विकीर्य्य एकदैवप्रतिष्ठांकुर्यात् ततः पाद्यादि गृहीत्वा ॐगणप
गो तयेनमः ॐ गौर्य्यैनमः ॐ पद्मायैनमः ॐ शच्यैनमः ॐ मेधायैनमः ॐ सावित्र्यैनमः ॐ विजयायै
नमः ॐजयायैनमः ॐ देवसेनायैनमः ॐस्वधायैनमः ॐस्वहायैनमः ॐ मातृभ्योनमः ॐ लोकमातृ
भ्योनमः ॐ हृष्टैनमः ॐपुष्ट्यैनमः ॐतुष्ट्यैनमः ॐ आत्मकुलदेवतायैनमः ॐ श्रियैनमः इतिपाद्यादिभिःप्रत्येक १५३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्चयेत् ततोगणपतिसहिताःषोडशमातरः क्षमध्वमिति विसर्जनम् ॐ श्रीर्भपिरमस्वेति ततो घृते
न भित्तौ पंचधारेखाउत्तरोत्तरक्रमेण कुर्यात् ताम्बूलफलेनप्रतिच्छेदनेन मंत्रेण ॐ वासोपवित्र मधिशत
धारंवसोः पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधु
क्षः इत्यनेन भित्तौ त्रिः पंचसप्तवाघृतधारां दद्यात् अथाभ्युदयिकश्राद्धप्रयोगः तत्र दक्षिणोत्तरक्र
मेण द्वादशस्थानेषु प्रत्येक मासादित द्रव्यं ज्वलितप्रदीपं देशमागत्या चम्य प्राङ्मुख उदङ्मुखो वोप
विशेत् सव्येन सर्वं कर्म कर्तव्यं ऋजुव एवकुशाः तिलकार्ये यवाः कर्तव्याः ततः ॐ अपवित्रः पवित्रोवा
सर्वावस्थां गतोपिवाः यःस्मरेत् पुंडरीकाक्षं सबाह्याभ्यंतरः शुचिः ॐ पुंडरीकाक्षः पुनात्विति आत्मीयद्र
व्याणि सिंचेत् कुशोदकेन ततः कुशयवजलान्यादाय ॐ अद्यामुकगोत्राणां मातृपितामहिप्रपितामही
नाममुकामुकदेवीनां नांदीमुखीनां तथामुकगोत्राणां पितृपितामहप्रपितामहानाममुकामुकश
र्मणां नांदीमुखानां तथामुखगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्म
णां नांदीमुखानां अमुकगोत्रस्यामुकस्य कर्तव्यामुककर्मनिमित्तिकमाभ्युदयिकश्राद्धमहं क
रिष्ये इतिसंकल्पयेत् ततोगायत्रीं त्रिर्जपित्वा ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्यएवचनमः
स्वधायै स्वधायै नित्यमेवनमोनमः इति त्रिर्जपेत् ततः ॐ अद्यामुकगोत्राणां मातृपितामहीप्रपितामही
नाममुकदेवीनांदीमुखीनामाभ्युदयिकश्राद्धसंबंधिनो विश्वेदेवा इदमासनं वोनमः इति कु १८०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शत्रयरूपंसपवमासनंदक्षिणेआरभ्योत्सृजेत् एवंयथोक्तंॐ अद्यामुकगोत्राणांपितृपितामहप्रपिता
महानाममुकामुकशर्मणांनांदीमुखानां आभ्युदयिक श्राद्धसंबंधिनोविश्वेदेवा इदमासनंवोनमः ॐ अ
द्यामुकगोत्राणांमातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणांनांदीमुखानामाभ्युदयिकश्राद्धसं
बंधिनोविश्वेदेवा इदमासनंवोनमः ॐ अद्यामुकगोत्रेमातरमुकदेवीनांदीमुखिआभ्युदयिकश्राद्ध इदमासनं
तेनमः एवंपितामहीप्रपितामह्योभ्यामासनंदद्यात् ॐ अद्यामुकगोत्रपितरमुकशर्मन् नांदीमुखाभ्युद
यिक श्राद्ध इदमासनंतेनमः एवंपितामह प्रपितामहयोरपि ॐ अद्यामुक गोत्रमातामह ऽमुकश
र्मन्नांदीमुखाऽभ्युदयिक श्राद्धे इदमासनंतेनमः एवंप्रमातामह वृद्धप्रमातामहयो रपि ततआवा
हनम् ॐ विश्वान्देवा नहमावाहयिष्ये इत्युक्त्वा ॐ विश्वेदेवास ऽआगत शृणुता म ऽइदछं
हवम् एदंबर्हिर्निषीदत इत्यावाह्य ॐ यवोसियवयास्मद्द्वेषो यवया रातीरिति देवपात्रे
यवान् विकीर्य ॐ विश्वेदेवासऽआगत शृणुताम ऽइमछं हवम् ये ऽअन्तरिक्षेय ऽउपद्यविष्ठ
ऽअग्निजिह्वा ऽउतवायजत्राः ऽआसद्यास्मिन् बर्हिषि मादयध्वम् ॐ आगच्छंतुमहाभागा
विश्वेदेवा महाबलाः येयत्र योजिताः श्राद्धे सावधानाभवंतुते इतिपठेत् ॐ नांदीमुखान्पितॄ
नहमावाहयिष्ये इत्युक्त्वा ॐ उशन्तस्त्वानिधीमह्युशन्तः समिधीमहीउशन्नुशत ऽआवहपितॄन् हविषे ऽअ
त्तवे इतिपितॄनावाह्य ॐ अपहता असुरारक्षाछंसिवेदिषद इति मात्रादि पात्रे यवान्वी कीर्य ॐ १४५

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आयन्तु नः पितरः सोम्यासोग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन्यज्ञे स्वधया मदन्तोधिब्रुवन्तु ते वन्त्वस्मानिति पठित्वा ततो अर्घकरणं तवदेवपूर्वकं सर्वेष्वर्घपात्रेषु पवित्राणि कृत्वा ओं शन्नोदेवीरभिष्टय आपोभवन्तु पीतये शंय्योरभिस्रवन्तु न इति जलं क्षिपेत् ततो देवार्घपात्रेषु ओं यवोसि यवयास्मद्द्वेषो यवयारातीरिति यवान् क्षिपेत् मात्रादिपात्रेषु ओं यवोसि सोमदेवत्यो गोसवो देवनिर्मितः प्रत्नमद्भिः पृक्तः पुष्ट्या नांदीमुखाल्लोकान् प्रीणाहि नः स्वाधेति मंत्रेण यवान् क्षिपेत् ततः प्रत्येकं गंधपुष्पे तूष्णीं क्षिपेत् ततः प्रथमदेवपात्रं वामहस्ते कृत्वा तत्रस्थं पवित्रं भोजनपात्रे निधाय तदुपरि किञ्चिदुदकांतरं दत्वा ओं या दिव्या आपः पयसा संबभूवुर्या आंतरिक्षा उत पार्थिवीर्याः हिरण्यवर्णा यज्ञियास्ता नः आपः शिवा शं स्योना सुहवा भवन्त्विति पठित्वा कुशत्रय यव जलान्यादाय ओं अद्यामुकगोत्राणां मातृपितामहीप्रपितामहीनाममुकामुकदेवीनां नांदीमुखानां आभ्युदयिक श्राद्धसंबंधिनो विश्वेदेवा एष वो हस्तार्घो नमः एवमेव पित्रादिश्राद्धदेवेभ्यो मातामहादेवेभ्यश्च हस्तार्घं दद्यात् ततो मातुरर्घमादाय पूर्ववत् कृत्वा ओं या दिव्या इत्यादि पठित्वा कुशादीन्यादाय ओं अद्यामुकगोत्रे मातरमुकदेवि नांदीमुखी आभ्युदयिकश्राद्ध एष ते हस्तार्घो नमः एवं पितामही प्रपितामहीरपि दद्यात् ततः पित्राद्यर्घपात्रमादाय सर्वं पूर्ववत्कृत्वा कुशादीन्यादाय ओं अद्यामुकगोत्र पितरमुकशर्मन्नांदीमुखाभ्युदयिकश्राद्धे एष ते हस्तार्घो नमः

Kirtikant Sharma Collection, Najafgarh

एवमेवपितामहादिपंचभ्योहस्तार्घंदद्यात् ततोःवशिष्टजलपवित्रयुतप्रथमं देवार्घपात्रमादायॐ
विश्वेभ्योदेवेभ्यस्स्थानमसीतिदेवासन दक्षिणभागेउत्तानंस्थापयेत् एवमपरंदेवार्घपात्रद्वयंतदास
नदक्षिणभागेउत्तानस्थापयेत् ततः पितामही प्रपितामही पात्रद्वयस्थितं पवित्रादिमात्रर्घपात्रे
निधायमात्रर्घपात्रंपितामह्यर्घपात्रोपरितस्यात्रंप्रपितामह्यर्घपात्रेपरिस्थत्वादक्षिणकरेणदाय
ॐमातृभ्यःस्थानमसीतिमात्रासनवामभागेन्युब्जीकुर्यात् एवमेवपित्राद्यर्घपात्राणांमेलनंकृत्वा
पित्रासनवामभागेॐपितृभ्यःस्थानमसीति अर्घपात्राणिन्युब्जीकुर्यात् एवमेवमातामहार्घपा
त्राणांमेलनंकृत्वामातामहासन।वासवामभागेॐमातामहप्रमातामहवृद्धप्रमातामहेभ्यःस्थान
मसीतिन्युब्जीकुर्यात् ततोगंधादिदानंतत्रक्रमःॐअद्यामुकगोत्राणांपितृपितामहीप्रपितामही
नाममुकामुकदेवीनांनांदीमुखानामाभ्युदयिकश्राद्धसंबंधिनोविश्वेदेवाएतानिगंधपुष्पधूप
दीपतांबूलयज्ञोपवीतंवासांसिवोनमः एवंपित्रादिदेवेभ्योमातामहादिदेवेभ्यश्चदद्यात् ॐ
अद्यामुकगोत्रेमातरमुकदेविनांदीमुखी अभ्युदयिकश्राद्धएतानिगंधपुष्पधूपदीपतांबू
लसिद्द्रव्यंवासांसितेनमः एवंपितामहीप्रपितामहीभ्यामपिगंधादिदानम् ततः ॐ अद्या
मुकगोत्रपितरमुकशर्मन्नांदीमुखाभ्युदयिकश्राद्धेएतानिगंधपुष्पधूपदीपतांबूलय
ज्ञोपवीतवासांसितेनमःएवंपितामहादिपंचभ्योपिगंधादिदानम् ततोजलेनस १५७

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

श्रा· वि· १४८ आसनानि भोजनपात्रसहितानि चतुष्कोणमंडलेन वेष्टयेत् ततः सजलपुटकादौ हस्तेनैव सव्य
नमन्त्रे ॐ अग्नये कव्यवाहनाय स्वाहा ॐ सोमाय पितृमते स्वाहा इत्याहुति द्वयं जुहुयात् ततो सव्यं
कृत्वा दक्षिणामुखः पातित वामजानुर्मोटक तिलजलान्यादाय ॐ इदमन्नमेतद्भूस्वामि पितृभ्यो
नमः इति भूस्वामिने किंचिदन्नं दद्यात् ततः सव्यं कृत्वा प्राङ्मुख उदङ्मुखो वाहुतशेषमन्नं देवपू
र्वकपात्रेषु किंचिद्दत्वा पिंडार्थं किंचिदवशेषयेत् ततोऽन्यदन्नं यथासंभवं सर्वत्र परिविष्य घृतं जलं
च तत्रोपनीयपात्रमालभेत् तत्र क्रमः उत्तानपाणिभ्यां प्रथमं देवपात्रं स्पृष्ट्वा ॐ पृथिवी ते पात्रं द्यौरपि
धानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा इति पठित्वा ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् स
मूढमस्य पांसुरे ॐ कृष्ण हव्यमिदं रक्ष मदीयमिति पठित्वा ॐ इदमन्नमित्यन्ने ॐ इमा आप इति
जले ॐ इदमाज्यमिति घृते ॐ इदं हविरिति पुनरन्ने इति दक्षिणांगुष्ठमारोप्य ॐ यवोऽसि यवया
स्मद्द्वेषो यवयारातीरिति यवान् विकीर्य कुशादीन्यादाय ॐ अद्यामुकगोत्राणां मातृपि
तामही प्रपितामहीनाममुकामुकदेवीनां नांदीमुखीनामाभ्युदयिकश्राद्ध संबंधिनो वि
श्वेदेवा इदमन्नं सोपकरणं वो नमः यद्येकमेव पात्रं भवति तदा वामेन पाणिना पात्रमत्यजन्
त्रेव इदं विष्णुरित्यादि पठित्वा यवप्रक्षेपपर्यंतं कृत्वा कुशादीन्यादाय पित्राद्युल्लेखेन पि
त्रादिदेवेभ्योऽप्यन्नमुत्सृजेत् एवमेव मातामहादिदेवेभ्यः भिन्नपात्रपक्षे ॐ पृथिवी ते पात्रमित्या

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दीनां सर्वेषामाचरति : ततो मातृपात्रसुतानाभ्यामेव कराभ्यांस्पृष्ट्वा ॐ पृथिवीतेपात्रमित्यादि इदंविष्णु
रितिपठित्वा ॐ कृष्णकव्यमिदंरक्षमदीयं ॐ इदमन्नमित्यन्ते ॐ इमा आप इति जले ॐ इदमाज्यमि तिघृ
ते ॐ इदंहविरिति पुनरन्ने दक्षिणकरांगुष्ठमारोप्य ॐ अपहता ऽअसुरारक्षाᳪंसिवेदिषद इत्यन्नो
परितिलवान् विकीर्य्य ॐ अद्यामुकगोत्रेमातरमुकदेविनांदीमुख्याभ्युदयिक श्राद्ध इदमन्नंसोप
करणं तेनमः एवंपात्रालंभनादिकं कृत्वा प्रत्येकं पितामही प्रपितामहीभ्यामपिदद्यात् एवंपितृ
पात्रमालभ्य ॐ पृथिवीतेपात्रमित्यादि पठित्वा पूर्ववत्सर्वंकृत्वा ॐ अद्यामुकगोत्रपितरमुकश
र्मन्नांदीमुखाभ्युदयिक श्राद्ध इदमन्नंसोपकरणंतेनमः इतिपितृ अन्नमुत्सृजेत् एवंपितामहादि
भ्यः पंचभ्योपि प्रत्येकमन्नमुत्सृजेत् ततः सांजलि ॐ मन्त्रहीनंक्रियाहीनंविधीहीनं चयद्भवेत्
तत्सर्वंमच्छिद्रमस्त्विति जपेत् दर्भेपूयविश्य गायत्रीत्रिर्जपित्वा ॐ मधुमधुमध्विति जपेत् मधु
वाता इत्यादि ऋचंनजपेत् नपितृमंत्रान् उदीरतामवर इत्यादि नजपेत् अन्यानिपुरुषसूक्ता
दीनिपवित्राणिजपेत् ततः प्रागग्रकुशत्रयं भूमावास्तीर्य जलेनप्रोक्ष्य जलप्रोक्षितस्य वक्ष्यत्
मन्त्रेकुशादिना ॐ अनग्निदग्धायेजीवायेप्रदग्धाःकुलेममभूमौदत्तेनतृप्यंतु तृप्तायांतु परांगतिमिति
मंत्रेणकुशोपरिविकिरेत् ततआचम्यहरींस्मृत्वागायत्रीं त्रिर्जपेत् चतुरस्रोपिंड्योग्यभूमिंपरिस्तीर्य उत्तरोत्तर
क्रमेणस्थानत्रयंप्रादेशमात्रंपरिमायततः प्रागग्रांरेखांदर्भपिंजुलीमूलेन ॐ अपहता ऽअसुरार

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्राद्धे सिवेदिषद इति कुर्यात् ततः प्रत्येकं रेखात्रयोपरि ओं ये रूपाणि प्रतिमुंचमाना असुराः सन्तः स्व
धया चरंति परापुरो भरन्त्यग्निष्टाल्लोकान्प्रणुदात्वस्मादिति मंत्रेणांगारान्भ्रामयेत् तदुपरि त्र
यिकुशत्रयमास्तीर्य ओं देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च नमः स्वाहायै स्वधायै नित्यमेव न
मो नम इति त्रिर्जपित्वा प्रत्येकमवनेजनं दद्यात् तत्क्रमः यवजलगंधपुष्पैर्नेच पात्राणि पूरयि
त्वा पात्रमेकं वामकरे कृत्वा कुशादीन्यादाय ओं अद्यामुकगोत्रे मातरमुकदेवि नांदीमुखि अ
भ्युदयिक श्राद्धे पिंडस्थानेऽवनेनिक्ष्व तेनमः इति सर्वदक्षिणकुशत्रयमूले मात्रेऽवनेजनं दद्या
त् किंचिज्जलमवशेषयेत् एवमेव पात्रांतरमादाय तत्कुशमध्ये पितामह्यै तत्कुशत्रयाग्रे प्रपि
तामह्यै अवनेजनं दद्यात् ततश्चापरपात्रमादाय कुशादींश्चादाय ओं अद्यामुकगोत्र पितर
मुकशर्मन् नांदीमुखाभ्युदयिक श्राद्धपिण्डस्थाने अवनेनिक्ष्व तेनमः इति मध्यस्थितकुशत्रय मू
ले पित्रेऽवनेजनं दद्यात् एवं तत्कुशत्रयमध्याग्रयोः पितामह प्रपितामहयोरवनेजनं दद्यात्
ततः सप्तपात्रमादाय कुशादींश्चादाय ओं अद्यामुकगोत्र मातामहामुकशर्मन्नांदीमुखा
भ्युदयिकश्राद्धे पिंडस्थानेऽत्रावनेनिक्ष्व तेनम इत्यपरकुशत्रयमूले मातामहायावनेजनं दद्या
त् एवं प्रमातामह वृद्धप्रमातामहयोरपि ततो यवदधिबदरघृतमिश्रान्नेन पिंडान्निर्माय
। एवं पिंडं कुशादींश्चादाय ओं अद्यामुकगोत्रे मातरमुकदेवि नांदीमुखि अभ्युदयिक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्राद्ध एष पिंडस्ते नमः इति तदवनेजनस्थाने पिंडं दद्यात् एवमेव पितामहीप्रपितामहीभ्यां स्वीयस्वी
यावनेजनस्थाने पिंडं दद्यात् ततश्चतुर्थपिंडमादाय ॐ अद्यामुकगोत्र पितरमुकशर्मन् नान्दीमु
खाभ्युदयिकश्राद्ध एष ते पिंडो नमः इत्यवनेजनस्थाने पित्रे पिंडं दद्यात् एवमेव पितामहादिपंच
भ्यस्तत्तदवनेजनस्थानेषु प्रत्येकं पंच पिंडान् दद्यात् ततो दर्भमूले करं प्रोक्ष्याचम्य हरिं स्मृत्वा ॐ अत्र
मातरो मादयध्वं यथाभागमावृषायध्वमिति पठित्वा उदङ्मुखीभूय श्वासं नियम्य तेनैव यथापरावर्त्तयन्
अमीमदन्त मातरो यथाभागमावृषायिषतेति जपेत् एवमत्र पितरो मादयध्वं यथाभागमावृषायध्व
मिति जप्त्वा उदङ्मुखीभूय श्वासं नियम्य तेनैव यथामुखं परावर्तयन् अमीमदन्तेत्यादि जपेत् एवमेव
महादिपक्षे मन्त्रजपः ततोऽवनेजनावशिष्टजलेन प्रत्यवनेजनं दद्यात् तत्र मन्त्रः ॐ अद्यामु
कगोत्रे मातरमुकदेवि नान्दीमुख्याभ्युदयिकश्राद्धे पिंडे प्रत्यवनेनिक्ष्व ते नमः इति तत्पिंडो
परि दद्यात् एवं पितामहीप्रपितामहीभ्यां तथा ॐ अद्यामुकगोत्र पितरमुकशर्मन् नान्दीमु
खाभ्युदयिकश्राद्धे पिंडेऽत्रावने प्रत्यवनेनिक्ष्व ते नमः इति पिंडोपरि प्रत्यवनेजनं दद्यात्
एवमेव तत्तत्पिंडोपरि पितामहादिपंचभ्यो दद्यात् ततो नीवीं विस्रंस्याचम्य हरिं स्मृत्वा सूत्रा
ण्यादाय ॐ नमो वो मातरो रसाय नमो वो मातरः शोषाय नमो वो मातरो जीवाय नमो वो मातरः स्व
धायै नमो वो मातरो घोराय नमो वो मातरो मन्यवे नमो वो मातरो मातरो गृहान्नो मातरो दत्त सतो वो मातरो द

Kirtikant Sharma Collection, Najafgarh

अमरएतह्योमातरोवास इतिमातृणांपिंडत्रयोपरिसूत्रंदद्यात् ॐनमोवः पितरः शोषायनमोवः पितरोजी
वायनमोवः पितरः स्वधायैनमोवः पितरोघोरायनमोवः पितरोमन्यवेनमोवः पितरः पितरोनमो
वोगृहान्नः पितरोदत्तसतोवः पितरोदेष्म एतद्वः पितरोवास इत्यनेन पित्रादिपिंडषट्कोपरिप्रत्येकंसू
त्रंदद्यात् ततः कुशात्रययवजलान्यादाय ॐ अद्यामुकगोत्रेमातरमुकदेविनांदीमुखि अभ्युदयिकश्रा
द्धेपिंडेएततेवासोनम इतिसूत्रमुत्सृजेत् एवमेवपितामही प्रपितामहीभ्याम् ॐ अद्यामुकगोत्रपि
तरमुकशर्मन्नांदीमुखाभ्युदयिकश्राद्धेपिंडेएततेवासोनमः एवंपितामहादिपंचभ्यः सूत्रंदद्यात्
ततोगंधपुष्पधूपदीपतांबूलादिभिः प्रत्येकंपिंडानभ्यर्च्य ॐ शिवाआपःसंत्विति जलं ॐ सौमनस्य
मस्त्विति पुष्पं ॐ अक्षतंचारिष्टमस्त्विति तंडुलान् प्रत्येकंपात्रेषु निक्षिप्य कुशादीन्यादाय ॐ अद्या
मुकगोत्रामाताऽमुकदेवी नांदीमुखी आभ्युदयिकश्राद्धे दत्तैतदन्नपानादिभिः प्रीयतामित्यक्षय्यो
दकमुत्सृजेत् एवंपितामह्याः प्रपितामह्याश्चाक्षय्योदकंदद्यात् तथा ह्यमुकगोत्रः पिताऽमुश
र्मानांदीमुखः आभ्युदयिकश्राद्धे दत्तैतदन्नपानादिभिः प्रीयतामिति पित्रे एवंपितामहादिपं
चभ्योऽक्षय्योदकंदद्यात् ततः ॐ अघोरामातरः संत्विति मातृपिंडत्रयोपरि पूर्वाग्रांजलधा
रांदद्यात् ॐ अघोराः पितरः संत्विति पित्रादिपिंडषट्कोपरि जलधारांदद्यात् ततः ॐ गो
त्रंनोवर्द्धतां दातारोनोभिवर्द्धंतां वेदाः संततिरेवच श्राद्धाचोनोमाव्यगमद्बहुदे ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पद्मनोस्त्विति अन्नं च नो बहु भवेदतिथींश्च लभेमहि याचितारश्च नः सन्तु मा च याचिष्म कंचन
एताः सत्या आशिषः सन्त्वित्याशीः प्रार्थयेत् ततः सपवित्रकुशत्रयाणि प्रत्येकं मात्रादिपिण्डत्रये पि
त्रादिपिण्डत्रये मातामहादिपिण्डत्रये च धृत्वा ॐ ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं
स्वधास्थ तर्पयत मे मातॄ रिति मात्रादिपिण्डोपरि जलधारां दद्यात् ततस्तथैव ॐ ऊर्ज्जं वहन्तीरित्या
दि पठित्वा पित्रादिपिण्डत्रयोपरि जलधारां दद्यात् ततः पिण्डानाघ्राय उत्थाप्य पिण्डाधारकुशानुल्मु
के च वह्नौ क्षिपेत् अर्घपात्राण्युत्तानीकृत्य दक्षिणां दद्यात् दक्षिणाद्रव्यं च फलमूले फलं मूलं वाग्ने
कं तत्र क्रमः ॐ अद्यामुकगोत्राणां मातृपितामहीनाममुकामुकदेवीनां नान्दीमुखानामाभ्युदयि
कश्राद्धसंबंधिनां विश्वेषां देवानां कृतैतन्नाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमे फलमूले वनस्पति
दैवते यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे एवं पित्रादिश्राद्धसंबंधिवि
श्वेदेवश्राद्धदक्षिणां मातामहादिश्राद्धसंबंधिविश्वेदेवश्राद्धदक्षिणां दद्यात् ॐ अद्या
मुकगोत्राया मातुरमुकदेव्या नान्दीमुख्याः कृतैतन्नाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमे फलमू
ले वनस्पतिदैवते इत्यादि एवं पितामहीप्रपितामह्योरपि ॐ अद्यामुकगोत्रस्य पितुरमुकश
र्मणो नान्दीमुखस्य कृतैतन्नाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमे फले मूले वनस्पतिदैवते इत्यादि एवं
पितामहादिश्राद्धदक्षिणां दद्यात् वाजे वाज इत्यादिना मात्रादिविसर्जनम् ॐ विश्वे देवाः १५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शीयंतामिति देवविसर्जनम् ततो देवताभ्य इति त्रिर्जपः दीपनिर्वापणं आचमनं प्रमादात्पाठः आह्नी
यवस्तु प्रतिपत्तिः इत्याब्दपिकश्राद्धपद्धतिः अथ नित्यश्राद्धप्रयोगः आचम्य उदङ्मुख उपवि
ष्टः ओं पवित्रं। पवित्रो वा सर्वावस्थां गतोपि वा यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिरिति प
ठित्वा ओं पुंडरीकाक्षः पुनात्विति कुशत्रयजलेन श्राद्धीयद्रव्याणि सिंचेत् ततः कुशत्रयतिलज
लान्यादाय ओं अद्यामुकगोत्राणां पितृपितामहप्रपितामहानाममुकामुकशर्मणां मातामहप्र
मातामहवृद्धप्रमातामहानाममुकामुकशर्मणां नित्यश्राद्धमहं करिष्ये इति संकल्पं कुर्यात्
ततः त्रिर्गायत्रीं जप्त्वा ओं देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च नमः स्वाहायै स्वधायै नित्यमेव न
मो नमः इति त्रिर्जपेत् ततोऽपसव्यं कृत्वा पातितवामजानुर्मोटकतिलजलान्यादाय ओं अद्यामुकगो
त्र पितरमुकशर्मन् नित्यश्राद्ध इदमासनं ते स्वधेति तिलजलप्रोक्षितं मोटकरूपमासनं दक्षिणं
शां पित्रे दद्यात् एवमेव पितामहादिपंचभ्यः प्रत्येकमासनं मुत्सृजेत् ओं अपहता असुरा रक्षां
सि वेदिषद इति श्राद्धदेशे तिलान् विकीर्य ओं आयंतु नः पितरः सोम्यासो ग्निष्वात्ताः पथिभि
र्देवयानैः अस्मिन्यज्ञे स्वधया मदंतो धिब्रुवंतु ते वत्वस्मानिति जपेत् ततः ओं अद्यामुकगोत्रपि
तरमुकशर्मन् नित्यश्राद्ध एतानि गंधपुष्पधूपदीपतांबूलानि ते स्वधा इति यथासंभवं पित्रे गंधा
दि दद्यात् एवमेव पितामहादिभ्यो प्युत्सृजेत् ततो जलेन मंडलं चतुष्कोणमन्नपात्रस्य चतुर्दिक्षु कृत्वा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ऽन्नपरिवेषणं कुर्यात् ततोमधु दत्वा ओं मधुवाता ऋतायते मधुक्षरंति सिन्धवः माध्वीर्नः सन्त्वोषधीः ओं
मधुनक्तमुतोषसो मधुमत्पार्थिवꣳरजः मधुद्यौरस्तु नः पिता मधुमान्नो वनस्पतिर्मधुमाँ२ऽ अस्तु सू
र्य्यः माध्वीर्गावो भवन्तु नः ओं मधुमधुमध्वित्यभिमंत्रयेत् ततोन्नपात्रं व्यातभ्यामधोमुखाभ्यां स्पृ
शन् ओं पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा ओं इदं विष्णु
र्विचक्रमे त्रेधा निदधे पदं समूढमस्य पाꣳसुरे इति जप्त्वा वामहस्तेनान्नपात्रमन्यजन् ॥ ओं
कृष्णकव्यमिदं रक्षमदीयमिति पठित्वा ओं इदमन्नं ओं इमा आपः ओं इदमाज्यम् ओं इदं हवि
रित्यन्नजलघृतेषु पुनरन्ने च दक्षिणांगुष्ठं निवेश्य ओं अपहता असुरा रक्षाꣳसि वेदिषद
इत्यन्नोपरि तिलान् प्रक्षिप्य मोटकादीन्यादाय ओं अद्यामुकगोत्रपितरमुकशर्मन्नित्यन्ना
द्य इदमन्नं सोपकरणं ते स्वधा इति पित्रेन्नमुत्सृजेत् एवं पितामहादिभ्यः पंचभ्योप्यन्नमु
त्सृजेत् अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् तत्सर्वमच्छिद्रमस्त्विति जपेत् ततो दर्भेष्वा
सीनः ततो गायत्रीम् मधुवाता इत्यादि ऋचं ओं मधुमधुमध्विति च जपेत् ततो ओं कृष्ण
स्वधाजः प्रस्यति न पञ्च्वी म्याहि राजेवामवाऽ इमेन त्रिथ्वी मधु प्रस्यनिन्दूणनोस्वा सिविय्य
रक्षसस्तपिष्ठैः ओं नवत्रमासऽ आसुयापतन्यनुस्पृशाध्यषनाशोस्यचानः नमूꣳध्वगनेजुहायनंगान
संदितो विसृज विम्घयुल्काः ओं प्रतिस्पशो विसृज तूर्णितमो भवापायुर्विशो अस्या अदब्धः यो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नोदूरे अघशंसः ३ सोपो अन्यगने भक्तिष्टे व्यथिरादधर्षीत् २ ओं उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्रा २ ओं
षतात्तिग्महेते यो नो अरातिं ३ समिधान चक्रे नीचातं धक्ष्यतसन्न शुष्कम् ४ ओं ऊर्ध्वो भव प्रति
विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने अवस्थिरा तनुहि जातुजूनां जामिमजामिं प्रमृणी
हि शत्रून् अग्ने ष्ट्वा तेजसा सादयामि इति रक्षोघ्नीः ऋचः पठेत् ततस्तिलान् भूमौ क्षिप्त्वा ओं उदी
रतामित्यादि पितृमंत्रान् सहस्रशीर्षेत्यादि पुरुषसूक्तं ओं आशुः शिशान इत्यादिकमप्रतिरथम्
अन्यानि पवित्राणि यथाशक्ति जपेत् नमस्तुभ्यं विरूपाक्ष नमस्तेनेकचक्षुषे नमः पिनाकहस्ताय व
ज्रहस्ताय वै नमः इति पठेत् ततः ओं अद्यामुकगोत्राणां पितृपितामहप्रपितामहानाममुकामुक
शर्मणां तथाऽमुकगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकश
र्मणां कृतैतत्त्रिपुरुषश्राद्धप्रतिष्ठार्थमेककाकिणीमूल्यकं रजितं चंद्रदैवतं यथानामगोत्राय ब्राह्मणाय
दक्षिणां दातुमहमुत्सृजे इति मोदितां दक्षिणां दद्यात् ततः सव्यं कृत्वा ओं देवताभ्यः पितृभ्यश्च
महायोगिभ्य एव च नमः स्वाहायै स्वधायै नित्यमेव नमो नमः इति त्रिर्जपेत् ओं प्रमादात्कुर्वतां क
र्म प्रच्यवेताध्वरेषु यत् स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिरिति पठित्वा विष्णुं स्मरेत् ततः
श्राद्धीयमन्नं ब्राह्मणाय प्रतिपादयेत् जले वा क्षिपेत् इति श्राद्धविवेके उत्तरक्रियापरिच्छेदः
इति श्रीमहामहोपाध्यायश्रीरुद्रधरकृतः श्राद्धविवेकः समाप्तः संवत् १९३८ शुभम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सूचीपत्रम्

पृष्ठ	पंक्ति	प्रकरणम्
१	५	श्राद्धस्वरूपभेदः
१	११	तत्र कर्तव्यतामंत्रनिर्णयः
६	५	अथ दंपतिपूजनं
६	६	अथ वृषोत्सर्गविवेचनं
६	८	वृषोत्सर्गे कालश्च
९	११	वृषोत्सर्गो गोयन्तेन व्याख्यातं
११	४	वृषोत्सर्जनमंत्रो व्याख्यायते
११	१०	वत्सरीत्याग श्राद्ध
१४	९	आवश्यक श्राद्धकालः
२९	१	निषिद्धदेशः
१९	२	श्राद्धे प्रशस्तदेशाः
१९	५	श्राद्धे प्रशस्त ब्राह्मणाः
१९	५	निषिद्धब्राह्मणाः
२०	४	श्राद्धे प्रशस्तकुशाः
२०	६	श्राद्धे निषिद्धकुशाः
२०	८	श्राद्धे निषिद्धजलं
२०	७	श्राद्धे तिलाः
२०	१०	श्राद्धे अर्घपात्राणि
२०	११	श्राद्धे निषिद्धपात्राणि
२१	१	पंचगंधादि
२१	३	निषिद्धगंधाः
२१	३	अथ पुष्पाणि विहितानि
२१	५	अथ निषिद्धपुष्पाणि
२१	६	निषिद्धधूपाः

निषिद्ध ब्राह्मणाः ३८ पत्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रा॰ वि॰ १५८

सूचीपत्रम्

पृष्ठ	पंक्ति	प्रकरणम्
२१	८	श्राद्धवस्त्रम्
२१	९	तांबूलादि
२१	११	श्राद्धदेशे सन्निधापनीयानि
२१	१	अथ श्राद्धदेशेऽस्पर्शनीयानि
२१	६	अथ श्राद्धे विहितानि द्रव्यानि
२१	११	अथ मांसानि
२२	७	अथ मत्स्याः
२२	७	अथ शाका
२२	१०	अथ फलानि
२२	३	अथ कंदाः
२२	४	अथ व्यंजन संस्कार निषिद्धद्रव्या
२३	४	श्राद्धे विहितानि निषिद्धद्रव्या

नि

सूचीपत्रम्

पृष्ठ	पंक्ति	प्रकरणम्
२३	६	अथ श्राद्ध निषिद्ध द्रव्याणि
२३	११	अथाधिकारीनिरूपणम्
२५	१०	अथाऽनधिकारिणः
२५	१	अथोदक दानाघनही:
२५	४	अथ प्रथम क्रिया
२६	६	अथोदक दानादि
२९	६	अथाऽस्थिसंचयः
२९	११	अथ प्रयोगः
३२	७	अथाशौचांतदिने कार्यं
३२	९	एकादशाहश्राद्धार्थे निमंत्रणादिः
३३	९	अथैकादशाह कार्यं
३४	६	वृषोत्सर्गप्रयोगः

ईतिश्री ३५

१५८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2

श्रा॰
वि॰
१५९

सूचीपत्रम्

पृष्ठ	पंक्ति	प्रकरणम्
३८	७	वृषोत्सर्गे कपिलादानं
३८	८	अथैकादशाहश्राद्धप्रयोगः
४४	६	अथान्नोदकुंभदानं
४५	४	मासिकश्राद्धप्रयोगः
४७	१	अथ सपिंडनश्राद्धप्रयोगः
५६	२	सपिंडीश्राद्धानंतरं षोडशश्राद्ध विस्मृते निर्णयमाह
५६	४	अधिकारिणीकृतषोडशश्राद्धसंकल्पे सपिंडनमस्कान्या
५७	५	सपिंडकर्तृकषोडशश्राद्धविधिः
६०	७	अथापात्रकैकोदिष्टश्राद्धप्रयोगः
६२		अथ मातृश्राद्धप्रयोगः

सूचीपत्रम्

पृष्ठ	पंक्ति	प्रकरणम्
६५	९	अथ स्त्रीकर्तृकश्राद्धप्रयोगः
६७	३	अथ पात्रकपार्वणश्राद्धप्रयोगः १३३
७१	६	अथ तीर्थश्राद्धं
७१	६	अथाभ्युदयिकश्राद्धं
७२	३	अथाऽभ्युदकश्राद्धप्रयोगः वृषोत्सर्गहवन ७२
७७	३	नित्यश्राद्धप्रयोगः

इति श्री श्राद्ध
विवेकका
सूचीपत्र
समाप्त
म्

१५९

Kirtikant Sharma Collection, Najafgarh

श्लो॰ शंभो मध्य गतेसरि नहर मरे देखा सरी शंकरे मास्ये ना गमु ताहर जायो जाम्बिका: स्या ॥
पितारे ध्यांविसमु हरे कदंतार वे यो लंवो रे रे मे ख्येना पो शंकरं भागता तिस्ठ खरा यत्ता स्क तेहा मिरा

मनवः ज्वाला प्रकाशमें प्रहन

श्राद्धबिबेकसमा

सम्

मास्म लाला नन्यमल सेठ केस छपी

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

[illegible] श्यामो उवाच:

॥अथ सामग्री लीख्यते॥ गायत्री जप १२५००० गोदुग्ध १ गंध २ गौ ३ मृत्ति ५ स्व वर्सा १

चांदि २ तांबे ३ लोहे ४ सिक्के ५ क[illegible]था ५ [illegible]न ५ गंगाजल १ सहत २ घीगोका १ प

लाश की समिधा १ = पक्वान १ आटा १ चावल १ आटा जवका १ चंदन १ अक्षत १ पु

ष्प १ धूप १ दीप १ नैवद्य १ [illegible] १ परांदा १ टके पूजन को [illegible] आटा हल्दी १

गोलाली १ समिधा १ [illegible] घी १ पाटा [illegible] १ [illegible] सांसहवन ॥ जव तिल चावल मे [illegible] मिठा

ई घीऊ ब्रह्मभोजनं दक्षीणा शुभमस्तु॥ गंगायांच यमुनायांच नैमिषे पुष्करे कुरुजंगल

गंगाजल [illegible] विमलेजले [illegible] गोष्ठे गृहे वा प्रतिमालये

पश्चात्पातलकं कार्ये सर्वौषधिसमन्वितं [illegible] चरु [illegible] भाग [illegible]

शपः १ [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नारिकेलंधार स्थाने पारदंप्रायः तालकं ६ पंचरत्नमुखे दद्यात् ऊहापोकदलीफलं अं
गैश्च नालिकेरं दद्यात् ब्राह्मीकंपा रामेवच ७ वसायां फलंजीवकादद्याज्जीमूतं नयं वर्त्तपा
ं च पक्वंधान्तवदे पं हरितालं मनःशिला ८ पक्वपिष्ठतथामांसे मधुशोणितमेवच
केशे कुशजटाजूटं तथा यांचमृगात्वचं ९ चारं दंते तमः स्थाने पुरीषेपित्तलंतथा मनः
शिलाँतरधामगा न्नोशितेनवल्कफेसंधो च १० कर्णयोर्मशा उपजन्नरत्ननयोर्श्चवर्णं गुल्मो
नासायां शतापनं चचामलं कैनाभिमंडले ११ दंतालिंग कं वृषणे दद्यालिंगेस्पादुं जंघे
श्रृंगंत्रांना भ्यांमदेयं सप्तावो पाणिचेव पुर्ल्मा १२ मौक्तिकंस्तनयोर्मूर्ध्नि कुंकुमेनविले
पनं कर्पूरागुरूधूपैश्च पुष्पैमाल्यैः सुगंधिभिः १३ परिधाने हृदये रुक्म कंनासाग्र न्यछि
द्रं भुजौ लोचने न योश्चकपर्दिकां १४ सिंदूरं ने न तोरोध्रतां स्वलाग्रुपत्रगरवैः स
वोषधिरुतांमपांरुजाधरपद्योदितां १५ सात्विकेनापिविधिना वज्रपानाशिविन्यसेत्
शरीरं देवतां दंतुइम मेव रूपातिष १६ प्रेतस्यपावनंधान्या शालस्यामशिलोरके: विस्तु
मुद्विपदानव्यासशीलागौः पयस्विनी १७ इति गारुडे प्रेतजलाधिविधिः ॥ रजोगतः प्रतिमां
पूर्वे या गोदमाघस्नाश्चतः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(7)

श्री ३

श्लो॰ देशाटनं पंडितमित्रता च वारांगनाराजसभाप्रवेशः अनेकशास्त्राणि विलोकितानि चातुर्यमूलानि भवन्ति पंच १ पिनस्तनी चंदनचार्चितांगी विलोलनेत्रा तरुणी सुशीला नादौ लिता स्वेद इये अस्यामार्या गतं तस्य नरस्य जीवितं २ कपाटमुद्घाट शिलनैवेतं दर्पमेण तु विलघ्रपद्वै स्त्रापूरितं चापश पैलिंगु खे नर्चं द्रा ननेन शर्मा प्रपद्ये ३ गगन पल्लोक ज्वलतप्रदीपं स रिजननं प्रश्यति यौ तु वं मुहूर्तमात्र मांलं ध्रातवां ति धि र्या विमुक्ततो विंदु कारे या मुक्त ४ ॥ श्लो॰ गणेश शारदा रोचन नमस्कारोभिविरचिनाराय याः संकरेभ्यः इंद्रादयो देव नमोस्तु सर्वेषां यालिख निर्मल वर्षपत्रिकाम् १ सर्पे पेनाम हं यास्त्र त्रेता पानार राप गार्जिकं ह्याप रेप्रोक्तं युग संतानिकं वर्तो २ इंद्राद्या देवताः सर्वे यान ग्रा या स ग्रायाः कल्पा गाते प्र कुर्यु यश्चो रेवा वर्षपत्रिकाम्: ३ विंशोविंस्तरतां प्रयांतु सततं कीर्तिर्दिगंतात पापं हृद्धि चापुरुषेतु या त्राविनता ५ योषं मह छिद्रा याः ४ यत्कुर्यं कुदान घिल परतां संयानु कामो जनो यस्या सो विप्र ताम ह्य पर वितां प श्री शुभोदो स्यिता ॥ ५ ॥ शंभोमध्य गतं तुरि नक्ष्म है ध्या हृगौ शं व रमास्य ना गम्युत्ताहर [illegible] ॥ स्था ॥ तेत्रा दे वं तां विश्ब्र्यरेवा दंतस्वे ले जेश्वा [illegible] यां [illegible] तिम [illegible] जामि दा ।

Kirtikant Sharma Collection, Najafgarh